श्रीगणेशायनमः ॥ देवीदानवदैत्यदर्पनिवहान्संहारयंती शिवा ब्रह्मानंतमहेशमौलिमणिभिः संशोभितांघ्रिद्वयं ॥ नत्वा श्रीगुरुदेवतांघ्रि
सरसीजाताभृतप्लावितः पूर्णानंदगिरिस्तनोतिप्रतिमानुत्तमारहस्याभिदं ॥ १ ॥ स्वतंत्रंवीरतंत्रंचफेत्कारीतंत्रमेवच ॥ कालिकाकुलसर्व
स्वकालीतंत्रंचयामलं ॥ २ ॥ कुलचूडामणिंचैवकौमारीतंत्रमेवच ॥ कुलार्णवंतथाकालीकल्पंभैरवतंत्रकं ॥ ३ ॥ कालिकाकुलसंभारंतथा
वीनरतंत्रकं ॥ गुरूणांचमतंज्ञात्वासाधकानांमतंतथा ॥ ४ ॥ शुद्धबुद्धिस्वभावार्थंवक्ष्यामिमोक्षकारिणी ॥ महाविद्यांमहागोप्यांपुरुषार्थ
प्रबोधिनी ॥ ५ ॥ ॥ वीरचूडामणौ ॥ अथान्यांसंप्रवक्ष्यामिसारांगींसर्वसिद्धिदां ॥ यस्याविज्ञानमात्रेसर्वसिद्धिमयोभवेत ॥ ६ ॥ मे
धाप्रज्ञातथालक्ष्मीवल्लभः सर्वजंतुषु ॥ अस्याः प्रसादमात्रेणदेहज्ञानंप्रजायते ॥ ७ ॥ कृतेत्रेतापित्रेतायांपरंचद्वापरेयुगे ॥ प्रत्यक्षादे
वताः सर्वाभक्ताधीनाहिदेवताः ॥ ८ ॥ गुरुणाकरुणासिंधुनीरेणचविकासिता ॥ सेविताशुद्धबोधेनप्रत्यक्षाकालिकाकले ॥ ९ ॥
तत्रोद्दाद्वाविंशदक्षरीविद्यणाति ॥ तदुक्तंस्वतंत्रे ॥ ॥ क्रोधीशंबिंदुयुक्तांतेत्रिमूर्त्यग्निसमन्वितं ॥ त्रिर्लिखेत्परतोदेविकूर्चद्वयमेव
हि ॥ १० ॥ मायाद्वयंसमालिख्यदक्षिणेकालिकेतिच ॥ सप्तबीजानिपूर्ववद्धुद्धरेत्परमेश्वरि ॥ ११ ॥ स्वाहांतेयंमहाविद्याद्वाविंशात्यक्ष
रीपरा ॥ अनयासदृशीविद्यानास्तिज्ञानेतुमामके ॥ १२ ॥ ॥ कुमारीतंत्रे ॥ अतिगुह्यतमंत्येनज्ञानात्मकंसनातनं ॥ अतीवहिसुगो
प्यंचकथितुंनेवशक्यते ॥ १३ ॥ अतीवमप्रियासीतिकथयामितवानघे ॥ सर्वंब्रह्ममयंत्येतत्संसारंस्थूलसूक्ष्मकं ॥ १४ ॥ कैप्रेत्यातुवि
नानेवसंसारमुपपद्यते ॥ तस्माच्चप्रकृतेर्मूलकारणंनेवदृश्यते ॥ १५ ॥ रूपाणिबहुसंख्यानिप्रकृतेः संतिभाविनि ॥ तेषांमध्येमहेशानि
कालीरूपंमनोहरं ॥ १६ ॥ तेषांमध्येमहेशानिनिराणांमुक्तिमुक्तिदं ॥ तस्याउपासकाश्चेवब्रह्माविष्णुशिवालयः ॥ १७ ॥ चंद्रः सूर्यश्चवरु १
णः कुवेरोग्निस्तथापुरः ॥ दुर्वासाश्चवसिष्ठश्चदत्तात्रेयोबृहस्पतिः ॥ बहुनाकिमिहोक्तेनसर्वेदेवाउपासकाः ॥ कालिकायाः प्रसादेन
मुक्तिमुख्यादिभागिनः ॥ तस्यामंत्रंप्रवक्ष्यामियत्नेनरक्षेज्जगत्त्रयं ॥ ककारंवह्निसंयुक्तंरतिबिंदुसमन्वितं ॥ त्रिगुणंचततः कूर्चयुगंमाया

युगंतथा ॥ दक्षिणेकालिकेचेतिपूर्ववबीजानिचोच्चरेत ॥ वह्निजायावधिः पुण्यकालिकायामनुर्मतः ॥ भात्रशुध्यांशकापेक्षानारिमित्रादिचिंत
नं ॥ काथाद्रूशकरनेवसमयासमयादिकं ॥ तत्वबोधे ॥ ॥ ब्रह्मावह्निसमारूढश्चतुर्थस्वरसंयुतः ॥ नादबिंदुसमायुक्तस्त्रिगुणीकृतविग्र
हः ॥ कूर्चयुग्मंशिवायुग्मंदक्षिणेकालिकेततः ॥ प्राग्बीजंवह्निजायांतोदक्षिणायाद्विविंशतिः ॥ ॥ श्रुतौच ॥ अथहैनांब्रह्मरंध्रेब्रह्मरू
पिणिमाप्नोतिसुभगांत्रिगुणांकृत्वासुभगातुकामरेफेंदिराबिंदुमेलनरूपाएतत्त्रिगुणितांआदानदनुकूर्चद्वयंकूर्चबीजंतुव्योमषष्ठस्वर
बिंदुमेलनरूपंतदेवंद्विरुच्चार्यभुवनाद्वयंभुवनातुव्योमानलेंदिनाशून्यमेलनरूपात्तद्वयंदक्षिणेकालिकेत्यभिमुखतातदनुबीजसप्तक
मुच्चार्यवह्नजायामुच्चरेत ॥ सतुशिवमयोभवेत ॥ सर्वसिद्धीश्वरोभवेत ॥ गतिस्तस्यास्तिनान्यस्येति ॥ सतुवागीश्वरः सतुदेवेश्वरः स
तुसर्वेश्वरः अयंमंत्रोत्तमोत्तमः ॥ इमंसकृज्जपन्सतुदेवेश्वरः सतुनारीश्वरः सतुसर्वगुरुः ससर्वनमस्यः ससर्ववेदैरधीतोभवतिसतुस
र्वेषुतीर्थेषुस्नातोभवतिससर्वयज्ञेषुदीक्षितोभवतीतिश्रुतिः ॥ त्रिकोणंत्रिकोणंत्रिकोणंपुनश्चेवत्रिकोणंत्रिकोणं ॥ ततोवसुदलंसार्धं
चंद्रसकेसरं ॥ युग्मशोविलिख्यसंहतं ॥ भूपुरेकेनयुतंसदेवीसर्वांगेनाभ्यर्च्यतांतस्मिन्देवीहृल्लेखयांगंविन्यस्यध्येया ॥ अभिनवजलध
रनीलाघनस्तनीकुटिलदंष्ट्राशवासनावनीभयरवड्गमुंडमंडितहस्ताकालिकाध्येया ॥ कालिकपालिनीकुल्लाकुरुकुल्लाविरोधिनीवि
प्रचित्तेतिवहिः षट्कोणगाः उग्राउग्रप्रभादीप्तानीलाघनाबलाकामात्रामुद्रामितेतिनवकोणगाः इत्थंपंचदशकोणगाः ब्राह्मीनारायणी
माहेश्वरीचामुंडाकौमारीअपराजितावाराहीनारसिंहीत्यष्टपत्रगाः चतुष्कोणेचत्वारोदेवामाधवरुद्रविनायकसौराश्चतुर्दिक्षंइन्द्रयमव
रुणकुबेराः देवीसर्वांगेनादौपूज्याभगोदकेनतर्पणंपंचमकारेणपूजनंदेवीकामसूर्यएतस्यास्ताराएतस्याः सपर्यायाः किमधिकंनोशक्यं
ब्राह्म्यादिपदलीलयाप्नोतिएकस्याएकाद्वित्रिक्रमेणमनवोभवंतिनारिमित्रादिलक्षणंवर्तते ॥ अमुष्यमंत्रपाठकस्यगतिरस्तिनान्यस्यैव
गतिरस्तिमनुः सुंदरीमनुर्दुर्गामनुर्वासिद्धिः इदानींतुसर्वाः सप्तभूताः कालिकासत्येवजाग्रियते ॥ इमांअसितायांमुपनिषदंयोवाधीते

सोपुत्री पुत्रीभवति निर्धनो धनीभवतिसान्यस्यवरदः इह्यातंमोह्यते कोथातंक्रीयते धर्मार्थकामभोक्षाणां यान्यीयते गंगादितीर्थक्षेत्राणां व
क्रिष्टोमादियज्ञानांफलभागी यंतइत्यथर्वणवेदे सौभाग्यकांडेश्यामोपनिषत्॥ अथमूलाधाराद्रसरंध्रंगतापुनश्चंद्रकुंडलिनी शक्तिसामर
स्यसुखोदयः॥ व्योमपंकजनिष्यंदसुधापानरतोनरः॥ मधुपानमिदंप्रोक्तमितरेमद्यपायिनः॥ पुण्यापुण्यवासनेकुलनामकेशालागुरुमुखाद्वी
यः सवतेसमुच्यते॥ भैरवतंत्रेपि॥ नात्रचिंता विशुद्धिर्वानारिमित्रादिभूषणं॥ नवाप्रयासबाहुल्यंसमयासमयादिकं॥ देवदेवत्वविधयसिद्धैःख
चरासिद्धये॥ पन्नगैराक्षसैर्मर्त्यैर्मुनिभिश्चमुमुक्षुभिः॥ कामिभिर्धर्मिभिश्चार्थलिप्सुभिः सेवितांपरां॥ देवींदक्षिणसंज्ञातांप्रवक्ष्यामियथाविधि॥
वर्गाद्यंवह्निसंयुक्तंरतिबिंदुसमन्वितं॥ त्रिगुणंचततः कूर्चयुगलंलज्जायुगंतथा॥ दक्षिणेकालिकेचेतिपूर्ववत्समकंपुनः॥ ठद्वयेनसमायुक्तंमनु
मेनंविदुर्बुधाः॥ द्वाविंशत्यक्षरात्मा स्यान्मंत्रोयंसर्वसिद्धिदः॥ भैरवोस्यऋषिः प्रोक्तउष्णिक्छंदः प्रकीर्तितं॥ देवतादक्षिणाकालीसर्वसि
द्धिप्रदायिनी॥ नात्रमित्राद्यपेक्षास्तिनचमित्रादिशोधनं॥ नवाप्रयासबाहुल्यंसमयासमयादिकं॥ नचातिचित्तबाहुल्यंकायक्लेशकरंनच॥
यएनंचिंतयन्मंत्रं सर्वकामार्थसिद्धिदं॥ तस्यहस्तेसदैवास्तिसर्वसिद्धिर्नसंशयः॥ गद्यपद्यमयीवाणीसभायांतस्यजायते॥ तस्यदर्शनमात्रे
णवादिनोनिःसभांगताः॥ राजानोपिहिदासत्वंभजंतेकिंपरेजनाः॥ अग्नेःस्तंभंजलस्तंभंगतिस्तंभंविवस्वतः॥ दिवारात्रिव्यत्ययंचसकर्तुं
भवतिक्षमः॥ ब्रह्महत्यासुरापानमगम्यागमनंतथा॥ सर्वमाशुतरत्येवदक्षिणामाशुचिंतयन्॥ वाग्मीश्वरसमोवानिर्धनोधनपतिर्भवेत्॥
कामतुल्यश्चनारीणांरिपूणांसयमोपमः॥ सर्वस्यैवजनस्यैवदुर्लभःकीर्तिवर्धनः॥ अंतेचलभतेदेव्यागणत्वंदुर्लभंनरः॥ चंद्रसूर्य
समोमंत्रीवसेत्कल्पायुतंदिवि॥ इत्येवमादिकंचैवबहुकिंकथ्यतेपुनः॥ नतस्यदुर्लभंकिंचिद्यःस्मरेद्धोरदक्षिणां॥ अथसपर्याविधिः॥
ब्राह्मेमुहूर्तेउत्थायबद्धपद्मासनःशिरस्थाधोमुखश्वेतवर्णसहस्रदलकमलकर्णिकांतस्थचंद्रमंडलांतर्गतहंसपीठेनिजगुरुंशुक्लव
र्णंशुक्लालंकारभूषितंज्ञानानंदमुदितंमानसंवराभयकरंवामोरुस्थरक्तशक्त्यावामेधृतरक्तोत्पलयादक्षिणहस्तेनधृतचारुकलेव

रंशांतंद्विभुजंद्विनयनंदिव्याभिषेकेणगुरूणांसंप्रदायानुगतकृतनामपूर्वकंध्यात्वामानसैरुपचारैराध्यमानसोपचारैर्यथा॥ लंपृथि
व्यात्मकंगंधंसमर्पयामिनमःकनिष्ठांगुष्ठाभ्यांदद्यात्॥ हंआकाशात्मकंपुष्पंसमर्पयामितर्जन्यंगुष्ठाभ्यां॥ यंवाय्वात्मकंधूपंतर्जन्यंगुष्ठा
भ्यांरंवह्न्यात्मकंदीपंमध्यमांगुष्ठाभ्यां॥ वंअमृतात्मकंनैवेद्यंअनामिकांगुष्ठाभ्यां॥ संसर्वात्मकंतांबूलंसर्वांगुलिभिः॥ ऐंह्रींश्रींह्स्ख्फ्रें
हसक्षमलवरयूंस्हस्ख्फ्रेंसहक्षमलवरयींश्रीअमुकानंदनाथानंदनाथामुकीदेव्यंबाश्रीपादुकांपूजयामी॥ तिदशधाक्षितिस्पृश्यदंडवत्प्रणा
मंभूमौकुर्यात्॥ यत्तुश्वेतांबरंधरंगौरंश्वेताभरणभूषितमित्यादिगुरुध्यानंतद्वैष्णवविषयंबोधव्यं॥ शाक्तोदोत्तुरक्तमाल्यांबरधरंरक्तपद्म
वेष्टितमितिशारदातीकाकारः॥ अस्मन्मतेतुश्वेतवर्णमपिगुरोर्ध्यानंतरमास्तिशाक्तविषयेतत्तुअस्याःकवचेलेखयिष्यामि॥ ज्ञानार्णवे
पि॥ ब्रह्मरंध्रेसहस्रारेनिकटेस्वरधवलोगुरुमित्यादि॥ अज्ञानेतिनमस्कृत्यतदनुज्ञांगृहीत्वामूलाधारस्थितांत्रिकोणांतर्गतांधोमुखस्वयं
भूलिंगवेष्टिनींप्रसुप्तभुजगाकारांसार्धत्रिवलयांतडित्कोटिप्रभांनीवारशूकवत्तन्वींकुंडलिनींत्रिकोणमंडलाग्निचैतन्यंविधायब्रह्म
वर्त्मनाद्वादशांतंनीत्वातत्रपरमशिवेसंयोज्यकुलगुरुंध्यायेत्॥ तदुक्तंकालिकाश्रुतौ॥ मूलाधारेस्मरेद्दिव्यंत्रिकोणंतेजसांनिधिं॥ त
स्यास्त्रिकोणरेखामानीयअधर्ऊर्ध्वव्यवस्थितां॥ नीलतोयदमध्यस्थांतडिल्लेखेवभासुरां॥ नीवारशूकवत्तन्वीपीतांभास्वदणूपमां॥ तस्याः
शिखायामध्येचपरमोर्ध्वव्यवस्थितां॥ सब्रह्मासशिवःसेंद्रःसोक्षरःपरमःस्वराट्॥ सएवविष्णुःसप्राणःसकालाग्निःसचंद्रमाः॥ इतिकुं
डलिनींध्यात्वासर्वपापैःप्रमुच्यते॥ समहापातकेभ्यःपूतोभवतिसिद्धिकृत्॥ केवलंभैरवरूपोभवतीति॥ कुलचूडामणौच॥ मूलादिब्रह्म
रंध्रांतेकुलंध्यात्वागुरुंस्मरेत्॥ प्रह्लादानंदनाथाख्यंसमकानंदमेवच॥ कुमारानंदनाथाख्यंवसिष्ठानंदनाथकं॥ बोधानंदंज्ञानानंदंध्या
नानंदमतःपरं॥ क्रोधानंदंततःपश्चाद्ध्यायेत्कुलोमुखोपरि॥ महारसरसोन्मादहृदयानंदलोचनाः॥ कुलालिंगनसंभिन्नमोचिताशेषता
मसाः॥ कुलशिष्यैःपरिवृताःपूर्णांतःकरणाद्यताः॥ वराभययुताःसर्वेकुलतंत्रार्थवादिनः॥ एवंध्यात्वाकुलगुरून्विसृज्यकुलमातृकां॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

कुलस्थानेसमानी। यन्मूलंचशक्तिमानतः ॥ जप्त्वाजपंसमर्प्याथस्नानार्थंतीर्थमाश्रयेत् ॥ शांतंकुलगुरुंवत्सलंकिलसुखावहं ॥ रहस्यमङ्कुतंप्रो
क्तंगोप्यंपशुसंकटे॥ कुलनाथंपरित्यज्ययेशांताः परसेविनः ॥ तेषांदीक्षाचयागश्चअभिचारायकल्पते ॥ तस्मात्सर्वप्रयत्नेनकुलिनंगुरुमाश्र
येत् ॥ कुलिनःसर्वविद्यानामधिकारीनिगीयते ॥ दीक्षाप्रभुःसएवात्मासर्वमंत्रस्यपारगः ॥ अन्यच्चश्रुतौ ॥ प्रकाशमानांप्रथमेप्रयाणेप्रतिप्रया
णेप्यमृतायमानां ॥ अंतःपदव्यामनुसंचरंतीमानंदरूपाममलांप्रपद्येइति ॥ अहंदेवीनचान्योस्मिब्रह्मैवाहंनशोकभाक् ॥ सच्चिदानंदरूपोह
मात्मानमितिचिंतयेत् ॥ प्रातःकृत्यंचावश्यकमेवमन्यथानिंदाश्रवणात् ॥ तदुक्तंयामले ॥ प्रातःकृत्यमकृत्वातुयोदेवींभक्तितोर्चयेत् ॥ तस्य
पूजाचविफलाशौचहीनायथाक्रियेति ॥ ॐ तत्सत् ॥ बहिर्निर्गत्यकुलवृक्षान्नत्वादंतधावनादिकंकृत्वाच ॥ कुलवृक्षायथा ॥ श्लेष्मातककं
रंजाख्यनिंबाश्वत्थकदंबकाः ॥ बिल्वोवटोथशोकाख्यइत्येतेकुलपादपाः ॥ क्लीं कामदेवायसर्वजनप्रियायनमः ॥ अथनद्यादौगत्वाका
लिकारूपंसर्वंविभाव्यसुवर्णरजतात्मकंकुलदर्भमनामिकातर्जन्योर्धृत्वामूलंस्मरन्मलापकर्षस्नानंकृत्वाचम्य ॥ अद्येत्यादिकुलदेवता
प्रीतयेस्नानमहंकरिष्यइतिसंकल्प्यजलेत्रिकोणंचक्रंविलिख्यसूर्यमंडलादंकुशमुद्रयाक्रोमितितीर्थमावाह्यमूलांतेभ्रांस्मितत्त्वायस्वा
हाविद्यातत्त्वाय॰शिवतत्त्वायस्वाहेत्याचामेत् ॥ अथवा ॥ ॐ ह्रीं स्वाहेतित्रिधाचम्यात्मानंत्रिःसंप्रोक्ष्यमूलेनमृत्तिकायांगलेपनंकृत्वामू
लंपठन्कुंभमुद्रयाशिरसित्रिर्जलेनाभिषिंच्यांगुलीभिःश्रोत्रादीनिसप्तच्छिद्राणिसंनिरुध्यत्रिर्निमज्जेत् ॥ तदुक्तंनीलतंत्रे ॥ मृत्कुशा
नपिसंगृह्यगत्वाजलांतिकंततः ॥ मलापकर्षणंस्नात्वामंत्रस्नानंसमाचरेत् ॥ विद्ययात्रिर्निमज्जेवमूलेनमनुनाथवा ॥ कुलचूडामणौ ॥
कृष्णारक्तहरिन्नीलाविविधाममसूर्तयः ॥ नत्वाः कुजैःलेशिष्यःसतद्रूपंपरामृशन् ॥ दिवंसर्वामथोवक्षेचपातालंभ्रुतसंभवं ॥ आचांतः
कुलधर्मेणसदर्भःकुलपुंडकः ॥ तर्जन्यारजतंधार्यंस्वर्णंधार्यमनामया ॥ एषएवकुशःप्रोक्तोनकुशावनसंभवः ॥ कुलपात्रेसहस्वाच
सतिलंसजलंततः ॥ गृहीत्वाकुलदेवस्यप्रीतयेस्नानमाचरेत् ॥ कृतसंकल्पएवासौकुलचक्रंजलेन्यसेत् ॥ कुलस्थानात्समानीयकु ३

लमुद्रांकुशेनच ॥ कुलतीर्थानितत्रैवसमावाह्यशिवात्मकं ॥ तत्तोयंचत्रिधापीत्वात्रिधाचप्रोक्षणंतनोः ॥ अंकुशमुद्रायथाज्ञानार्णवे ॥ मु
ष्टिंबध्वादक्षकरेतर्जन्यंकुशरूपिणी ॥ अंकुशाख्यामहामुद्रात्रैलोक्याकर्षणक्षमा ॥ तीर्थावाहनंयथाश्रीक्रमे ॥ गंगेचयमुनेचैवगोदावरिस
रस्वति ॥ नर्मदेसिंधुकावेरिजलेस्मिन्संनिधिंकुरु ॥ स्वतंत्रे ॥ मूलंपठन्मूर्ध्नितोयंमुद्रयाकुंभसंज्ञया ॥ क्षिप्त्वावारत्रयंदेविआचमेत्साधकाग्र
णीः ॥ आत्मविद्याशिवैस्तत्त्वैस्ततोयागगृहंविशेत् ॥ कुंभमुद्रायथाज्ञानार्णवे ॥ दक्षांगुष्ठेपरांगुष्ठंक्षिप्त्वाहस्तद्वयेनतु ॥ सावकाशांमि
कांमुष्टिंकुंभमुद्रांविदुर्बुधाः ॥ अन्यच्च ॥ नवच्छिद्राणिसंरुध्यमतोमज्जेत्त्रिधासुधीः ॥ आत्मविद्याशिवैस्तत्त्वैराचमेत्साधकाग्रणीः ॥ वे
दाद्यंचततोमायांसमुच्चार्यततःपुनः ॥ वह्निजायांपरेदत्वाशुद्धेनपाथसापिवा ॥ ॐ मणिधारिणिवज्रिणिमहाप्रतिसरेरक्ष २ हुंफट्
स्वाहेतिशिखाबंधनं ॥ मूलेनतिलकंकृत्वासर्ववदाचम्यवैदिकींसंध्यांविधायतांत्रिकींसंध्यांकृत्वातर्पणंकुर्यात् ॥ तदुक्तंकुमारीतं
त्रे ॥ प्रणवंपूर्वमुद्धृत्यमणिधारिणीतिच ॥ वज्रिणीतिपदंप्रोक्तंमहाप्रतिसरेतथा ॥ रक्षद्वयंततोहुंफट्स्वाहाचतदनंतरं ॥ अनेनैवचमं
त्रेणरक्षांकुर्याद्विचक्षणः ॥ रक्षामितिशिखाबंधनरूपां ॥ शिखाभावेवस्त्रांचलेग्रंथिंकुर्यात् ॥ शारदातिलकायांच ॥ उक्तेनैवप्रकारेणस्ना
त्वास्नानंतुतांत्रिकं ॥ वैदिकींतांत्रिकींसंध्यांकृत्वातर्पणमाचरेत् ॥ तांत्रिकीसंध्यायथाभीमक्रमतंत्रे ॥ पुनराचम्यविन्यस्यषडंगमपि
मपिमंत्रवित् ॥ वामहस्तेजलंगृह्यगलितोदकबिंदुभिः ॥ सप्तधाप्रोक्षणंकृत्वामूर्ध्निमंत्रंसमुच्चरन् ॥ अवशिष्टोदकंदक्षेहस्तेसंगृह्यबु
द्धिमान् ॥ इडयाकृष्यदेहांतःक्षालितंपापसंचयं ॥ कृष्णवर्णंततुजलंदक्षनाड्याविरेचयेत् ॥ दक्षहस्तेतुतन्मंत्रीपापरूपंविचिंत्यच ॥
पुरतोवज्रपाषाणेप्रक्षिपेदस्त्रमंत्रतः ॥ ततोहस्तंप्रक्षाल्यंचाचम्यगुरुंतर्पयेत् ॥ यथा ॥ ॐ अमुकानंदनाथभैरवस्सशक्तिकस्तृप्य
तामितित्रिःसकृद्वादिव्यसिद्धमानवौघगुरून्संतर्पयेत् ॥ ततोजलेयंत्रंविभाव्यतत्रदेवीमावाह्यस्वाहांतमूलांतेमहाकालसहितदक्षि
णाकालिकामातातृप्यतां ॥ इतिसंतर्प्यैकैकांजलिनापरिवारान्संतर्पयेत् ॥ सशक्तिसायुधसवाहनसपरिवारमहाकालसहिताश्री

दक्षिणाकालिकामातातृप्यतामितिसंतर्प्य दूर्वाक्षतरक्तचंदनजपापुष्पादिनार्घ्यनिर्माय ह्रीं हंसः श्री मार्तंडभैरवाय प्रकाशशक्तिसहिता
यएषोर्घः स्वाहेतित्रिरर्घं कुलसूर्याय दत्वा सूर्यमंडले देवीं विभाव्य पूर्ववदर्घं दत्वा देवीगायत्रीमुच्चार्य एषोर्घो महाकालसहितायै श्रीमद्द
क्षिणाकालिकायै स्वाहेत्यर्घं दत्वा गायत्रीं यथाशक्ति प्रजप्य देवी हस्ते समर्पयेत्॥ तदुक्तं यामले॥ तर्पणादौ प्रयुंजीत तृप्यतां ब्रह्मभैरवः॥ आ
वाहनेपि स्वपितॄन् भैरवानिति कीर्तयेत्॥ तत्र भैरवरूपं च देवीमपि त्वकालिकां॥ माता तु कालिका काली पिता भैरव तृप्यतां॥ एवमेव वि
धानेन यथाशक्त्या च तर्पयेत्॥ मार्कंडभैरवायेति त्रिधा चार्घ्यं प्रकल्पयेत्॥ तदुक्तं कुलचूडामणौ॥ कुलसूर्याय देवाय त्रिधा चार्घ्यं प्रक
ल्प्य च॥ देवान् ऋषीन् पितॄंश्चैव तर्पयेत् कुलवारिणा॥ नंदिकेश्वरसंहितायां॥ यावन्न दीयते चार्घं भास्कराय निवेदितं॥ तावन्न पूजयेद्विष्णुं शं
करं वा सुरेश्वरीमिति॥ अन्यच्च॥ तर्पणादौ प्रयुंजीत तृप्यतां ब्रह्मभैरवः॥ आवाहनेष्वपि पितॄन् भैरवादीन् प्रकीर्तयेत्॥ तत्र भैरवरूपेण देवी
मपि च कालिकां॥ तृप्यतां कालिकामाता॰ प्रकल्पयेत्॥ तंत्रांतरे॥ दिनेशाय क्षिपेत् त्रिघ्नं वारिणा चांजलित्रयं॥ अष्टोत्तरशतावृत्त्या गा
यत्रीं प्रजपेत् सुधीः॥ देव्युवाच॥ गायत्री या पुरा प्रोक्ता देवदेव जगत्प्रभो॥ असितायाः प्रकारस्तु ध्यानं पूजां तथैव च॥ साधनं च महादेव
यथा दृष्टं मम प्रभो॥ शिव॰ गायत्री या पुरा प्रोक्ता ब्रह्मज्ञानस्वरूपिणी॥ श्रीकृष्णस्तु ऋषिश्चास्य गायत्री छंद उच्यते॥ शिवभक्तिस्वरूपा
हि देवता परिकीर्तिता॥ मायाबीजं कूर्चशक्तिः कर्पूरं कीलकं मतं॥ ध्यानं पुरस्क्रियां चैव शृणुष्व प्राणवल्लभे॥ श्मशाने तु महाकालीं ध्या
येद्देवीं दिगंबरां॥ दंष्ट्राकरालवदनां मुंडमालाविभूषितां॥ दक्षिणोर्ध्वे धनुर्दत्तं वामे चैवं तथा शरान्॥ अधः पाशं च खड्गं च क्रमाच्च परिकी
र्तितं॥ एवं ध्यात्वा महाकालीं जपेल्लक्षचतुष्टयं॥ रुधिराक्तैर्बिल्वपत्रैर्लक्षदशांशेन होमयेत्॥ साधनं च महादेवि पूर्ववत्समुपाचरेत्॥
गायत्री कुमारीतंत्रे॥ कालिकायै पदं प्रोच्य पश्चाद्धे तदनंतरं॥ श्मशानवासिनी ङे॰ तं धीमहीति ततो वदेत्॥ तन्नो घोरे पदं प्रोच्य प्रचो
दयात् सठे यापि॥ अस्याः पठनमात्रेण महापातककोटयः॥ सद्यः प्रलयमायांति साधकस्य न चान्यथा॥ रावणस्य वधाच्चैव रामचंद्रो वि

मोचितः॥ आत्मकन्याकर्षणाच्च ब्रह्मापि च विमोचितः॥ मातृवधात् भृगुरामो निश्चयेन विमोचितः॥ सुरापानाच्च श्रीकृष्णो दत्तात्रेयस्त
थैव च॥ एवमेषा महाविद्या गोप्तव्या देवि सुंदरि॥ महापातकयुक्तोपि प्रजपेद्दशधा यदि॥ सत्यं सत्यं महादेवि मुक्तो भवति तत्क्षणात्॥
कुलचूडामणौ॥ उत्थाय कुलवस्त्रे द्वे परिधाय कुलेन च॥ तिलकं कुलरूपं च कृत्वा चाभ्यकुलेश्वरं॥ स्वतंत्रे च॥ मोक्षार्थी रक्तवस्त्रे च भो
गार्थी श्वेतवाससी॥ मारणे कृष्णवस्त्रे तु वश्ये पीते सदा गृही॥ उच्चाटने व्याघ्रचर्म वृक्षत्वक् स्तंभकर्मणि॥ परिधाय ततो मंत्री यागस्था
नमथाविशेत्॥ तंत्रांतरेपि॥ ततश्च साधकश्रेष्ठो हृदि मंत्रपरामृशन्॥ अबहिर्मानसो योगी यागभूमिमथाविशेत्॥ जलशंखं करे कृत्वा
गत्वा द्वारि महेश्वरि॥ क्षालये द्धस्तपादौ च वक्ष्यमानेन वर्त्मना॥ कुमारीकल्पेपि॥ ॐ वज्रोदिके ऊं फट् स्वाहा मंत्रेण मंत्रवित्॥ मुंडमालायां॥
नदीतीरे बिल्वमूले श्मशाने शून्यवेश्मनि॥ एकलिंगे पर्वते वा देवागारे चतुष्पथे॥ शवस्योपरि मुंडे वा जले वा कंठपूरिते॥ संग्रामभूमौ यो
नौ वा स्थले वा विजने वने॥ जलमानी यस्तथेतु आसनं शोधयेत्ततः॥ प्रणवं पूर्वमुद्धृत्य लज्जाबीजं तथैव च॥ ततो विशुद्ध शब्दांते धर्मगो
त्रितयः परं॥ सर्वशब्दं समुच्चार्य पापानि शमय त्विति॥ अशेषांते विकल्पं स्यादपनय त्वतः परं॥ कूर्चयुग्मं भवेन्मंत्रः पादः प्रक्षालने प्रिये॥
यागस्थानं फेत्कारी ययथा॥ एकलिंगे श्मशाने वा शून्यागारे चतुष्पथे॥ तत्रस्थः साधके योगी विद्यां त्रिभवनारिणीं॥ पंचक्रोशांतरे यत्र
न लिंगांतरमीक्षते॥ तदेकलिंगमाख्यातं तत्र सिद्धिरनुत्तमा॥ तदुक्तं वीरतंत्रे॥ शून्यागारे श्मशाने य दिजपति जनस्त्वेकलिंगे तडागे गं
गागर्भे गिरौ वा शुचिविमलमतिः सर्वदा भक्तियुक्तः॥ विद्यां श्रीनीलवाण्या निखिलजनपतिः सर्वशास्त्रार्थवेत्ता देहांते योगिमुख्यः
परमशिवपदं ब्रह्मनिर्वाणमेति॥ नीलसारस्वतंतंत्रोपलक्षणं॥ तदुक्तमक्षोभ्यसंहितायां॥ वीरो यः कालिकायोगात्स्यात्त्रे वृसमाचरे
त्॥ योगाः प्रयोगाः॥ अन्यत्रापि॥ उज्जटे पर्वते वापि निर्जने वा चतुष्पथे॥ देवागारे देवशून्ये बिल्वमूले नदीतटे॥ स्वगृहे निर्जनारामे त
था चाश्वत्थसंनिधौ॥ शवस्योपरि मुंडे वा जले वा कंठपूरिते॥ संग्रामभूमौ योनौ वा स्थले वा विजने वने॥ यत्र कुत्र स्थले रम्ये यत्र वा स्या

भनोलयः॥ एषामन्यतमं स्थानं समाश्रित्य जपं चरेत्॥ ॐ वज्रोदके हुं फट् स्वाहा अनेन जलं सव्यमानीयासनमभ्युक्ष्योपविश्य॥ ॐ ह्रीं वि
शुद्धधर्म गात्रि सर्वपापानि शमय अशेषविकल्पमपनय हूं हूं अनेन हस्तौ पादौ प्रक्षाल्य पूर्ववदाचम्य सामान्यार्घ्यं कृत्वा गृहद्वारं प्रोक्ष्य
द्वारदेवताः पूजयेत्॥ तदुक्तं तंत्रांतरे॥ तत्र आचमनं कृत्वा सामान्यार्घ्यं निवेदयेत्॥ त्रिकोणवृत्तभूबिंबमंडलं रचयेत्ततः॥ आधारशक्तिं
संपूज्य तत्राधानं विनिक्षिपेत्॥ अस्त्रेण पात्रं संप्रोक्ष्य हन्मंत्रेण प्रपूरयेत्॥ निक्षिपेत्तीर्थमावाह्य गंगादि प्रणवेन तु॥ दर्शयेद्धेनुमुद्रां वै सामा
न्यार्घ्यमिदं स्मृतं॥ सामान्यार्घ्येण देवेशि प्रोक्षयेद्द्वारदेहलीं॥ धेनुमुद्रा यथा॥ अन्योन्याभिमुखाश्लिष्टकनिष्ठानामिके पुनः॥ तथा च तर्ज
नीमध्ये धेनुमुद्रामृतप्रदा॥ द्वारदेवता स्वतंत्रे॥ गणेशं क्षेत्रपालं च बटुकं योगिनीस्ततः॥ गंगां च यमुनां चैव लक्ष्मीं वाणीं ततो यजेत्॥
विशेषमाह॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही चेंद्री चामुंडा महालक्ष्मी स्तथैव च॥ कुलीनस्य द्वारदेव्यः कथितास्त
व पुत्रक॥ कुमारीकल्पे॥ गां द्वौ आद्यं गणेशं च वामाद्यं बटुकं तथा॥ क्षामाद्यं क्षेत्रपालं च यामाद्यं योगिनीस्तथा॥ ऊर्ध्वं वामे दक्षिणे च अ
धश्चैव प्रपूजयेत्॥ गमाद्यां पूजयेद्गंगां यमाद्यां यमुनां तथा॥ श्रीमाद्यां वै महालक्ष्मीं एमाद्यां च सरस्वतीं॥ पूजयेत्क्रमतः कोणचतुष्
षु समाहित इति॥ अथ पूजाकर्म॥ द्वारोर्ध्वे गां गणेशाय नमः॥ वामे क्षां क्षेत्रपालाय॰ दक्षिणे बां बटुकाय॰ अधो यां योगिनीभ्यो॰
गं गंगायै॰ यं यमुनायै॰ श्रीं महालक्ष्म्यै॰ ऐं सरस्वत्यै॰ इति पूर्वादिकोणचतुष्टये संपूज्य॥ वामांगे संकोचेन गृहं प्रविश्य नैर्ऋत्यां ब्रह्म
णे॰ वास्तुपुरुषाय नम इति संपूज्य सिद्धार्थाक्षततिलैर्भूतानुत्त्रासयेत्॥ तदुक्तं स्वतंत्रे॥ भूमिव्योमस्थितान्सर्वान्विघ्नहेतून्महाक्षतैः॥
अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया इति॥ अन्यत्रापि॥ भूतासमर्पणं कुर्यान्मंत्रेणानेन सा
धकः॥ यस्मिन्स्थाने कृते भूताः प्लुवयंति सुरार्चने॥ स्थितेषु सर्वभूतेषु नैव यंमंडलं तथा॥ विलुंपंति सदा लुप्तानत्तव्यं ति च देवताः॥ त
स्माद्यत्नेन कर्तव्यं भूतानामपसारणं॥ कुमारीकल्पे॥ प्रणवं पूर्वमुद्धृत्य सर्वविघ्नान्स्ततः परं॥ उत्सारयततो हुं फट् स्वाहा च तदनंतरं॥

अनेनैव च मंत्रेण विघ्नमुत्सारयेत्ततः॥ ॐ सर्वविघ्नानुत्सारय हुं फट् स्वाहेत्यनेन सिद्धार्थाक्षततिलैर्नानाच मुद्रया भूतापसारणं कृत्वा॥ मुष्टि
निःसृतजलेन भूमिशोधनं कुर्यात्॥ अनेन मंत्रेण॥ ॐ क्षैं रक्षैं रे हुं फट् स्वाहेति भूमिशोधनी॥ ॐ पवित्र हुं हुं फट् स्वाहेति भूमिमभिमंत्र्यास
नं स्थापयेत्॥ ॐ तदुक्तं कुमारीकल्पे॥ प्रणवं पूर्वमुद्धृत्य रक्ष रक्ष ततः परं॥ हुं फट् स्वाहेति मंत्रेण भूमिं च परिशोधयेत्॥ ततः पवित्र वज्रा
रे प्रणवं पूर्वमुद्धरेत्॥ वर्म द्वयं ततश्चैव फट् स्वाहा तदनंतरं॥ अनेनैव च मंत्रेण कुर्याद्भूम्यभिमंत्रणं॥ अथासनानि॥ तदुक्तं मत्स्यसूक्ते॥ मृदु
चूडकमासीनश्चान्यं नुको मलं पिवा॥ विष्टरं च समाश्रित्य साधयेत्सिद्धिमुत्तमां॥ मृद्वादि लक्षणमाह तत्रैव॥ अर्वाक्कृष्णभास्तेरो गर्भच्युत
माकृमृदु बुधाः॥ चूडोपनयने हीनं मृतं चाचूडकं विदुः॥ निरस्तचूडको बालो हीनोपनयनः पुमान्॥ यो मृतः पंचमे वर्षे तमेव कोमलं वि
दुः॥ स्वतंत्रे च॥ कंबले लोहिते वापि कृष्णे वा व्याघ्रचर्मणि॥ संन्यासी ब्रह्मचारी च कृष्णसारस्य चर्मणि॥ अन्यत्रापि॥ कृष्णसारं द्विपि चर्म
अचूडकं कंबलं तथा॥ पीतवस्त्रं च शुक्लं वा आसनाय प्रकल्पयेत्॥ विष्टरं यथा॥ प्रोतं तु विस्तृतं वापि अथवा कुंडलीकृतं॥ आसनफलं यथा
यामले॥ पृथिव्यां दुःखसंतापो दारिद्र्यं दारुजासने॥ वस्त्रासने रोगशोकौ पाषाणे बलहानिरं॥ कृष्णाजिने धनं पुत्रं कुशेषु पौरुषयशः॥ का
म्यार्थं कंबले चैव अभीष्टं रक्तकंबलेति॥ अत्र मृतासनमवश्यमेव तदकरणे प्रत्यवायश्रुतिः॥ तदुक्तं वीरतंत्रे॥ मृतासनं विना देवि योजपे
त्कालिकां पुनः॥ ताव त्कालं नारकी स्याद्यावदाभूतसंप्लवं॥ यत्तु स्वतंत्रादौ॥ कंबलमासनमुक्तं तत्तु नस्वतंत्रासनं किं तु वैशेन्नृप विष्टरमि
ति बोद्धव्यं॥ तदुक्तं कालीकल्पे॥ मृताभावे विष्टरं च शववद्रूपं प्रकल्पयेत्॥ इति॥ अथ विष्टरमाह॥ तत्र कुशप्रमाण आह॥ रुद्रकालानले॥
पंच पात्राणि यस्मिन्वै स कुशस्त्वभिधीयते॥ अन्यच्च॥ त्रीणि पत्राणि यस्मिन्वै स कुशस्त्वभिधीयते॥ तंत्रराजे॥ उत्तरार्धे॥ कुशपत्रेशतेनैव
विष्टरं कारयेद्बुधः॥ जीवंन्यासं ततः कृत्वा तस्योपरि जपं चरेत्॥ हस्तपादे दश दश अंगदिता मूर्ध्नि द्वे कर्णयोश्च जीवे लिंगे मुखकमलयो द्विकूस
मस्तेषु देहे॥ इत्येवं शवरूपं साधनवरं कुर्वंति देवासुरास्ते धन्याः कृतपुण्यसिद्धचरणा देवा महेशादयः॥ तंत्रेस्मिन्नुगदितो मया विधिरयं देव्याः
रूपाप्रिरणात्॥ अथ सुरेखे वज्ररेखे हुं फट् स्वाहेति भूमौ त्रिकोणमंडलं कृत्वा तत्राधारशक्त्यादिभ्यो नम इति संपूज्य तत्र शवाभावे कंबला

यासनंसंस्थाप्यतदुपरिशिवरूपीभूत्वा स्थिरं कृत्वाकृतांजलिः पठेत्॥ तदुक्तं तंत्रांतरे॥ भूमौत्रिकोणमालिख्यधारशक्त्यादिपूजनं॥ मेरुपृष्ठ
ऋषिःप्रोक्तःसुतलंछंदईरितं॥ कूर्मोत्रदेवताचैवआसनारोपणेप्रिये॥ विनियोगश्चकथितःपठेदुत्वासनंततः॥ पृथ्वीत्वयाधृतालो
कादेवित्वंविष्णुनाधृता॥ त्वंचधारयमांदेविपवित्रंकुरुचासनमिति॥ धृत्वासनंतुदेवेशिकुशांतेत्रवदापयेत्॥ मायाबीजंसमुच्चार्यआधार
शक्तिमुच्चरेत्॥ कमलासनमालिख्यडेनमोंतंप्रपूजयेत्॥ कुमारीकल्पे॥ ॐकारांतंसुरेरवेचवज्जलेरेवततः परं॥ ऊंफट्स्वाहेतिकुर्यी
द्भूमंडलंतुशवासने॥ वीरासनेनोपविशत्संपूज्यासनमेवच॥ एवंविधिनासनंसंस्थाप्यपद्मस्वस्तिकवीरासनेनासनेउपविश्यकाम
क्षाशामुखोविजयांस्वीकुर्यात्॥ चूडामणौ॥ विनाहेतुकमास्वाद्यक्षोभयुक्तोमहेश्वरः॥ नकुर्यान्ममपूजांचनध्यानविधिचिंतनं॥ तस्माद्
स्काचपीताचपूजयेत्परमेश्वरी॥ विजयाकल्पेपि॥ संविदासवयोर्मध्येसंविद्देविगरीयसी॥ संविद्योगस्तेनादौपूजायांसाधकोत्त
मैः॥ कर्तव्याचमहापूजाकरणीयासुनंदितैरिति॥ अन्यत्रापि॥ आनंदेनविनाभ्रंशोनचतृप्यंतिदेवताइति॥ तस्मात्पूजादौअवश्यंविजया
स्वीकारः साचतुर्धाब्राह्मणीक्षत्रियावैश्याशूद्राचश्वेतरक्तपीतकृष्णपुष्पभेदात्॥ तासांशुद्धिक्रमोलिख्यते॥ तदुक्तंविजयाकल्पे॥ मे
विदेब्रह्मसंभूतेब्रह्मपुत्रिसदानघे॥ भैरवाणांचदत्तात्वंपवित्राभवसर्वदा॥ ॐब्राह्मण्यैनमस्वाहेतिमंत्रेणशोधयेत्॥ सिद्धिमूलक्रियेदेवि
ज्ञानबोधप्रबोधिनि॥ राजाप्रजावश्यकरिशत्रुकंठत्रिशूलिनि॥ ऐंक्षत्रियायैनमःस्वाहा॥ अज्ञानेंधनदीप्ताग्नेज्वालेविज्ञानरूपिणि॥ आ
नंदस्याहुतिंसम्यक्ज्ञानंदेविप्रयच्छमे॥ क्लींवैश्यायैनमःस्वाहा॥ नमस्यामिनमस्यामियोगमार्गप्रदर्शिनि॥ त्रैलोक्यविजयेमातःसमाधिफ
लदाभव॥ क्लींशूद्रायैनमःस्वाहाकथितोमंत्रउत्तमः॥ ॐअमृतेअमृतोद्भवेअमृतवर्षिणिपदंततः॥ अमृतमाकर्षयद्वंद्वंसिद्धिंदेहिततः
परं॥ अमुकंमेततोब्रूयाद्वशमानयतत्परं॥ द्विठांतोयंमनुःप्रोक्तश्चतसृणांचशोधने॥ उत्तरतंत्रेच॥ मूलमंत्रंसप्तवारंतस्योपरिनियोजयेत्॥ ६
आवाहनादिमुद्राश्चधेनुयोनिततःपरं॥ सप्तधातर्पयेद्ब्रह्मरंध्रेमूलंजपन्मनुं॥ गुरुंपद्मेसहस्रारेतथासंकेतमुद्रया॥ त्रिधैवतर्पयेत्कन्या

Dr. BHAU DAJI MEMORIAL

साधकः सिद्धिमानसः॥ ऐंवदवदततोब्रूयाद्वाग्वादिनिपदंततः॥ ममजिह्वाग्रेस्थिरीभवसर्वदेतिपदंतथा॥ सर्ववशंकरिस्वाहेतिमंत्रेणजुहु
यान्मुखे॥ संकेतमुद्रयातत्वमुद्रयाएवंविधिनाविजयांस्वीकृत्यानंदमयोभूत्वावामकर्णेऐंअमुकानंदनाथश्रीगुरुपादुकाभ्योनमः॥ दक्षिणक
र्णोर्ध्वेगंगणपतयेनमः॥ मध्येइष्टदेव्यै॰ इतिनमस्कृत्यपूर्ववत्सामान्यार्घ्यंकृत्वातेनोदकेनपूजोपकरणंचाभ्युक्ष्यस्वदक्षिणेगंधपुष्पादिकंवा
मेसुगंधिजलंदेवतायाः पश्चिमेकुलद्रव्याणिअन्यत्पात्रंचवामेधारयेत्॥ कुलचूडामणौच॥ कुलासनंततःक्षिप्त्वातदभ्यर्च्ययथासुखं॥ कु
लासनंततोबध्वागुरुपूजाक्रमेणतु॥ आत्मशुद्धिर्भूतशुद्धिर्देहशुध्यादिभैरव॥ कृत्वाचार्घ्यंततोविद्यांकुर्यात्कुलविचेष्टितं॥ दीक्षिताभिःकुली
नाभिर्सुवनीभिःकुलात्मभिः॥ देवतागुरुभक्ताभिःसंवितंयागभूमिषु॥ नानाविधानिपुष्पाणिगंधानिविविधानिच॥ कर्पूरजातीधूपादिवासितं
पट्टवासितं॥ तांबूलंदेवद्रव्यंचधूपदीपादिकंचयेत्॥ सर्वालंकारभूषाभिर्भूषितःकौलिकेश्वरः॥ मूलमंत्रजपस्तोत्रैःप्रोक्षितंस्थापयेत्ततः॥
सर्वस्वदक्षिणेस्थाप्यवामेचार्घ्यंनिवेदयेत्॥ पश्चिमेदेवतायाश्चकुलद्रव्याणिधारयेत्॥ पश्चिमेपृष्ठतइत्यर्थः॥ तदुक्तं॥ स्थापयेद्दक्षिणेभागे
पूजाद्रव्याणिचात्मनः॥ सुवासितांबुसंपूर्णंसव्येकुंभंसुशोभनं॥ प्रक्षालनायकरयोःपात्रपृष्ठेनिवेशयेत्॥ कालिकापुराणे॥ [illegible]मांपृच्छतो
दद्यादन्यत्सर्वंचवामतः॥ कुलार्णवे॥ आत्मस्थानमनुद्रव्यदेवशुद्धिंतुपंचमी॥ यावन्नकुरुतेदेवितावद्देवार्चनंकुतः॥ पंचशुद्धिंविनापूजाअ
भिचारायकल्पते॥ सुस्नानैर्भूतशुद्धिश्चप्राणायामादिभिःप्रिये॥ षडंगान्यखिलन्यासैरात्मशुद्धिरितीरिता॥ संमार्जनानुलेपाद्यैर्दर्पणो
दरवत्शुभावितानधूपदीपादिपुष्पमालादिशोभितं॥ पंचवर्णरजोभिश्चस्थानशुद्धिरितीरिता॥ ग्रथित्वामातृकावर्णैर्मूलमंत्राक्षराणिच॥ क्र
मोत्क्रमोद्विनाहत्यामंत्रशुद्धिरियंमता॥ पीठदीवींप्रतिष्ठाप्यसकलीकृत्यमंत्रवित्॥ मूलमंत्रेणदीक्षाताअभिभाव्यादकेनच॥ त्रिवारं
प्रोक्षयेद्विद्वान्द्रव्यशुद्धिरितीरिता॥ पंचशुद्धिंविधायेत्थंपश्चाद्यजनमाचरेत्॥ पंचशुद्धिविहीनेनयत्कृतंनचतत्कृतं॥ पंचशुद्धिंविनापूजा
अभिचारायकल्पते॥ कुमारीकल्पे॥ अधिष्ठानेतुपुष्पस्यप्रणवंपूर्वमुद्धरेत्॥ शानाभिषेकेतिपदंसमयाप्रियेपदंततः॥ समाश्रियेपदं

प्रोच्यॐफट्स्वाहाततःपरं॥अनेनमनुनादेव्याःपुष्पाधिष्ठानमाचरेत्॥प्रणवंपुष्पकेतुंचराजार्हेतिपदंततः॥शातयिसम्यगित्युक्त्वासमृद्धा
यततःपरं॥ॐपुष्पेपुष्पेमहापुष्पेसुपुष्पेपुष्पसंभवे॥पुष्पचयावकीर्णेॐफट्स्वाहाचततःपरं॥विशुद्धंपुष्पमेतेनजलंपूर्ववदाचरेत्॥
अथवामपादपार्ष्णिघातत्रयंभूमौकृत्वाभूमाविघ्नान्निरस्यतर्जनीमध्यमाभ्यामूर्ध्वाधस्तालत्रयंदत्वांतरिक्षविघ्नान्निरस्यतर्जन्यंगुष्ठेनच्छो
टिकाभिर्दशदिग्बंधनंकृत्वादिव्यदृष्ट्यादिव्यविघ्नान्निरस्यचतुर्दिक्षुवह्निप्राकारंविचिंत्यप्राणायामत्रयंचरेत्॥स्वतंत्रे॥पार्ष्णिघातकरास्
फोटसमुद्वीक्षितवक्रमैः॥तालत्रयमथोदद्यात्सशब्दंसंप्रदायतः॥ऋतुचंद्रैर्नेत्रत्रयैरसैर्वेदाधिकैःप्रिये॥मात्राभिःप्रणवंजप्त्वापूररे
चककुंभकैः॥कुंभकांतःप्राणायामस्तुवैष्णवानांवानप्रस्थानांयतीनांनित्यः॥अन्येषांरेचकांतः॥तदाहकालीक्रमे॥मनोजीवात्मनो
शुद्धिःप्राणायामेनजायते॥कालीतंत्रेपि॥प्राणायामत्रयंकुर्यान्मूलेनप्रणवेनवा॥ज्ञानार्णवेपि॥कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं
मात्राभिःप्रणवंजप्त्वापूरकुंभकरेचके॥प्राणायामःसविज्ञेयस्तर्जनीमध्यमेविना॥मालालक्षणंमालिनीतंत्रे॥कनिष्ठामूलात्तर्जन्याम्
लांतेयुगपत्स्पृशेत्॥वामांगुष्ठेनमात्रायाल्लक्षणंपरिकीर्तितं॥इह मात्रासंमोहनतंत्रे॥जानुंप्रदक्षिणीकृत्यनद्रुतंनविलंबितं॥कारये
च्चांगुलिस्फोटंसामात्रापरिकीर्तिता॥स्वच्छंदसंग्रहे॥ह्रस्वस्वरोच्चारकालोमात्रेत्यभिधीयतइति॥प्राणायामत्रयंकृत्वाभूतशुद्धिंतत
श्चरेत्॥धर्मकंदसमुद्भूतंज्ञाननालंसुशोभनं॥ऐश्वर्याष्टदलोपेतंपरंवैराग्यकर्णिकं॥स्वीयंहृत्कमलंध्यायेत्प्रणवेनविकासितं॥सुषु
म्नावर्त्मनात्मानंपरमात्मनियोजयेत्॥योगयुक्तेनविधिनासोहंमंत्रेणसाधकः॥तत्रायंक्रमोमूलाधारेनमःसंयोज्यदक्षांगुष्ठेनद
क्षिणनासापुटंधृत्वामूलंप्रणवंवाषोडशवारंजपन्वामेनवायुमापूर्यकनिष्ठानामिकाभ्यांवामनासापुटंधृत्वातमेवचतुःषष्टिवारंजपन्
वायुंकुंभयित्वापुनर्द्वात्रिंशद्वारंजपन्वायुंरेचयेत्॥एवंक्रमोत्क्रमेणवारत्रयेकृतेएकःप्राणायामोभवति॥एवंवारत्रयंकुर्यादिति॥अथ ७
भूतशुद्धिः॥मूलात्कुंडलिनींहंसइतिमंत्रेणपृथिव्यासहस्वाधिष्ठानेसमानीयतत्रजलेपृथिवींलीनांविभाव्यतस्माज्जलेनसहमणिपूरेस

मानीयतत्रस्थाग्नौजलंलीनंविभाव्यतस्मादग्निनासहअनाहतेसमानीयतत्रस्थवायौअग्निंलीनंविभाव्यतस्माद्वायुनासहविशुद्धावानी
यतत्रस्थाकाशेवायुंलीनंविचिंत्यतस्मादाकाशेनसहाज्ञाचक्रेसमानीयतत्रस्थमनस्याकाशंलीनंकृत्वामनोनादेविलीनंविभाव्यनादं
ध्वनौध्वनिंसमर्पयेत्॥ततःसहस्रदलकमलकर्णिकास्थचंद्रमंडलमध्यगतत्रिकोणांतर्गतबिंदुरूपपरमशिवेसमर्प्य॥इत्यंगुष्ठाना
मिकाभ्यांतत्तत्स्थानस्पर्शरूपोन्यासः॥अपरब्रह्मरूपांतांमायाशक्तिंपरात्मनि॥प्रविलाप्यपरब्रह्मरूपेणस्थितःक्रियत्क्षणं॥अथपाप
पुरुषध्यानं॥ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयं॥सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं॥तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं॥
उपपातकरोमाणंरक्तश्मश्रुविलोचनं॥खड्गचर्मधरंकृष्णंकुक्षौवामेविचिंतयेत्॥ततः॥प्राणायामविधिनायमितिवायुबीजंधूम्रव
र्णंषोडशवारंजपन्शरीरंसंशोष्यरमितिवह्निबीजंरक्तवर्णंचतुःषष्टिवारंजपन्शरीरंसंदह्यवमितिवरुणबीजंशुक्लवर्णंसहस्रारे
विचिंत्यद्वात्रिंशद्वारंजपन्तदुद्भवामृतवृष्ट्यानिष्पापंशरीरमुत्पाद्यललाटस्थलमितिपृथ्वीबीजेनपीतवर्णेनशरीरंसुदृढीकृत्यसो
हमितिमंत्रेणकुंडलिनींअमृतलोलीभूतांपंचभूतानिजीवात्मानंचब्रह्मपथास्वेस्वेस्थानेनियोजयेत्॥संजातेनिर्मलेदेहेदेवतोपास
नक्षमे॥आत्मलीनानितत्त्वानिस्वस्थानंप्रापयेत्ततः॥पुनरुत्पादयेद्देहंपवित्रंपरमात्मनः॥सच्चिद्ब्रह्मात्मिकामायामातृकाप्रकृतिःप
रा॥अजायततत्तोमातुराकाशंनभसोनिलः॥समीरणाद्भवेद्वह्निर्वह्नेरापस्ततोमही॥स्वीयमेभ्योपिभूतेभ्यःस्वेजातंरूपंकलेवरं॥दे
वताराधनेयोग्यमुत्पन्नमितिचिंतयेत्॥तस्मिन्देहेपरात्मानंसर्वज्ञंसर्वशक्तिकं॥समस्तदेवतारूपंसर्वमंत्रयुतंविभुं॥आत्मरूपेण
देहेस्वेजीवभावेनतिष्ठति॥ततोदेवीरूपमात्मानंविभाव्यहृदिजीवन्यासंकुर्यात्॥आंह्रींक्रोंहंसःअमुष्यप्राणाइहप्राणाः॥आंह्रीं
क्रोंहंसःअमुष्याजीवइहस्थितः॥आंह्रींक्रोंहंसःअमुष्याःसर्वेंद्रियाणि॥आंह्रींक्रोंहंसःअमुष्याःवाङ्मनश्चक्षुश्रोत्रघ्राणप्राणा
इहागत्यसुखंचिरंतिष्ठंतुस्वाहेतिजीवंन्यसेत्॥तदुक्तंस्वतंत्रे॥संहारक्रमयोगेनपंचतत्त्वंसमुद्धरेत्॥शोषदाहाप्लवान्कृत्वावायाग्नि

सलिलाक्षरैः॥ततोन्यासंप्रकुर्वीततत्फेत्कारीतंत्रईरितं॥अन्यत्रापि॥देवीरूपंततोध्यायेदात्मानंकमलेक्षणे॥ततोबीजंप्रविन्यस्यपाशादि
त्र्यक्षरेणतु॥प्राणमंत्रेणयुक्तेनततोमुष्याः पदंततः॥प्राणइतिवदेत्पश्चादिहप्राणास्ततः परं॥अमुष्याजीवइहस्थितोमुष्याः पदंततः।
सर्वेइंद्रियाण्यमुष्याश्चवाङ्मनोनयनानिच॥श्रोत्रघ्राणपदात्प्राणइहागत्यसुखंचिरं॥तिष्ठंतुवह्निजायांतःप्राणमंत्रोयमीरितः॥प्रकारां
तरंचज्ञानार्णवे॥विपरीतंप्राणमंत्रंविलिखेत्पाशपूर्वकं॥प्राणप्रतिष्ठामंत्रोयंसर्वकार्याणिसाधयेत्॥अस्यमंत्रस्यांतेमुष्यइतिबोद्धव्यं॥
अमुष्यास्थानेसाध्यदेवतायाः षष्ठ्यंतंनामप्रोक्तं॥तदुक्तंनारायणीये॥अमुष्येतिपदंयत्रयत्रमंत्रेषुदृश्यते॥साध्यातिधानंतद्रूपंतत्रस्था
नेनियोजयेत्॥कुमारीकल्पेपि॥भूतशुद्धिंविधायेत्थंदेवीरूपेणचिंतयेत्॥प्रणवंपूर्वमुद्धृत्यशेषंलांगलमेवच॥ॐकारस्वाहामनुःप्रोक्तः
कायवाक्चित्तशोधने॥एवंभूतशुद्धिंकृत्वा ॐ आं क्रों कुं फट् स्वाहा॥इतिकायवाक्चित्तानिसंसोध्यात्मरक्षांकुर्यात्॥यथा॥प्रणवंपूर्व
मुद्धृत्यचात्मानंरक्षइत्यपि॥रक्षकुंफट्ततःस्वाहमंत्रस्यादात्मरक्षणे॥ॐ आत्मानंरक्षरक्षकुंफट्स्वाहा।अनेनमंत्रेणहृदिहस्तंदत्वात्म
रक्षांविधायस्ववामेशक्तिंसंस्थाप्यप्राणायामादिकंकुर्यात्।तदुक्तंकुमारीतंत्रे॥ततःषोडशवर्षीयांनानामानीयमंत्रवित्॥युवतींचे
मदोन्मत्तांसुवेषांचारुहासिनीं॥सदारतेसाभिलाषांसिंदूरांकितभालकां॥साधकश्चेयस्तत्तांवामेसंस्थापयेद्बुधः॥तस्यास्तुभूत
शुध्यादीन्कृत्वाविमातृकांन्यसेत्॥प्राणायामंततःकृत्वाकारयित्वायथाविधीति॥अथर्ष्यादिन्यासोयथ॥कृतांजलिः अस्यभैरव
ऋषिः॥उष्णिक्छंदः॥श्रीदक्षिणाकालीदेवता॥क्रींबीजंहूंशक्तिः॥क्रींकीलकंचतुर्वर्गसिद्ध्येविनियोगः॥इतिपुष्पेण
कायेनमनसावान्यसेत्॥भैरवायऋषयेनमः शिरसि॥उष्णिक्छंदसे॰ मुखे॥श्रीदक्षिणाकालिकायैनमोहृदि॥क्रींबीजाय॰गु
ह्ये॥हूंशक्तये॰पादयोः॥क्रींकीलकाय॰सर्वांगे॥तदुक्तंकालीतंत्रे॥भैरवोस्यऋषिःप्रोक्तउष्णिक्छंदउदाहृतं॥देवताका ८
लिकाप्रोक्तालिङ्गबीजंतुबीजकं॥शक्तिस्तुकूर्चबीजंस्यादनिरुद्धसरस्वती॥कवित्वार्थेविनियोगएवमृष्यादिकल्पना॥कील

कंचाद्यबीजंतुक्रमेणविन्यसेत्प्रिये॥ऋषिंन्यसेन्मूर्ध्निदेशेछंदस्तुमुखपंकजे॥देवतांहृदयेचैवबीजंतुगुह्यदेशके॥शक्तिस्तुपादयोश्चैव
सर्वांगेकीलकंन्यसेत्॥अथकरांगन्यासो॥ॐ क्रांअंगुष्ठाभ्यांनमः॥अंगुष्ठयोः॥ॐ क्रींतर्जनीभ्यांस्वाहातर्जन्योः॥ॐ क्रूंमध्यमाभ्यांव
षट्मध्यमयोः॥ॐ क्रैंअनामिकाभ्यांहुंअनामिकयोः॥ॐ क्रौंकनिष्ठिकाभ्यांवोषट्कनिष्ठिकयोः॥ॐ क्रःकरतलकरपृष्ठाभ्यां
फट्करतलकरपृष्ठयोः॥ॐ क्रांहृदयायनमोहृदि॥तर्जनीमध्यमानामिकाभिः॥ॐ क्रींशिरसेस्वाहाशिरसितर्जनीमध्यमाभ्यां॥ॐ क्रूं
शिखायैवषट्शिखायांमुष्टिबद्धेनाधोमुखेनांगुष्ठेन॥ॐ क्रैंकवचायहुंकवचेहस्ताभ्यामंगुलीभिः॥ॐ क्रौंनेत्रत्रयायवौषट्नेत्रत्रयेत
र्जनीमध्यमानामाभिः॥ॐ क्रःअस्त्रायफट्तर्जनीमध्यमाभ्यामूर्ध्वोत्थस्तालत्रयंदत्वादशदिग्बंधनंछोटिकाभिःकुर्यात्॥इतिकरां
गन्यासोतदुक्तंवीरतंत्रे॥दीर्घषट्कयुताद्येनप्रणवाद्येनकल्पयेत्॥विशेषोयथाकालीतंत्रे॥हृदयायनमःप्रोक्तंशिरसेवह्निवल्ल
भा॥शिखायैवषडित्युक्तंकवचायहुमीरितं॥नेत्रत्रयायवौषट्स्यादस्त्रायफट्प्रकीर्तितं॥स्वतंत्रेपि॥प्रणवंचाद्यबीजंचषु
द्दीर्घस्वरभाजितं॥कुर्यात्षडंगविन्यासंमूलंखंडत्रयेणवा॥एवंविधिनात्रिःसकृद्वामूलंखंडद्विरावृत्यावाषडंगन्यासंकुर्यात्॥तदुक्तंभैर
वतंत्रे॥षडंगानिन्यसेन्मंत्रीत्रिःसकृद्वायथाक्रमं॥अथवर्णन्यासोयथा॥अंआंइंईंउंऊंऋंॠंऌंॡंनमोहृदयेदन्यसेत्॥एंऐंओंऔंअं
अःकंखंगंघंङंनमोदक्षिणभुजे॥चंछंजंझंञंटंठंडंढंनमोवामभुजे॥णंतंथंदंधंनंपंफंबंभंनमोदक्षजंघायां॥मंयंरंलंवंशंषंसंहंक्षं
नमोवामजंघायां॥तदुक्तंकालीतंत्रे॥एवंयथाविधिन्यस्यवर्णन्यासंसमाचरेत्॥वर्णन्यासंप्रवक्ष्यामियेनदेवीमयोभवेत्॥अंआं
इंईंउंऊंऋंॠंऌंॡंचहृदयेन्यसेत्॥एंऐंओंऔंअंअःकंखंगंघंवर्णान्पुनस्ततः॥ङंचेरेदक्षिणभुजेन्यसेत्साधकःसत्तमः॥छंचंछं
जंझंञंटंठंडंढंचैवतथापुनः॥इतिवामभुजेन्यस्य॥णंतंथंदंपुनःस्मरेत्॥धंनंपंफंबंभंममितिदक्षिणेजंघकेन्यसेत्॥मंयंरंलंवंशं
षंसंहंक्षंवामपदेन्यसेत्॥ततोमातृकान्यासंकृत्वाश्रीकंठन्यासंकुर्यात्॥तदुक्तंस्वतंत्रे॥आदौतुमातृकान्यासस्ततःश्रीकंठउच्य

ते॥ मातृकान्यासो यथा॥ ऋषिर्ब्रह्मा भवेच्छंदो गायत्री मातृका पुनः॥ देवता व्यंजनं बीजं शक्तयस्तु स्वरास्ततः॥ अव्यक्तं कीलकं ज्ञेयं न्य
सेदुक्तक्रमेण तु॥ उक्तक्रमेण पूर्वोक्तन्यस्यादिक्रमेणेत्यर्थः॥ षडंगं मातृकायास्तु साधकः कारयेत्ततः॥ स्वराणां क्ली वही नानां सबिं
दूनां क्रमेण तु॥ युग्मयुग्मांतरालेन पंचवर्गसबिंदुकं॥ निक्षिप्याद्यं दिवर्गांतिशेषं वर्गांतरालके॥ क्ली वही नानामिति ऋॠऌॡरहिता
नामित्यर्थः॥ एवं विधिना मातृका षडंगं कृत्वा ध्यायेत्॥ ध्यायत्तां तारद्रूपां सकललिपिमयीं लोचनांभोजयुग्मां शुक्लालंकारभूषां शशि
मुकुटजटाजूटयुक्तां प्रसन्नां॥ पुस्तं स्तक्पूर्णकुंभान्वरमपि दधती शुक्लपद्मांबराढ्यां वाग्देवी पद्मवक्त्रां कुचभरनमितां चिंतयेत्सा
धकेंद्रः॥ एवं ध्यात्वा अकारादिक्षकारांतं न्यसेत्तथा॥ ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गंडयोः॥ ओष्ठदंतोत्तमांगास्यदोःपत्स
ध्यग्रकेषु च॥ पार्श्वयोः पृष्ठतो नाभौ हृदये जठरे सके॥ ककुद्यंसे च हृत्पूर्वं हस्तपादयुगेषु च॥ जठराननयोन्यस्येन्मातृकां तां यथा
क्रमात्॥ तत्र प्रयोगः॥ अंनमो ललाटे॥ आंनमो मुखवृत्ते॥ एवं क्रमेण मकारांतं विन्यस्य॥ यं त्वगात्मने नमः॥ रं असृगात्मने नमः
लं मांसात्मने॰ वं मेद आत्मने॰ शं अस्थ्यात्मने॰ षं मज्जात्मने॰ सं शुक्रात्मने॰ हं प्राणात्मने॰ ळं जीवात्मने॰ क्षं परमात्मने नमइ
ति न्यसेत्॥ इति पंचाशदक्षरन्यासक्रमेणायं प्रकाशितः॥ अं मायं नेनमोवासबिंदुर्बिंदुवर्जितः॥ मायालक्ष्मीबीजपूर्वो न्य
स्तव्यो मातृकाक्षरैः॥ मातृकान्यासमुद्रा यथा॥ ललाटेनामिकामध्ये विन्यसेन्मुखवृत्तके॥ तर्जनीमध्यमानामा विन्यसेन्नेत्रयु
ग्मयोः॥ अनामांगुष्ठयोगेनाद्वयाकर्णयोर्न्यसेत्॥ कनिष्ठांगुष्ठयोगेन नासापुटद्वये ततः॥ मध्यास्तिस्रो गंडयोश्च मध्यमामोष्ठ
योर्न्यसेत्॥ अनामां दंतयोर्न्यस्येन्मध्यमामुत्तमांगके॥ मुखेनामां मध्यमां च हस्तपादे च पार्श्वयोः॥ कनिष्ठानामिकामध्यास्तास्तु पृ
ष्ठे च विन्यसेत्॥ तांः सांगुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत्॥ हृदये च तले सर्वा अंसयोश्च ककुत्स्थले॥ हत्पूर्वं हस्तपादादिमुखे
षु तलमेव च॥ एतास्तु मातृकामुद्राः क्रमेण परिकीर्तिताः॥ अज्ञात्वा विन्यसेद्यस्तु न्यासस्तस्य निष्फलाः॥ श्रीकंठन्यासो यथा॥

विन्यसेन्मातृकास्थाने श्रीकंठादीन्यथाक्रमं॥ पूर्णोदर्यादिभिः सार्धं मातृकार्णसमन्वितान्॥ मूर्तिनामशक्तिनाम पृष्ठतो वंच कारयेत्॥ श्री
कंठानंतसूक्ष्माश्च त्रिमूर्तिरमरेश्वरः॥ अर्धीशो भारभूतिश्च अतिथिस्थाणुको हरः॥ झिंटीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः॥ अक्रू
रश्च महासेनः षोडशस्वरमूर्तयः॥ पश्चात्क्रोधीश चंडीश पंचांतक शिवोत्तमाः॥ तथैकरुद्र कूर्मैकनेत्रेश चतुराननाः॥ अजेशः सर्वशोमेश
स्तथा लांगलि दारुकौ॥ अर्धनारीश्वरश्चोमाकांतश्चाषाढिदंडिनौ॥ अत्रीशमीनमेषाश्च लोहितेशः शिखीशकौ॥ छगलंडो द्विरंडेशो मह
कालश्च वालिशः॥ भुजंगेशपिनाकीशौ खड्गीशाख्यौ बकस्तथा॥ श्वेतभृग्वीशनकुलीजीवाः संवर्तकस्तथा॥ एते रुद्राः स्मृता रक्ताः शूलश्शू
लकपालकाः॥ पूर्णोदरी स्याद्विरजा शाल्मली तदनंतरं॥ पूर्णोदरी स्याद्विरजा शाल्मली तदनंतरं॥ लोलाक्षी वर्तुलाक्षी च दीर्घघोणा समीरिता॥ सुदी
र्घमुखि गोमुख्यौ दीर्घजिह्वा तथैव च॥ कुंडोदर्यूर्ध्वकेशी च तथा विकृतमुख्यपि॥ ज्वालामुखी ततो ज्ञेया पश्चादुल्कामुखी ततः॥ सुश्रीमुखी विद्या
मुख्या वै नाश्च स्वरशक्तयः॥ महाकाली सरस्वत्यौ सर्वसिद्धिस्तथैव च॥ गौरी त्रैलोक्यविद्या स्यान्मंत्रशक्तिस्ततः परं॥ आदिशक्तिर्भूतमाता तथा लं
बोदरी मता॥ द्राविणी नागरी भूयः खेचरी चैव मंजरी॥ रूपिणी वीरिणी पश्चात्कोदर्यपि पूतना॥ स्याद्भद्रकाली योगिन्यौ शंखिनी गर्जिनी तथा॥ स्या
त्कालरात्रिकुब्जिन्यौ कपर्दिन्यपि वज्रिणी॥ जया च सुमुखेश्वर्यौ रेवती माधवी तथा॥ वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी॥ ततश्च सहजाल
क्ष्मी व्यापिनी मायया न्विता॥ एता रुद्रांकपीठस्थाः सिंदूरारुणविग्रहाः॥ रक्तोत्पलकपालाभ्यामलंकृतकरांबुजाः॥ प्रयोगः॥ श्रीकंठपूर्णोदरीभ्यां
नमो ललाटे॥ आं अनंतविरजाभ्यां नमो मुखवृत्ते॥ एवं क्रमेण मातृकास्थानेषु न्यसेत्॥ अथ षोढान्यासः॥ तदुक्तं वीरतंत्रे॥ केवलां मातृकां कृत्वा मा
दकांतारसंपुटां॥ मातृकापुटितं तारं न्यसेत्साधकसत्तमः॥ श्रीबीजपुटितां तां तु मातृकां पुटितां तु तत्॥ कामेन पुटितां देवीं पुनस्तत्पुटितं न्यसेत्॥
तथा शक्त्या च पुटितां शक्तिं तत्पुटितां न्यसेत्॥ बीजद्वंद्वं पुनर्न्यस्त्वा ऋॠऌॡं च पूर्ववत्॥ अनुलोमविलोमेन न्यस्तां मंत्र यथाविधि॥ मूलेनाष्टश
तं कुर्याद्व्यापकं तदनंतरं॥ इति गुह्येन दुर्गाया अंगषोढा प्रकीर्तिता॥ तारायाः कालिकायाश्च उग्रमुख्याश्च तथा परा॥ कृतेस्मिन्न्यासवर्ये च सर्वपापं प्रण

श्यति॥ विषापमृत्युहरणं ग्रहरोगनिवारणं॥ दुष्टाः सर्वे विनश्यंति शत्रवो यांति मित्रतां॥ कवितालहरी तस्य द्राक्षारसपरंपरा॥ अणिमाद्यष्टसिद्धिस्तु
तस्य हस्ते व्यवस्थिता॥ कायिकं वाचिकं वापि मानसं यच्च दुष्कृतं॥ सर्वं तस्य विनाशं लं याति न्यासस्य चिंतनात्॥ अपकृत्यं क्षयं याति यल्लिंगं विद्युपपातकं॥
यद्रूपं दृश्यते तेन सतद्रूपं च गच्छति॥ यंत्रमंत्रि महादेवि षोढापुटितविग्रहः॥ अल्पायुः स भवेत्सद्यो देवतां कंपते भिया॥ अथ तत्वन्यासो यथा॥ मूलाधारं
दांतं आत्मतत्वाय स्वाहा नमः॥ पादादि नाभिपर्यंतं न्यसेत्॥ द्वितीयखंडांते विद्यातत्वाय स्वाहा नमो नाभ्यादिहृदयांतं॥ तृतीयखंडांते शिवतत्वाय
स्वाहा नमो हृदयादिशिरःपर्यंतं॥ तदुक्तं स्वतंत्रे॥ आत्मविद्या शिवैस्तत्वैस्तत्वन्यासं समाचरेत्॥ अथ बीजन्यासो यथा॥ कुमारीकल्पे॥ ब्रह्मरंध्रे भ्रुवो
र्मध्ये हृत्ललाटे नाभिदेशके॥ गुह्ये वक्त्रे च सर्वांगे सप्त बीजं क्रमान्न्यसेत्॥ अथ प्रयोगः॥ अथ बीजं ब्रह्मरंध्रे द्वितीयं भ्रुवोर्मध्ये तृतीयं ललाटे चतुर्थं ना
भौ पंचमं गुह्ये षष्ठं वक्त्रे सप्तमं सर्वांगे॥ अथ मंत्रन्यासः॥ शिरसि नयन भाल भ्रूयुग कर्ण गंड वदन रदन जिह्वा स्कंध देश गले च॥ भुज हृदय सुपार्श्वपृ
ष्ठनाभौ च लिंगे कटि गुद कर पादे सर्वतो मंत्रवर्णान्॥ ततो मूलेन नवधा सप्तधा पंचधा वा व्यापकं न्यसेत्॥ तदुक्तं भैरवतंत्रे॥ पंचधा नवधा वापि मूले
न सप्तधा तथा॥ स्वतंत्रेपि॥ पंचधा पिवा॥ शिरसि न॰ मंत्रवर्णान्॥ एषु स्थानेषु द्वाविंशति वर्णन्न्यसेदिति॥ कुमारीतंत्रे॥ पीठन्यासं ततः कुर्यादा
धारशक्तिपूर्वकं॥ प्रकृतिं कमठं चेत्यादि॥ ॥इति पूर्णानंदगिरि परमहंसविरचिते श्यामारहस्ये प्रथमः परिच्छेदः॥ ॥विमलेश्वरतं
त्रे॥ अथांतर्यजनं वक्ष्ये दृष्टादृष्टप्रदं॥ योगिनो यत्र जायंते अधुना मानवाः सदा॥ गुरुध्यानं प्रकुर्वीत यथा पूर्वं विशालधीः॥ स्नायाच्च विमलती
र्थे पुष्करे हृदयाश्रिते॥ विंदुतीर्थ यवां स्नायात्पुनर्जन्म न विद्यते॥ अथवा॥ इडासुषुम्ने शिवतीर्थके स्मिन् ज्ञानांबुपूर्णे वहतः शरीरे॥ ब्रह्मांबुभिः स्ना
तितयोः सदा यः किं तस्य गांगेरपि पुष्करैर्वा॥ इति स्नानं॥ शिवशक्त्योः समावेशो यस्मिन्काले प्रजायते॥ सा संध्या कुलनिष्ठानां समाधिस्थैः प्रतीय
ते॥ इति संध्योपासनं॥ अथ मूलाधारात्कुंडलिनीं सोमसूर्याग्निरूपिणीं॥ उत्थाप्य परविंदुभिर्भिद्य देवान्प्रतर्पयेत्॥ चंद्रार्कानलसंघट्टाद्गलितं यत्प १०
रामृतं॥ तेनामृतेन दिव्येन तर्पयेत्परदेवतां॥ इति तर्पणं॥ ब्रह्मरंध्रादधोभागे यच्चांद्रं पात्रमुत्तमं॥ कलासारेण संपूर्णं तत्पर्यंतेन रक्ष्वरी॥ इत्यर्घ्यदानं॥

आधारे लिंगनाभौ हृदयसरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के॥ वासांते बालमध्ये डफ कठ सहिते कंठदेशे स्वराणां
हक्षौ कोदंडमध्ये न्यसतु विमलधीर्न्यासमेतीति एव सिध्ये॥ इति मातृकावर्णान्षट्चक्रस्य क्रमेण ध्यायेदित्यंतर्मातृका॥ यामले च॥ आधारस्तु चतुर्दलोरु
पारु चिर्वासांतवर्णाश्रयः स्वाधिष्ठानमणेश्च वैद्युतनिभं बालांतषट्पत्रकं॥ रक्ताभं मणिपूरकं दशदलं डाद्यं फलांतांतकं॥ वर्णैर्द्वादशभिस्त्वनाहतमथो है
मं कठपांतकं॥ मात्राभिः परिपूरितं दलगतं धूम्रं विशुद्धाख्यकं॥ हक्षाद्यक्षरसंयुतं युगदलं रक्तोपमाज्ञापुरं॥ तस्मादूर्ध्वमधोमुखं निगदितं पद्मं सहस्र
च्छदं नित्यानंदमयी सदा शिवपुरे शक्तिं नमः कौलिकं॥ अथ षडंगन्यासं कुर्यात्॥ तदुक्तं गौतमीये॥ ईड्यमाने हृदये चैयत्र तस्याश्चिदात्मकः॥ क्रिय
ते तत्परत्वेन हृन्मंत्रेण ततः परं॥ सर्वांगादिगुणोत्संगे संविद्रूपपरात्मनि॥ क्रियते तत्परत्वेन शिरोमंत्रेण देशिकैः॥ सर्वांगादि॰ परात्मनि॥ क्रियते निज
देहस्य शिखामंत्रेण देशिकैः॥ मंत्रात्मकस्य देहस्य मंत्रेणानेन तेजसा॥ सर्वतो वर्ममंत्रेण क्रियते देहसंवृतिः॥ वौषडिति मुंजस्वा क्रियते देहनेत्र
कं॥ ततोस्त्रेण च मंत्रेण कुर्यात्तस्त्रं चतुर्दशभिः॥ इति षडंगं विधाय॥ यद्दूरातिपरंज्ञानं संविद्रूपपरात्मनि॥ हृदयादि स्वयं तेजः स्यादेतन्मंत्रसं
द्विरूपं ज्ञितं॥ आध्यात्मिकस्यं तत्पंयत्साधकस्याविनाशयेत्॥ अविद्यायाः स्वतंत्रं यत्परंधाम समीरितं॥ इति षडंगं विधाय ध्यानं कुर्यात्॥ उदयाका
रषद्रूत्यां॥ शक्तिद्वयपुटंतस्थं कमलद्वयसंस्थितं॥ ज्योतिस्तत्वमयं ध्यायेत्कलाकुलनियोजनात्॥ अथवा॥ शृंगारद्वयमध्यस्थं शक्तिद्वयपुरः
कृतं॥ सदा समरसं ध्येयं ध्यानं तत्कुलयोगिनां॥ अन्यच्च॥ किरणस्थं तदग्निस्थं चंद्रभास्करमध्यगं॥ महाशून्ये लयं कृत्वा पूर्णस्तिष्ठति योगिराट्॥
अयमर्थः॥ चंद्रः सहस्रारे सूर्यः स्वाधिष्ठानादुपरि कालाग्निराधारादधस्तेजस्त्रयी भावनया प्रज्वाल्य कुंडलिनी परमशिवे विलिप्य निजसान्वा
यं देहं महाशून्ये परे बिंदौ विलाप्य पूर्णो निश्चलस्तिष्ठेत्॥ इति ध्यानं भैरवतंत्रे॥ अर्चयन्विषयैः पुण्यैस्तत्क्षणात्तन्मयो भवेत्॥ न्यासस्तन्मयता
बुद्धिः सोहंभावेन चिंतयेत्॥ विषयपुष्पाणि यथा॥ अमायमनहंकारमरागममदं तथा॥ अमोहकमदंभं च अद्वेषाक्षोभकौ॥ ततः॥ अमात्सर्य
मलोभं च दश पुष्पं विदुर्बुधाः॥ अहिंसा परमं पुष्पं पुष्पमिंद्रियनिग्रहं॥ दयापुष्पं क्षमापुष्पं ज्ञानपुष्पं च पंचमं॥ इत्यष्टसप्तभिः पुष्पैः पूजयेत्परदे

वर्ता॥ इति पूजनं॥ अथ जपः॥ मालापंचाशिका प्रोक्ता सत्रंशक्ति शिवात्मकं॥ ग्रथिता कुंडलीशक्तिः कलांते मेरुसंस्थितिः॥ एवंविधिना वर्ण
मालामुपस्कृत्याक्षमेरुं कृत्वा अकारादि लकारांतं लकारादि श्रीकंठ पर्यंतं मूलमंत्रं संजप्य परे तेजसि जपं समर्पयेत्॥ अथ होमः॥ मूलमपरि
छिन्नं विभाव्यात्मांतरात्मके॥ ज्ञानात्म परमात्मानौ चतुरस्रं विभावयेत्॥ चतुर्भिस्त्रिश्च चिल्कुंडे मेखलाया भिसंयुतं॥ नाभौ विभाव्य तन्मध्ये जुहु
याद्विष्णु तेजसा॥ मूलांते नाभि चैतन्य रूपाग्नौ मनसा हविः॥ ज्ञान प्रदीपिते नित्यमक्षवृत्ती र्जुहोम्यहं स्वाहा॥ अनेन प्रथमाहुतिं दद्यात्॥ ततः स
हस्रारकुंडे मूलांते॥ धर्माधर्म हविर्दीप्ते चात्माग्नौ मनसा स्रुचा॥ सुषुम्नावर्त्मना नित्यमक्षवृत्ती र्जुहोम्यहं स्वाहा॥ इति द्वितीयाहुतिं दद्यात्॥ मूलांते॥
प्रकाशाकाश हस्ताभ्यामवलंब्योन्मनी स्रुचा॥ धर्माधर्म कलास्नेहं पूर्णमग्नौ जुहोम्यहं स्वाहा॥ इति तृतीयाहुतिः॥ ततो मूलांते॥ अंतर्निरंतर निरिं
धनमेधमाने मायांधकार परिपंथिनि संविदग्नौ॥ कस्मिंश्चिदद्भुत मरीचि विकासभूमौ विश्वं जुहोमि वसुधादि शिवावसानमिति चतुर्थाहुतिं॥ इ
त्यंतर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत्॥ न तस्य पुण्य पापानि जीवन्मुक्तो भवेद्ध्रुवं॥ श्रीक्रमे॥ यासौ मधुमती नन्दी माया मोहनकारिणी॥ बाह्य
मंतरभेदेन चिंतनीयां च तां शृणु॥ त्रैलोक्यमकरूपेण मात्मानमेकरूपिणी॥ एकां प्रकृति रूपेण सर्वा शक्तिं विचिंतयेत्॥ कामयेत्का मिनी सर्वा
देवी ईवर्णरूपिणी॥ चिंतयेत्सुंदरी देवी सर्वव्यापककारिणी॥ ईकारभूतमंतस्था वयवं च चतुष्टयं॥ बिंदुत्रयेण देवेशि प्रथमं देवि वक्त्रं॥ बिं
दुद्वयं स्तनद्वंद्वं हृदिस्थाने नियोजयेत्॥ हकारार्धकलां सूक्ष्मां योनिमध्ये विचिंतयेत्॥ तथा कामकला रूपा मदनांकुरगोचरे॥ उद्यदादित्यसं
काशां सिंदूराभां स्तनद्वये॥ बिंदु संकल्प्य वक्त्रे तु स्फुरद्दीपशिखां प्रिये॥ आपादब्रह्मरंध्रांतं तंतमार्गेण भावयेत्॥ कामो बिंदुरहं देवि तत्रस्था
परमेश्वरी॥ शिवशक्तिमयं देवि तदधस्तं कुचद्वयं॥ तदधः सपरार्धं च चिद्रूपां परमां कलां॥ सापि कुंडलिनी शक्तिः कामकलास्वरूपिणी॥ संचिं
त्य साधकश्रेष्ठ त्रैलोक्यं वशमानयेत्॥ एतत्ते कथितं देवि कामकलासु निर्णयं॥ गोप्तव्यं च प्रयत्नेन यदीच्छेदात्मनो हितं॥ अथवा॥ अतः पूजां प्र ११
वक्ष्यामि जनानाम् अंतरं महत्॥ स्वकीय हृदये ध्यायेत्सुधासागरमुत्तमं॥ रत्नद्वीपं तु तन्मध्ये नंदनोद्यानशोभनं॥ परितो भावयेन्मंत्री पारिजात मनो

हरं॥ तत्र कल्पद्रुमं ध्यायेत्पंचाशदक्षरात्मकं॥ तन्मूले भावयेन्मंत्री नानारत्नोपशोभितं॥ उद्यदादित्यसंकाशं व्याप्तं ब्रह्माण्डमंडपं॥ शतयोजनविस्ती
र्णं ज्योतिर्मयमनुत्तमं॥ चतुर्द्वारसमायुक्तं हेमप्राकारभूषितं॥ वंकु चामरघंटादी वितानैरुपशोभितं॥ मंदवायुसमायुक्तं गंधपुष्पैरलंकृतं॥ तन्मध्ये
वेदिकां ध्यायेन्नानारत्नोपशोभितां॥ सुवर्णसूत्ररचितां चिंतयेच्छत्रमुत्तमं॥ पीठोपरि महायंत्रं पीयूषपूरपूरितं॥ तत्र देवीं विभाव्याथ पूजां कुर्यात्क्रमेण तु॥
आगतं स्वागतं चैव आसनं कल्पयेत्सुधीः॥ पाद्यत्रयं ततो दद्यात्कुर्याद्दर्घ्यचतुष्टयं॥ त्रयमाचमनं पूर्णं मधुपर्कत्रयं ततः॥ प्रक्षालनं पात्रयुग्मं कल्पये
त्साधकोत्तमः॥ एवं च भोगपात्रं च साधकः षोडशे दले॥ सहस्रारामृतेनैव पात्राणि पूरयेत्तदा॥ सर्वोपरि ततो ध्यायेत्सिमाननपंकजं॥ क्षरंतममृतं
नित्यं दिव्यं गकमलांतरे॥ शिवशक्ति समायोगादमृतानंदनंदिनी॥ सहस्रदलशृंगाणां दरीकाननविच्युतो॥ परामृतं च भानी यं भावपुष्पैः सुवासितं॥
स्वर्णपात्रे जलं कृत्वा दद्यादाचमनं मुखे॥ मधुपर्कं मुखे दद्याद्दद्यादाचमनीयकं॥ चतुर्विंशतितत्वेन गंधं दद्याद्विचक्षणः॥ सुवर्णकुसुमं दद्यात्कुंकु
मं रक्तचंदनं॥ पूर्वोक्त भाव कुसुमैः संपूज्य धूपदीपकैः॥ मनः कल्पितनैवेद्यं दद्याद्दिव्यं मनोरमं॥ षडंगं गुरुपंक्तिं च पूजयेदंगदेवताः॥ स्ववामे मंडलं
कृत्वा स्त्रीसिंहासनान्वितं॥ तत्र देवीं समानीय नानागंधसमन्वितां॥ उद्वर्तनादिकं कृत्वा स्नानीयं दापयेदथ॥ वसनेन ततो जलं प्रोक्षयेत्तेन वै तनुं॥
आकाशांतत्व दिव्येन तेन वस्त्रं प्रकल्पयेत्॥ विधिवद्वंदनं कृत्वा केशसंस्कारमाचरेत्॥ नानारत्नसमायुक्तं कंकत्यादि विमानया॥ पट्टगुच्छं केशपाशं
नानारत्नसमन्वितं॥ ललाटे तिलकं दद्यात्सिंदूरैः केशमध्यगं॥ नागेंद्रदंतरचितं शंखं दद्यान्मनोरमं॥ हस्तकेयूरकं चैव कंकणं कटकं तथा॥ पादांगु
लीयकं दद्यान्नानारत्नोपशोभितं॥ पादयोर्नूपुरं दद्यात्क्षुद्रघंटिकां॥ शिरोरत्नं प्रदद्याच्च मुकुटं रत्ननिर्मितं॥ तारंक कुंडले कर्णभूषणं सुप
रिष्कृतं॥ नयने कज्जलं दद्यान्नासाग्रे राजमौक्तिकं॥ श्रीपत्रकं कंठभूषां च मुक्तामणिविराजितं॥ आनंदहारत्रितयं अंगुलीयकरत्नकं॥ सर्वांगले
पनं दद्यात्सुगंधचंदनशिल्हकैः॥ सुवर्णपादुके दद्यान्नूपुरां कुंडलचिह्नितं॥ मंडलेषु समानीय रत्ननिर्मितदोलया॥ पुनः पाद्यादिकं कृत्वा पूजयेत्तां
सनातनीं॥ गंधादिकं पुनर्दत्वा पूजयेद्भावपुष्पकैः॥ सुमेखलां पद्ममालां पुष्पं नानाविधं तथा॥ सप्तद्वीपात्समुद्भूतं दद्याद्दिव्ये सुसाधकः॥ कुं

DR. BHAU DAJI

डगोलोद्भवंपुष्पंधूपंदद्यात्समीरणं॥सहस्रकर्णिकापात्रधृतंदद्यात्परामृतं॥मूलाधारपात्ररूपंविज्ञानंचप्रदीपकं॥आमूलाद्ब्रह्मरंध्रांतंसुषुम्ना
मृतवायुना॥अनाहतध्वनिमयीघंटामेतांनिवेदयेत्॥नैवेद्यंयद्वस्तुपेतमर्धंचचामरंतयोः॥सूर्यंचदर्पणंचंद्रमंडलंछत्रमुत्तमं॥सुधामहार्णवंद
द्याद्दद्याच्चमांसपर्वतं॥सुवर्णचारुकंचैवयुक्तायुक्तपरात्मकं॥भक्ष्यंभोज्यंतथाचोष्यंलेह्यंपेयंचचर्वणं॥दद्याच्छेषयुतंनैवपुनराचमनीयकं॥
वायुचक्रंततोदद्यान्मूलाधारोत्थवायुना॥रजस्तमः सत्वगुणैः कर्पूरचूर्णमिश्रितं॥रत्नपात्रेपरिष्कृत्यतांबूलंचनिवेदयेत्॥पुष्पशय्यानम
स्कुर्यात्तत्रदेवीसुरेश्वरी॥मनोनर्तकगानेनशृंगारादिरसोज्वलैः॥सितैः स्नानादिभिर्देवींतोषयेत्साधकोत्तमः॥भूताकामेश्वरीदेवीपिता
कामेश्वरस्थसः॥मनसैकंविभाव्याथसाधकः सिद्धिमाप्नुयात्॥इत्येतैः पूजनंप्रोक्तंभुक्तिमुक्तिफलप्रदं॥रक्तपद्मंमहेशानिमनसायः प्रय
च्छति॥कल्पकोटिसहस्रंतुदेवीलोकेसतिष्ठति॥स्थित्वादेवीपुरेश्रीमान्सतोराजाभविष्यति॥मनसापिमहादेव्यैनैवेद्यंदातुमिच्छति॥
योनरोभक्तिसंयुक्तः सदीर्घायुः सुखीभवेत्॥मनसापिचयोभक्त्यादेव्याः कुर्यात्प्रदक्षिणां॥देवीगेहेवसेत्सोपिनरकंनैवपश्यति॥नम
नंमनसादेव्यैयोभक्त्याकुरुतेनरः॥सोपिविश्वंविजित्वाचदेवीलोकेमहीयते॥पंचमुंडेसमासीनांकुंडमालाविभूषितां॥ताम्रा
र्कयुतसंकाशांरत्नसिंहासनेस्थितां॥इत्येतैः पूजा॥अत्राप्यशक्तोयातायातक्रमेणवारत्रयंदेवींकुंडलिनींतर्पयित्वातत्यागफलंल
भेत्॥ ॥इतिश्यामारहस्येद्वितीयः परिच्छेदः॥ ॥अथसाधकः कुलयुवतिवेषंकृत्वावनितायाअपिकारयित्वापी
ठन्यासंकुर्यात्॥तदुक्तंकुमारीकल्पे॥ततः स्त्रीवेषधारीस्यात्सिंदूरांकितभावकः॥शृंगारोज्वलवेषाढ्यस्तांबूलपरिताननः॥
एवंवेषादिकंसर्वंवनितामपिकारयेत्॥पीठन्यासंततः कुर्यादाधारशक्तिपूर्वकं॥प्रकृतिंकमठंचैवशेषंपृथ्वींतथैवच॥सुधां १२
बुधिंमणिद्वीपंचिंतामणिगृहंततः॥श्मशानंपारिजातंचतन्मूलेरत्नवेदिकां॥तस्योपरिमणेः पीठंन्यसेत्साधकसत्तमः॥चतुर्दिक्षु
मुनीन्देवान्शिवाश्चशिवमुंडकान्॥धर्मादींश्चाप्यधर्मादीन्पादगात्रेचतुष्टये॥हृदिकंदंतथापद्मंसूर्यसोमंमहेश्वरि॥वैश्वानरं

तथासत्वंरजश्चैवतमस्तथा॥आत्मानंचैवविन्यस्यशक्तीर्हृत्पद्मकेन्यसेत्॥शक्तयोयथाज्ञानार्णवे॥इच्छाज्ञानाक्रियाचैवकामि
नीकामदायिनी॥रतीरतिप्रियानंदाकर्णिकायामनोन्मनी॥वाग्भवंप्रथमंप्रोक्तापरायेतदनंतरं॥अपरायैविरूपायैह्सौंर्वाच्यमतः
परं॥सदाशिवमहाप्रेतंडेंतंपद्मासनंतथा॥नमइत्येवमंत्रोयंपीठन्यासउदाहृतः॥एवंदेहमयेपीठेचिंतयेदिष्टदेवतां॥अथादौका
मकलारूपमात्मानंविभाव्यमूलाधारात्कुंडलिनींपरशिवांतंध्यात्वाचंद्रामृतेनसंप्लाव्यकरकच्छपापुष्पंगृहीत्वासुषुम्नावाह्यहृद
याष्टदलपद्मेदेवींध्यायेत्॥तदुक्तंस्वतंत्रे॥ततः कामकलाध्यानादावाह्यकालिकांशिवां॥कूर्माख्यमुद्रयापुष्पेश्वक्रमध्येनिधाप
येत्॥अथकामकलायथाभावचूडामणौ॥मुखंबिंदुवराकारंतदधः कुचयुग्मकं॥तदधः सपरार्धंचचिंतयेत्तदधोमुखं॥सर्वविद्या
रत्नापूर्णंसर्ववाग्विभवप्रदं॥सर्वार्थंसाधकंदेवसर्वविश्वप्रवर्तकं॥तदधः परमार्थंचसुपरिष्कृतमंडलं॥देवदेवादिभूतंचसर्वदेवनम
स्कृतं॥सर्वाल्हादनसंपूर्णंसर्वरंजनकारकं॥एतत्कामकलाध्यानंसुगोप्यंसाधकोत्तमैः॥मुखमंडलंतदधः कुचयुग्मकंइत्यनेनकं
ठादिकटिपर्यंतं॥सापरार्धमितियोन्यादिपादपर्यंतंदेहंविभावयेत्॥अथकूर्ममुद्रायथाकालिकापुराणे॥वामहस्तस्यतर्जन्यांदक्षि
णस्यकनिष्ठया॥तथादक्षिणतर्जन्यांवामांगुष्ठेनयोजयेत्॥उन्नतंदक्षिणांगुष्ठंवामस्यमध्यमादिकाः॥अंगुलीर्योजयेत्पृष्ठेदक्षि
णस्यकरस्यच॥कूर्मपृष्ठसमंकुर्याद्दक्षिणस्यचपृष्ठकं॥वामस्यापितृतीयेनमध्यमानामिकेतथा॥अधोमुखेचतेकुर्याद्दक्षिणस्य
करस्यच॥एवंविधिः सर्वसिद्धिंददातिपाणिकच्छपः॥कुर्यात्तुहृदयेयंत्रेनिमील्यनयनद्वयं॥समकायंशिरोग्रीवंकृत्वास्थिरमनाबुधः॥
ध्यानंसमारभेन्मंत्रीसर्वपापप्रणाशनं॥ध्यानंयथातदुक्तंस्वतंत्रे॥देव्याध्यानंप्रवक्ष्यामिसर्वदेवोपसेवितं॥अंजनाद्रिनिभांदेवींकरा
लवदनांशिवां॥मुंडमालावलीकीर्णांमुक्तकेशींस्मिताननां॥महाकालहृदंभोजस्थितांपीनपयोधरां॥विपरीतरतासक्तांघोरदंष्ट्रां

शिवैः सह॥ नागयज्ञोपवीतांचचंद्रार्धकृतशेखरां॥ सर्वालंकारयुक्तांतुमुक्तामणिविभूषितां॥ मृतहस्तसहस्रैस्तुकांचीबद्धांदिगंबरां॥ शि
वाकोटिसहस्रैस्तुयोगिनीभिर्विराजितां॥ रक्तपूर्णमुखांभोजांमद्यपानप्रवर्तकां॥ वन्ह्यर्कशशिनेत्रांतुरक्तविस्फुरितानना॥ विगतासुकि
शोराभ्यांकृतकर्णावतंसिनीं॥ कंठावसक्तमुंडाली गळद्रुधिरचर्चितां॥ देवीश्मशानवह्निस्थांब्रह्मकेशवबंदितां॥ सद्यःकृतशिरःखड्गव
राभीतिकरांबुजां॥ अत्रवामोर्ध्वहस्तेकृपाणंतदधःशिरः॥ दक्षोर्ध्वहस्तेचअभयंतदधोवरमितिबोद्धव्यं॥ तदुक्तंमहाकालकृतस्तवे॥ ऊ
र्ध्ववामेकृपाणंकरकमलतलेछिन्नमुंडंतथाधःदोःसव्येभीतिवरंचेत्यादि॥ अथविरूपाक्षकृतध्यानक्रमेणध्यायेद्यथा॥ भिन्नांजनचयप्रख्यां
प्रवीणशवसंस्थितां॥ गळच्छोणितधाराभिःस्मेराननसरोरुहां॥ पीनोन्नतकुचद्वंद्वांपीनवक्षोनितंबिनीं॥ दक्षिणांमुक्तकेशालींदिगंबरवि
नोदिनीं॥ महाकाळशवाविष्टांस्मेराननदोपरिस्थितां॥ मुखसांद्रस्मितामोदमोदिनीमदविह्वलां॥ आरक्तमुखसांद्राभिर्नेत्रालीभिर्विराजितां॥
शवद्वयकृतोत्तंसांसिंदूरतिलकोज्वलां॥ पंचाशन्मुंडघटितमालांशोणितशोभितां॥ नानामणिविशोभाढ्यांनानालंकारभूषितां॥ शा
वास्थिकृतकेयूरांशंखकंकणमंडितां॥ शववक्षस्थलारूढांलेलिहानांशवंक्वचित्॥ शवमांसकृतग्रासांसाट्टहासांमुहुर्मुहुः॥ खड्गमुंड
धरांवामेसव्येभयवरप्रदां॥ दंतुरांचमहारौद्रींचंडनादातिभीषणां॥ शिवाभिर्घोररूपाभिर्वेष्टितांभयनाशिनीं॥ माभैर्माभैःस्वभक्तेषुस्व
ल्पंतीघोरनिस्वनैः॥ इत्थंकिमिच्छथब्रूतददामीतिप्रभाषिणीं॥ अथापरध्यानप्रकारंमहाभैरवतंत्रे॥ करालवदनांघोरांमुक्तकेशींच
तुर्भुजां॥ कालिकांदक्षिणांदिव्यांमुंडमालाविभूषितां॥ सद्यश्छिन्नशिरःखड्गमूर्ध्वद्वयकरांबुजां॥ अभयंवरदंचैवअधोद्वयकरांबुजां॥
महामेघप्रभांश्यामांतथैवचदिगंबरां॥ कंठावसक्तमुंडाली गळद्रुधिरचर्चितां॥ कर्णावतंसतांनीतशवयुग्मभयानकां॥ घोरदंष्ट्रांकरालां
चपीनोन्नतपयोधरां॥ शवानांकरसंघातैःकृतकांचीहसन्मुखीं॥ सृक्कद्वयगळद्रक्तधाराविस्फुरिताननां॥ घोररूपांमहारौद्रींश्मशा १३
नालयवासिनीं॥ दंतुरांदक्षिणव्यापिमुक्तलंबकचोच्चयां॥ शवरूपमहादेवहृदयोपरिसंस्थितां॥ शिवाभिर्घोररावाभिश्चतुर्दिक्षुसमन्वितां॥

महाकालेनचसमंविपरीतरतातुरां॥ सुखप्रसन्नवदनांस्मेराननसरोरुहां॥ अथैतेषांमन्यतमेनदेवींध्यात्वामानसोपचारैर्देवींसंपूजये
त्॥ तदुक्तंकुमारीकल्पे॥ एनांतुमानसैर्भोगैर्गंधपुष्पैःसदीपकैः॥ सुरयाबलियुक्तैश्चपूजयेद्वायथाविधिः॥ ततोवैमानसंजाप्यंकुर्याद्धोमा
दिमेवच॥ नमस्कृत्ययथास्तुत्वाबहिर्यागंसमाचरेत्॥ अथाष्टवर्गलिप्तसुवर्णादिपत्रेसुवर्णरजतताम्रशलाकयाबिल्वकंटकेनपुष्पेणवामू
लमंत्रमुच्चार्यादौबिंदौक्रींविलिख्यततस्त्रिकोणंतद्बाह्येत्रिकोणचतुष्टयंवृत्तमष्टदलंपुनर्वृत्तंचतुर्द्वारात्मकंचतुरस्रंयंत्रराजंविलिखेत्॥ त
दुक्तंकालीतंत्रे॥ आदौत्रिकोणंविन्यस्यत्रिकोणंतद्बहिर्न्यसेत्॥ ततोवैविलिखेन्मंत्रीत्रिकोणत्रयमुत्तमं॥ ततोवृत्तंसमालिख्यलिखेदष्टद
लंततः॥ वृत्तंविलिख्यविधिवल्लिखेद्भूपुरमेककमिति॥ कुमारीकल्पेपि॥ आदौत्रिकोणंविन्यस्यत्रिकोणंतद्बहिर्न्यसेत्॥ बहिस्त्रिकोणमा
लिख्यषट्कोणंतद्बहिर्लिखेत्॥ मध्येतुबैंदवंचक्रंबीजमायाविभूषितं॥ षट्कोणात्तुबहिर्वृत्तंततोष्टदलकंलिखेत्॥ बहिर्वृत्तेनसंयुक्तंभूपुरेके
नसंयुतं॥ ज्ञात्वैवमुक्तिमाप्नोतियंत्रेमेवनसंशयः॥ एतच्चुद्विलिखेन्मंत्रीकुंडगोळविलेपिते॥ स्वयंभूकुसुमैर्युक्तेकुंकुमागरुसेविते॥ स्वतं
त्रेपि॥ इत्थंविन्यस्तदेहस्तुचक्रराजंलिखेत्सुधीः॥ स्वर्णेवाराजतेताम्रेपाषाणेवाष्टधातुके॥ स्वयंभूकुसुमंकुंडगोळंरोचनागुरु॥ का
श्मीरमृगनाभिश्चकाष्ठंचमलयोद्भवं॥ एषगंधःसमाख्यातःसर्वदाचंडिकाप्रियः॥ एतेनगंधयोगेनयोनिचक्रंसमालिखेत्॥ योनित्रयंततः
कुर्यात्षट्कोणंचततःप्रिये॥ ततश्चाष्टदलंभूमिचतुर्द्वारसमन्वितं॥ मध्येतुबैंदवंचक्रंमंत्रपुष्पांजलिंक्षिपेत्॥ अत्रकेचिद्वदंतिषट्कोणाभ्यं
तरगतमेवयुक्तंत्रिकोणत्रयं॥ नतुसर्वमुक्तंस्वतंत्राविरोधात्॥ वीरतंत्रेफेत्कारिणीतंत्रकुलसंभारविरोधाच्च॥ तद्यथापूजाविषये॥ काली
कपालिनीकुल्लाकुरुकुल्लाविरोधिनी॥ विप्रचित्तांतुसंपूज्यबहिःषट्कोणकेबुधः॥ उग्रामुग्रप्रभांदीप्तांतथैवांतस्त्रिकोणकेति॥ तस्मात्ष
ट्कोणांतर्गतमेवत्रिकोणंयुक्तं॥ तत्रषट्कोणशब्देनात्रशक्त्यात्मककोणषट्कमुच्यतेनतुशिवशक्त्यात्मककोणषट्कमुच्यतइतिब्रह्मानंदपरम
हंसगुरूणांपरामर्शः॥ तथानीलतंत्रे॥ पंचशक्तिंसमालिख्यअधोवक्त्रांसुलक्षणां॥ सिद्धेश्वरीतंत्रे॥ अधोवक्त्रंपंचकोणमन्योन्यसमलग्नकं॥

एवंभूतंमहाचक्रं स्थापयेत्सिंहविष्टरे॥ फेत्कारिण्यां॥ बहिरष्टदलं कुर्याच्चतुर्द्वारोपशोभितं॥ कालिकाश्रुतौ॥ त्रिकोणं त्रिकोणं नवकोणं पद्मभूमि
ति॥ कालिकाकुलसंभारेपि॥ त्रिकोणं विन्यसेदादौ पुनश्चापित्रिकोणकं॥ नवकोणं पुनस्तत्र तन्मध्ये स्थापयेच्छिवां॥ तत्र भागवन्मतेपिशक्त्या
त्मकमेवनवकोणनतुशिवशक्त्यात्मकं॥ वीरतंत्रकालीतंत्रस्वतंत्राविरोधात्॥ तस्मादत्र षट्कोणशब्देनशक्त्यात्मकमेवोच्यतइतिभावः॥ नतु
नवकोणांतयुक्तं त्रिकोणद्वयमपरप्रकारमेवकथनंस्यादितिचेत्॥ यथाकुलसंभारेपि॥ कालीकपालिनी कुल्ला कुरुकुल्लाविरोधिनी॥ विप्रचि
त्तान्यसेच्चैवबहिः षट्कोणकेनतः॥ उग्रामुग्रप्रभांदीप्तांपरत्रिकोणके न्यसेत्॥ नीलांघनांबलाकांचतथैवापरकेत्रिके॥ मात्रामुद्रामितांचैव
तथैवान्यत्रिकोणकेइत्यादि॥ तस्मान्नवकोणांतर्गतंत्रिकोणद्वयमितिबाह्यषट्कोणाभावाच्च॥ अथत्रिकोणांतर्गतनवकोणंकथनंस्यादितिचेन्न
निर्विवादमेव॥ यतोनवकोणशब्देनशक्त्यात्मकंनवकोणमुच्यतेनतुशिवशक्त्यात्मकंवचनांतरदर्शनात्॥ तद्यथाकालीक्रमे॥ त्रिकोणं विलि
खेदादौ पुनश्चापित्रिकोणकं॥ नवशक्तिं पुनर्देवि बिंदुचक्रं समालिखेत्॥ अथतंत्रभेदान्नानाविधंयंत्रमेवकथनंस्यादितिचेत्सत्यं संभवत्ये
कविधोनानाविधकल्पनागौरवंस्यादितितस्मात्सकृमेवपंचदशकोणंशस्तं॥ एवंमैथिलगौडप्रभृतिनानासाधकानामपिसंमतं॥ ॥
इतिश्रीपूर्णानंदगिरिपरमहंसविरचितश्यामारहस्येयंत्रनिर्णयस्तृतीयः परिच्छेदः॥ ॥अथसुवर्णादिसिंहासनेपुरतोयंत्रस्थाप्यपु
ष्पांजलिनाच्छाद्यतत्रपीठन्यासक्रमेणपूजयेद्यथा॥ ॐ आधारशक्तयेनमः॥ प्रकृत्यै॰ कूर्माय॰ अनंताय॰ पृथिव्यै॰ सुधांबुद्धाय॰ मणिद्वी
पाय॰ चिंतामणिगृहाय॰ श्मशानाय॰ पारिजाताय॰ तन्मूलरत्नवेदिकायै॰ तस्योपरिमणिपीठाय॰ दिक्षुनानामुनिगणेभ्यो॰ नानादेवेभ्यो॰
चतुर्दिक्षुबकुमांसास्थिशवमुंडचितांगारेभ्यो॰ धर्माय॰ ज्ञानाय॰ वैराग्याय॰ ऐश्वर्याय॰ अधर्माय॰ अज्ञानाय॰ अनैश्वर्याय॰ आनंदकं
दाय॰ संविन्नालाय॰ पद्माय॰ अंसूर्यमंडलाय॰ उंसोममंडलाय॰ मंवैश्वानरमंडलाय॰ संसत्वाय॰ रंरजसे॰ तंतमसे॰ आंआत्मने॰ १४
अंअंतरात्मने॰ पंपरमात्मने॰ ह्रीं ज्ञानात्मने॰ अष्टपत्रेषु॥ इच्छायै॰ ज्ञानायै॰ क्रियायै॰ कामिन्यै॰ कामदायिन्यै॰ रत्यै॰ रतिप्रियायै॰ आ

नंदायै॰ कर्णिकायांमनोन्मन्यै॰ ऐंपरायै॰ ऐंअपरायै॰ ऐंविन्दूपायै॰ स्त्रौः सदाशिवमहाप्रेतपद्मासनाय॰ ॐनमइतिशेषसाहितंसर्वत्रयोज्यं॥
अथैवंविधिनापीठपूजांकृत्वाकलशस्थापनंकुर्यात्॥ तल्लक्षणमाहतंत्रांतरे॥ कलांकलांगृहीत्वाचदेवानांविश्वकर्मणा॥ निर्मितोयंसुरैर्यस्मा
त्कलशस्तेनकथ्यते॥ पादपद्मार्यस्तुकलाः परिशेषतइतिकलशः॥ कलशमानमाह॥ तदुक्तंस्वतंत्रे॥ पंचाशदंगुलंव्यासमुत्सेधोद्वादशांगु
लः॥ कलशंतुप्रमाणंतुमुखमष्टांगुलंतथा॥ सौवर्णंराजतंवापिसाक्वंगायथोदितं॥ क्षालयेदस्त्रमंत्रेणकुंभंसम्यक्सुरेश्वरि॥ अथप्रयोगः॥
स्ववामेषट्कोणांतर्गतत्रिकोणबिंदुबाह्यवृत्तंचतुरस्रंकृत्वासामान्यार्घ्योदकेनसंप्रोक्ष्यतत्राधारशक्तिभ्योनमइतिपूजयेत्॥ ततोनमइत्याधारं
प्रक्षाल्यमंडलोपरिसंस्थाप्यमंवह्निमंडलायदशकलात्मनेनमइतिसंपूज्यफडितिकलशंप्रक्षाल्याधारेरक्तवस्त्ररक्तमाल्याविनालंकृत्यदे
वीबुध्यासंस्थाप्य॥ अंअर्कमंडलायद्वादशकलात्मनेनमइतिसंपूज्य॥ विलोममातृकामूलमंत्रंचपठन्कारणेनकलशमापूर्य॥ उंसोममंडला
यषोडशकलात्मनेनमइतिसंपूजयेत्॥ ततः फडितिसंरक्ष्यहुमित्यवगुंठ्यनुमुद्रयावगुंठ्यमूलमंत्रेणसंवीक्ष्यनमइत्यभ्युक्ष्यमूलेनत्रिर्गंधमा
दायकलशेपुष्पंदत्वाशापमोचनंकुर्यात्॥ तदुक्तंस्वतंत्रे॥ तत्रश्चकारणंदिव्यंसमानीयघटस्थितं॥ वेष्टितंरक्तवस्त्रेणरक्तमाल्येनभूषितं॥
वामभागेमहेशानिमंडलंचतुरस्रकं॥ लिखित्वातत्रकुंभंवैसौवर्णंवाथराजतं॥ ताम्रंभूमिमयंवापियद्वालोहविवर्जितः॥ तंत्रांतरेच॥ आधा
रेस्थापयेन्मंत्रीसौवर्णंवाथराजतं॥ कांस्यजंमृन्मयंवापिघटमव्रणशालिनं॥ सौवर्णंभोगदंप्रोक्तंराजतंमोक्षदंस्मृतं॥ कांस्यंशांतिकरंचैवमृ
न्मयंपुष्टिदंभवेत्॥ अथशापविमोचनयथा॥ तदुक्तंकुमारीतंत्रे॥ अन्यच्चशृणुदेवेशिपथापानादिकर्मणि॥ दोषोनजायतेदेवितत्रमंत्रान्शृणु
ष्वमे॥ एकमेवपरंब्रह्मस्थूलसूक्ष्ममयंध्रुवं॥ कचोद्भवांब्रह्महत्यांतेनतेनाशयाम्यहं॥ सूर्यमंडलसंभूतेवरुणालयसंस्थिते॥ अमाबीजमयेदे
विशुक्रशापंविमोचय॥ वेदानांप्रणवोबीजंब्रह्मानंदमयंयदि॥ तेनसत्येनतेदेविब्रह्महत्यांव्यपोहतु॥ एवंमंत्रत्रयेणेवअभिमंत्र्यसुरांशुभां॥ प्र
दद्यात्कालिकादेव्यैचततोनैवचभुक्तावेत्॥ इतिमंत्रत्रयंदेविघटंधृत्वापठेत्त्रिधा॥ ततः ॐवांवींवूंवैंवौंवः॥ ब्रह्मशापविमोचितायैसुरादे

य्यैनमइतित्रिवारंपठेदितिब्रह्मशापविमोचनं॥ ततक्लीं श्रीं क्रांक्रीं क्रूं क्रैं क्रौं क्रः सुरे कृष्णशापं विमोचय २ अमृतं स्रावय स्वाहेति कृष्णशा
पविमोचनं॥ ॐ शांशीं शूं शैं शौं शः शुक्रशापविमोचितायै सुरादेव्यैनमइति शुक्रशापविमोचनं॥ अथोत्तरतंत्रे॥ हंसः शुचिषद्वसुरंतरि
क्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसद् ब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ इतिवारत्रयं द्रव्योपरि पठेत्॥ ततोद्र
व्यमध्ये आनंदभैरवानंदभैरव्यौ च ध्यायेत्॥ यथा॥ सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलं॥ अष्टादशभुजं देवं पंचवक्त्रं सुशीतलं॥ अमृ
तार्णवमध्यस्थं ब्रह्मपद्मोपरि स्थितं॥ वृषारूढं नीलकंठं सर्वाभरणभूषितं॥ कपालखट्वांगधरं घंटाडमरुवादिनं॥ पाशांकुशधरं देवं
गदामुसलधारिणं॥ खड्गखेटकपट्टीशं मुद्गरं शूलदंडकं॥ विचित्रखेटकं मुंडं वरदाभयधारिणं॥ लोहितं देवदेवेशं भावयेत्साधकोत्तमः॥ एवं ध्यात्वा हसक्षमलवरयूं आनंदभैरवाय वौषट् इत्यानंदभैरवं तत्र वारत्रयं पूजयेत्॥ आनंदभैरवीं ध्यायेत्॥ भावयेच्च सुरां
देवीं चंद्रकोटियुतप्रभां॥ हिमकुंदेंदुधवलां पंचवक्त्रां त्रिलोचनां॥ अष्टादशभुजैर्युक्तां सर्वानंदकरोद्यतां॥ प्रहसंतीं विशालाक्षीं देव
देवस्य सन्मुखीं॥ एवं ध्यात्वा सहक्षमलवरयीं सुरादेव्यै वषट्॥ इत्यानंदभैरवीं संपूज्य द्रव्यमध्ये शक्तिचक्रं विलिखेत्॥ ततस्त्रिपंक्त्या
दक्षिणावर्तनाकारादिषोडशस्वराः कादितांता थादिसांताः क्रमेण विलिख्य कोणत्रये हंक्षं लिखेत्॥ ततः शिवशक्त्योः समावेशाद्द्र
व्यमध्ये मृतत्वं विचिंत्य ॐ अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतमाकर्षयाकर्षय अमृतं स्रावय २ स्वाहेति धेनुमुद्रयामृती
करणं कृत्वा वमिति वरुणबीजं मूलमंत्रमष्टधा घटं धृत्वा पठेदिति द्रव्यशुद्धिः॥ तदुक्तं स्वतंत्रे॥ ततश्चावाहयेद्द्रव्यमध्ये रक्तमयं प्रिये॥ अ
कथादि त्रिपंक्त्या तु हलक्षमध्यमंडितं॥ पूर्वोक्तया नियुंज्यां तु शिवशक्त्योः समागमे॥ अमृतं चिंतयेद्द्रव्ये अष्टधा लमृतं जपेत्॥ अष्टधा १५
मूलमंत्रं च जपेद्धृत्वा घटं तथा॥ एतत्तु कारणं देवि सुरघनिषेवितं॥ अत एव तस्य नाम सुरेति भुवनत्रये॥ तस्य गंधः केशव स्तुतेन गंधेन कौ
लिकः॥ पूजयेत्परमां देवीं दक्षिणां कालिकां शिवां॥ ततः शरखंवीरपात्रं स्थापयन्मध्यभागतः॥ श्रीविद्योक्तविधानेन ततः पूजां समाचरेत्॥

कुमारिकल्पेपि॥ ततोर्घ्यं कारयेन्मंत्री तयानार्या सुशोभया॥ अर्घ्यद्रव्यमर्घ्यपात्रे निक्षिप्य प्रयतः सुधीः॥ कुंडगोलोद्भवद्रव्यं स्वयंभूः कुसुमं
तथा॥ नार्घो मे विद्यते सुभ्रु महामंत्रस्य साधने॥ नार्या पतिस्तस्या गलच्चंद्रामृतेनेत्यर्थः॥ अथ श्रीविद्योक्तक्रमेणैवार्घ्यस्थापनं यथा॥ आत्मश्री
क्रमयोर्मध्ये ईकारत्रिकोणषट्कोणवृत्तचतुरस्रं विलिख्य चतुरस्रे उड्याणपीठाय नमः॥ जालंधरपीठाय नमः॥ पौर्णगिरिपीठाय॰ कामरू
पपीठ॰ इति संपूज्य षट्कोणे षडंगं संपूज्य मूलखंडत्रयेण त्रिकोणाग्रदक्षोत्तरं संपूज्य मध्ये आधारशक्तिं पूजयेत्॥ त्रिकोणगर्भषट्कोणभूषि
तं त्रिपदिकां संस्थाप्य नमइति सामानार्घ्यजलेनाभ्युक्ष्य वह्नेर्दशकलाः पूजयेत्॥ यथा॥ यं धूम्रार्चिषे॰ रं उष्मायै॰ लं ज्वलिन्यै॰ वं ज्वालिन्यै॰
शं विस्फुलिंगिन्यै॰ षं सुश्रियै॰ सं सुरूपायै॰ हं कपिलायै॰ ळं हव्यवाहायै॰ क्षं कव्यवाहायै॰ मं वह्निमंडलाय दशकलात्मनेनमइति संपूज्य
षट्कोणे षडंगं संपूज्य मध्ये उक्तमंत्रेण देवीं संपूज्य कपालादिपात्रं फडिति प्रक्षाल्य त्रिपदिकोपरि संस्थाप्य तत्र सूर्यमंडलं पूजयेद्यथा॥ कंभं तपि
न्यै॰ खंबं तापिन्यै॰ गंफं धूम्रायै॰ घंपं मरीच्यै॰ ङंनं ज्वालिन्यै॰ चंधं रुच्यै॰ छंदं सुषुम्णायै॰ जंथं भोगदायै॰ झंतं विश्वायै॰ ञंणं बोधि
न्यै॰ टंढं धारिण्यै॰ ठंडं क्षमायै॰ अं अर्कमंडलाय द्वादशकलात्मनेनमइति संपूज्य॥ ततः पात्रमध्ये त्रिकोणवृत्तषट्कोणं विलिख्य समस्तव्य
स्तमंत्रेण संपूज्य वमिति वरुणबीजं मूलमंत्रं विलोममातृकां च पठन्घटस्थकारणेन ते त्रिभागं प्रपूर्य जलेन भागमेकं पूरयेत्॥ ततो दूर्वाक्षत
रक्तपुष्पबिल्वपत्रनानाविधसुगंधिद्रव्यं तत्र निक्षिप्य॥ तत्र सोममंडलं पूजयेद्यथा॥ अं अमृतायै॰ आं मानदायै॰ इं पूषायै॰ ईं तुष्ट्यै॰ उं पुष्ट्यै॰
ऊं रत्यै॰ ऋं धृत्यै॰ ॠं शशिन्यै॰ ऌं चंद्रिकायै॰ ॡं कांत्यै॰ एं ज्योत्स्नायै॰ ऐं श्रियै॰ ॐ प्रीत्यै॰ औं अंगदायै॰ अं पूर्णायै॰ अः पूर्णामृतायै॰
नमो तेन संपूज्य॰ उं सोममंडलाय षोडशकलात्मने॰ इति पूजयेत्॥ ततः पूर्ववद्यंत्रं त्रिकोणं अकारं कारणे विलिख्य त्रिकोणरेखायां अं १६
कं १६ थं १६ मध्ये हलक्षमिति त्रिधा लिखेत्॥ ततो मूलखंडत्रयेण त्रिकोणं संपूज्य षट्कोणं षडंगं पूजयेत्॥ यथा॥ ग्लूं गगनरत्नेभ्यो॰ स्लूं स्वर्ग
रत्नेभ्यो॰ म्लूं मर्त्यरत्नेभ्यो॰ प्लूं पातालरत्नेभ्यो॰ न्लूं नागरत्नेभ्यो॰ नमो तेन पूजयेत्॥ ततो द्रव्यमध्ये मांसमीनमुद्राकुंडगोलादिकं च संसोध्यनिः

श्या॰ द॰ क्षिपेत्॥ तेषां शुद्धिर्यथा॥ उमरतंत्रे॥ ॐ प्रतद्विष्णुस्तवस्तेवीर्येण मृगोनभीमः कुचरोगिरिष्ठाः॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भु
१६ वनानि विश्वा॥ इति मांसशुद्धिः॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ इति मीनं शोधयेत्
तद्विष्णोः परमं पदं सदा पश्यंति सूरयः॥ दिवीव चक्षुराततं॥ तद्विप्रासो विपन्यवो जागृवांसः समिंधते॥ विष्णोर्यत्परमं पदं॥ इति मुद्राशोध
नं॥ ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु॥ आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति॥ गर्भं
ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ ह्रुं ल्लुं मुं ग्लुं स्लुं स्वाहा॥ अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतमाकर्षयाकर्षय अमृ
तं स्रावय स्रावय स्वाहेति॥ कुंडगोलोद्भवादीनां शोधनं॥ ततः सर्वमिति स्ववगुंठ्य धेनुमुद्रयामृती कृत्य तालत्रयेण दिग्बंधनं कृत्वा तदुप
रि मूलमंत्रं सप्तधा जपेत्॥ ततः ऐं क्लीं सौः ब्रह्मांडखंडसंभूतमशेषेणससंभवं॥ आपूरितं महापात्रं पीयूषरसमावह॥ अखंडैकरसा
नंदकुलेवरसुधात्मनि॥ स्वच्छंदस्फुरणामत्र विधेह्यकुलरूपिणी॥ अकुलस्थामृताकारे शुद्धज्ञानकरे परे॥ अमृतत्वं निधेह्यस्मिन्वस्तुनि
क्लिन्नरूपिणी॥ तद्रूपिण्यैकरस्यं च कृत्वा ह्येतत्स्वरूपिणि॥ भूत्वा परामृताकारा मयि चित्स्फुरणं कुरु॥ अनेन कारणमामंत्र्य तत्र देवीमावा
ह्य तालत्रयं दिग्बंधनावगुंठनामृतीकरणानि तत्तन्मुद्रया विधाय॥ योनिमुद्रां प्रदर्श्य हसौः नमः इति संपूज्य शंखमुद्रां प्रदर्श्य षडंगेन सक
ली कृत्य मत्स्यमुद्रया पात्रमाच्छाद्य मूलमंत्रं दशधा संजप्य देवीस्वरूपं पात्रं विभाव्य पूजावसानपर्यंतमीलनं न कार्यमिति॥ अवगुंठनमुद्रा
यथा॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी अवगुंठनमुद्रेयमभितो भ्रामिता सती॥ धेनुमुद्रा तु पूर्वोक्ता॥ अथ योनिमुद्रा तदुक्तं ज्ञाना
र्णवे॥ मध्यमे कुटिलाकारे तर्जन्यापरि संस्थिते॥ अनामिका मध्यगते तथैव हि कनिष्ठिके॥ सर्वा एकत्र संयोज्य अंगुष्ठपरिपीडिताः॥ योनिमु
द्रा समाख्याता त्रैलोक्याह्लादमातृका॥ अथ शंखमुद्रा तदुक्तं ज्ञानार्णवे॥ वामांगुष्ठं परांगुष्ठं नियोज्य सकलांगुलीः॥ दक्षिणस्य करस्यै १६
व वामांगुष्ठेन संस्पृशेत्॥ शंखमुद्रा समाख्याता मंत्रविद्भिः प्रकीर्तिता॥ देवतांगेषडंगैवै सकलीकरणं भवेत्॥ दक्षपाणिपृष्ठदेशे वामपाणि

क्षिपेत्॥ अंगुष्ठौ चालयेत्सम्यङ्मुद्रेयं मत्स्यरूपिणी॥ ततो देव्याज्ञां गृहीत्वा घटश्रीपात्रयोर्मध्ये पात्राणि स्थापयेत्॥ यथा घटसमीपे गुरुपात्रं
ततो देवतापात्रं शक्तिपात्रं योगिनीपात्रं वीरपात्रं बलिपात्रं स्वपात्रं आचमनीयपात्रं क्रमेण स्थापयेत्॥ ततो मीनमांसयुतकारणेन तत्त्वमुद्रया
श्रीपात्रात्स्वमूर्ध्नि श्रीआनंदभैरवं तर्पयामि तिन मंत्रेण त्रिः संतर्प्य॥ आनंदभैरवीं संतर्प्य॥ ऐं अमुकानंदनाथ श्रीगुरुपादुकां तर्पयामीति त्रिः
सकृद्वापि संतर्प्य॥ परमगुरुं परात्परगुरुं परमेष्ठीगुरुं श्रीपादुकां संतर्पयेत्॥ श्रीपात्रामृतेन देवीं सायुधां सवाहनां सपरिवारां संतर्पयेदिति
हृदि॥ तत्त्वमुद्रा यथा॥ तदुक्तं स्वतंत्रे॥ अंगुष्ठानामिकायोगान्मुद्रा महत्त्वस्य पार्वति॥ तर्पयेत्कालिकां देवीं सायुधां सपरिच्छदां॥ ततस्तत्त्वशुद्धिं
कुर्यात्॥ ॐ प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥ १॥ पृथिव्यप्तेजोवाय्वाकाशानि मे शुध्यं २२ ॐ
प्रकृत्यहंकारबुद्धिमनःश्रोत्राणि मे शुध्यंतामित्यादि ३ ॐ त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे शुध्यंतामित्यादि॥ ४॥ ॐ पाणिपादपायूपस्थशब्दा
मे शुध्यंतामित्यादि॥ ५॥ ॐ स्पर्शरूपरसगंधाकाशानि मे शुध्यंतां ज्योति॰॥ ६॥ ॐ वायुतेजःसलिलभूम्यात्मनो मे शुध्यंतां॰॥ ७॥ इति सप्तमं
त्रं पठेत्॥ इति तत्त्वशुद्धिः॥ ततः स्वपात्रामृतेन बिंदुस्वीकारं कुर्यात्॥ मूलमंत्रेण॥ ततः श्रीपात्रामृतेन पूजोपकरणमात्मानं चाभ्युक्ष्य तस्मात्स
र्वं ब्रह्ममयं भावयेदिति ततश्चक्रस्य पूर्वदक्षिणपश्चिमोत्तरेषु त्रिकोणवृत्तमंडलानि विलिख्य॥ ऐं ह्रीं मंडलाय नमः॥ इति मंडलानि संपूज्य
पूर्वेषां बटुकाय॰ इति पाद्यादिभिः संपूज्य॥ आद्यांतपूर्वसलिलमीनमांससपुष्पैर्बलिमुपस्कृत्य बलिपात्रस्थकारणेन वामहस्ततत्त्वमुद्र
या उत्सृजेदनेन एह्येहि देविपुत्र बटुकनाथ कपिलजटाभारभासुर त्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय २ सर्वोपचारसहितं बलिं गृह्ण २
स्वाहा एष बलिर्बटुकाय॰ दक्षिणे यां योगिनीभ्यो नमः॥ इति संपूज्य दक्षांगुष्ठानामिकाभ्यां पूर्ववद्बलिमुपस्कृत्य॥ ऊर्ध्वं ब्रह्मांडतो वा दिवि ग
गनतले भूतले निष्कले वा पाताले वानले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा॥ क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः स
दानः शुचिभवविधिना पांतु वीरेंद्रवंद्याः॥ यां योगिनीभ्यः स्वाहा सर्वयोगिनीभ्यो ॐ फट् स्वाहा॥ एष बलिर्योगिनीभ्यो नमः॥ ततः पश्चिमे क्षां

क्षेत्रपालाय॰ क्षेत्रपालमभ्यर्च्य॥ वामभुक्तिकृतदीर्घयात्तर्जन्या बलिं दद्यात्॥ अनेन मंत्रेण क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्थानक्षेत्रपाल धूपदीपसहि
तं बलिं गृह्ण २ स्वाहा॥ एषबलिः क्षेत्रपालाय नमः॥ उत्तरे॥ गां गणेशाय नमः॥ इति गणेशमभ्यर्च्य दक्षहस्त दंडाकारसर्वांगुलिभिर्मध्यया तु ङ्या
बलिं दद्यात्॥ गां गीं गूं गैं गौं गः॥ गणपतये वर वरद सर्वजनं मे वशमानय बलिं गृह्ण २ स्वाहा॥ एषबलिर्गणपतये नमः॥ अथ स्ववामे॥ अथैवं
उत्तं कृत्वा ऐं ह्रीं व्यापकमंडलाय नमः इति संपूज्य॥ तत्र साधारबलिं संस्थाप्य॥ मूलेनानीय गंधपुष्पधूपदीपादिना संपूज्य॥ ॐ सर्वविघ्नकृ
द्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा॥ एषबलिः सर्वभूतेभ्यो नमः॥ इति तत्त्वमुद्रया निवेदयेत्॥ अशक्तश्चेत् सर्वभूताय बलिमेकं दद्यादेकत्र पंचवाम
तः॥ पूर्ववत् षडंगन्यासं कृत्वा कामकलां विभाव्य तरुणादिवाकररूपां कुसुमांजलिं कूर्ममुद्रया गृहीत्वा मूलाधारात् कुंडलिनीं ऊर्ध्वपथे परमशि
वांतं ध्यात्वा तत्सामरस्यं तेजो तृपदीपकलिकाकारं हृदयाष्टदले पद्मपीठे समानीय मूलेन मूर्तिं प्रकल्पयेत्॥ तदुक्तं तंत्रसारे॥ देवीं सुषुम्णा
मार्गेण आनीय ब्रह्मरंध्रकं वामनासापुटे ध्यात्वा निःसार्य स्वांजलिस्थके पुष्पे आरोप्य तत्पुष्पं प्रतिमादौ निधापयेत्॥ भैरवी तंत्रेपि॥ ततः पू
र्वोक्तरूपां तां ध्यायेच्चैव हि दक्षिणां॥ योगिनीचक्रसहितां महाकालसमन्वितां॥ देवीं सुषुम्णामार्गेणानीय ब्रह्मरंध्रकं॥ कालीतंत्रेपि॥ ततो
हृदयपद्मांतः स्फुरंतीं परमां कलां॥ यंत्रमध्ये समावाह्य न्यासजालं प्रविन्यसेत्॥ कुमारीकल्पेपि॥ ततो हृदयपद्मांतः स्फुरंतीं विद्युदाकृ
तिं॥ सुषुम्नावर्त्मनानीता शिवस्थाने महेश्वरीं॥ ततो वै हृदयासन्नेषु पुष्पांतरे समाविशेत्॥ नासया वामया देवि वायुबीजेन मंत्रवित्॥
देवेशीति च मंत्रेण दृष्ट्वा चावाहयेत् सुधीः॥ अथान्यं ध्यात्वादीपदीपांतरस्थां परमशिवे संयोज्य॥ हृदयाष्टदले समानीय यमिति वायुबी
जमुच्चरन्॥ वामनासापुटे प्रथमेन देवीं स्वहृदयाकुसुमांजलावानीय यंत्रमध्ये समावाहयेदनेन॥ देवेशि भक्तिसुलभे परिवारसमन्विते॥ या
वत्त्वां पूजयिष्यामि तावद्देवि इहावहेति॥ यंत्रमध्ये देवीं संस्थाप्यावाहयेद्यथा॥ महाकालसहिते श्रीमद्दक्षिणकालिके इहागच्छागच्छ इह ति
ष्ठ तिष्ठ इह संनिहिता भव इह संनिरुध्यस्व मम पूजां गृहाण॥ अत्राधिष्ठानं कुरु इत्यावाह्य पूर्ववज्जीवन्यासं लेलिहानमुद्रया कुशाविष्टरेण १७

वा कृत्वा कुं भित्यवगुंठ्य षडंगेन सकलीकृत्य परमीकरणं च कृत्वा छोटिकाभिर्दिशो दिग्बंधनं विधाय अमृतीकरणं कृत्वा॥ कृतांजलिः देवीनाम संबोधनांते
ॐ स्वागतं कुशलं भिदमासनमत्रास्यतामिति वदेत्॥ आवाहनमुद्रा यथा॥ दक्षिणामूर्तिसंहितायां॥ ऊर्ध्वांजलिमधः कुर्यादियमावाहनी भवेत्॥ इयं तु
विपरीता स्यात्तदा संस्थापनी भवेत्॥ ऊर्ध्वांगुष्ठौ मुष्टियुग्मं मुद्रेयं संनिधापिनी॥ अंतरांगुष्ठमुष्टिभ्यां तदेयं संनिरोधिनी॥ लेलिहानमुद्रा यथा॥ तर्जनीमध्य
मानामाः समं कुर्यादधोमुखाः॥ अनामां प्रक्षिपेद्वृत्तामूर्ध्वं कृत्वा कनिष्ठिकां॥ लेलिहानाभमुद्रेयं जीवन्यासे प्रकीर्तिता॥ देवीदक्षिणे महाकालं खड्ग
मुंडवराभयपरयोनीर्दर्शयित्वा॥ देवतांगे षडंगं च सकलीकरणं भवेत्॥ अंजलिं चार्घं च कृत्वा परमीकरणं भवेत्॥ तयोर्योनिमुद्रां खड्गमुंडवराभयेपर
योनिं च दर्शयेत्॥ प्रतिचक्रे रश्मिवृंदं देवता आवाहयेत्॥ तर्पयेच्च॥ तदुक्तं स्वतंत्रे॥ देवीं ध्यात्वा समावाह्य योनिमुद्रां तु दर्शयेत्॥ खड्गमुंडवराभीतिपरयो
नीस्तु दर्शयेत्॥ ततश्च प्रतिचक्रेषु देवीमावाहयेत्तदा॥ अथ खड्गमुद्रा यथा॥ तदुक्तं स्वतंत्रे॥ कनिष्ठानामिके बध्वा चांगुष्ठेनैव दक्षके॥ शेषांगुली तु प्र
स्ते संस्पृष्टे खड्गमुद्रिका॥ अंतरांगुष्ठमुष्टिं च कृत्वा वामकस्य च मध्यमायां दक्षिणस्य तथालंब्य प्रयत्नतः॥ मध्यमेनाथ तर्जन्यां मंगुष्ठाग्रं नियोजयेत्॥
दक्षिणं योजयेत् पाणिं वाममुष्टौ तु साधकः॥ दर्शयेद्दक्षिणे भागे मुंडमुद्रेयमुच्यते॥ वरदाभयमुद्रे च वरदाभयवत्कुरु॥ योनिमुद्रा तदुक्तं मुंडमालातंत्रे॥
तर्जन्यनामिकामध्ये कनिष्ठादिक्रमादपि॥ करयोर्योजयित्वा तु कनिष्ठामूलदेशतः॥ अंगुष्ठाग्रे तु निःक्षिपयेद्योनिमुद्रा प्रकीर्तिता॥ स्वतंत्रे॥ करौ
संपुटकौ कृत्वा कनिष्ठामूलदेशतः॥ अंगुष्ठाग्रं योजयित्वा तु परस्योनिरितीरिता॥ अथ रश्मिवृंददेवता यथा॥ कालिकोपनिषदि॥ ॐ कालीकपा
लिनी कुल्ला कुरुकुल्ला विरोधिनी॥ विप्रचित्ता उग्रा उग्रप्रभा दीप्ता नीला घना बलाका तथा मात्रा मुद्रा मिता चैव दशपंचकोणस्था ध्यात्वा इति॥ अथ
नासां कालीतंत्रे ध्यानं॥ सर्वाः श्यामा असिधरा मुंडमालाविभूषणाः॥ तर्जनीं वामहस्तेन धारयंत्यश्च सस्मिताः॥ इति पूर्वादिपंचदशकोणे ध्यात्वा
वाहयेत्॥ तदुक्तं पेत्कारिण्यां॥ ततः पूर्वादिकोणेषु वामावर्तेन विन्यसेत्॥ ततः पूर्वादि अष्टदले ब्राह्म्यादीश्च प्रपूजयेत्॥ तद्यथा कुलसंभारे॥ बहि
र्मंडलतश्चापि ब्राह्मी नारायणी तथा॥ माहेश्वरी च चामुंडा कौमारी चापराजिता॥ वाराही च तथा पूज्या नारसिंही तथैव च॥ अथ ध्यानं तदुक्तं॥ स्व

तंत्रे॥ ब्रह्माणी हंससमारूढां स्वर्णवर्णां चतुर्भुजां॥ चतुर्वक्त्रां त्रिनेत्रां च ब्रह्म कूर्चं च पंकजं॥ दंडपद्माक्षसूत्रं च दधती चारुहासिनी॥ जटाजूटधरां देवीं ध्या
येत्साधकोत्तमः॥ नारायणी महादीप्तांश्यामां गरुडवाहिनीं॥ नानालंकारसंयुक्तां चारुकेशीं चतुर्भुजां॥ घंटां खड्गं कपालं च चक्रं संदधती परां॥ मधू
मत्तमदोल्लोलदृष्टिं सर्वांगसुंदरीं॥ माहेश्वरी वृषारूढां शुक्लां त्रिनयनान्वितां॥ कपालं डमरुं चैव वरदाभयशूलकं॥ टंकं च दधती देवी नानाभरणभूषितां॥
चामुंडामट्टहासां विकटितदशनां भीमवक्त्रां त्रिनेत्रां नीलांभोजप्रभांतां समुदितवपुषं नारमुंडालिमालां॥ खड्गं शूलं कपालं नरशिरघटितं खेटकं धारयं
तीं प्रेतारूढां प्रमत्तां मधुमदमुदितां भावयेच्चंडरूपां॥ कौमारी कुंकुमाभां च त्रिनेत्रां शिखिसंस्थितां॥ चतुर्भुजां शक्तिपाशांकुशाभयधारिणीं॥ नानालंका
रसंयुक्तां प्रमत्तां परिचिंतयेत्॥ अपराजितां चपीतां भांमक्षसूत्रवरप्रदां॥ कपालं मातुलिंगं च दधतीं परिचिंतयेत्॥ वाराही धूम्रवर्णा च वाराहवदनां शुभां॥
फडकं खड्ग मुसलं हलं वेदैर्भुजैर्युतां॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः॥ अथ पूर्वादिदिक्‌ यत्रैव रुदयः॥ किमथवा पूज्यपूजकयोरंतरे वपूर्वा
दिक्॥ नलन्याविशेषवचनात्॥ तदुक्तं शारदाटीकायां राघवभट्टेन॥ यत्रैव भानुरुत्तिष्ठ युदेति प्राची तु तां वेदविदो वदंति॥ तथा परां पूजकपूजयोश्च सदा
गमज्ञाः प्रवदंति तां तु॥ अन्यच्च॥ अथ पूर्वमुखो मंत्री पूजयेत्सुंदरीं यथा॥ देवीसाधकयोरंतः पूर्वसा दिगिहोच्यते॥ तत्रांतरेपि॥ होतुः पूर्वभागमुद्दिश्य पूर्वं
सव्यं भागं दक्षिणं भागमाहुः॥ दक्षां विद्याद्दुत्तरं भागमग्रं प्रज्ञा विद्भिः पश्चिमं भागमुक्तं॥ अग्रमिति स्वसन्मुखमित्यर्थः॥ एतेन देवपृष्ठमेव प्रतीचीति बो
द्धव्यं॥ यत्तु॥ पुरंदरमुखो मंत्री पूजयेत्त्रिपुरां यदि॥ देवी पश्चात्तदा प्राची प्रतीची त्रिपुरा पुरः इति ज्ञानार्णववचनं॥ तत्तु त्रिपुराविषये बोद्धव्यं॥ देवीमात्र
विषयकल्पने मानाभावात्॥ वचनांतरदर्शनात्॥ तदुक्तं शांभवीये॥ स्वसमुखं भवेत्प्राची देवीपृष्ठं तु पश्चिमं॥ सव्यं तु दक्षिणं विद्याद्दक्षिणं सव्यमेव च॥
इत्येवं विधिना रश्मिदेवतावाह्य स्वाहां तमूलांते श्रीमहाकालसहितां दक्षिणकालिकां तर्पयामीति त्रिः संतर्प्य॥ सायुधां सवाहनां सपरिवारां मपि च तर्पये
त्॥ तर्पयेत्कालिकां देवीं सायुधां सपरिच्छदां॥ पाद्यादिभिर्मूलदेवीं संपूज्य तर्पयेत्पुनः॥ अथ षोडशोपचारो यथा॥ तदुक्तं मंत्ररत्नावल्यां॥ पाद्यार्घ्याचमनी
यं च स्नानं वसनभूषणे॥ गंधपुष्पधूपदीपनैवेद्याचमनं ततः॥ तांबूलमर्पणं स्तोत्रं तर्पणं च नमस्क्रिया॥ प्रयोजयेदर्चनायामुपचारांस्तु षोडश॥ पंचकारि १८

ण्यां॥ आसनं स्वागतं पाद्यमर्घ्यमाचमनं तथा॥ स्नानं वासोपवीतं च भूषणानि च सर्वशः॥ गंधपुष्पं तथा धूपदीपमन्नं च तर्पणं॥ माल्यानुलेपने चै
व नमस्कारं विसर्जनं॥ अष्टादशोपचारैस्तु मंत्री पूजां समाचरेत्॥ आसनं स्वागतं पाद्यं अर्घ्यमाचमनीयकं॥ मधुपर्काचमे स्नानं तथा वसनभूषणे॥
सुगंधधूपदीपौ च नैवेद्यं स्तोत्रवंदने॥ प्रयोजयेदर्चनायामुपचारांस्तु षोडश॥ दशोपचारो यथा॥ अर्घ्यं पाद्यं निवेद्याथ तथैवाचमनीयकं॥ मधुप
र्काचमनं चैव गंधप्रसूनके ततः॥ धूपदीपौ च नैवेद्यं दशोपचारकं स्मृतं॥ पंचोपचारो यथा॥ गंधाद्या नैवेद्यांताः पूजाः पंचोपचारकाः॥ अथ पूजा
यां विशेषो यथा॥ कालीकल्पेपि॥ श्रीपदं पूर्वमुद्धृत्य पादुकां पदमुद्धरेत्॥ पूजयामि ततः पश्चात्पूजयेद्गुरुदेवताः॥ काल्याद्यः पूजनीया क्रमेण
परमेश्वरी॥ स्वाहांतो भेत्तर्पणे च तर्पयामीति संस्मरेत्॥ इति॥ अथ क्रमः॥ देवीदक्षिणभागे महाकालं पूजयेत्॥ यथा कुमारीकल्पे॥ देव्यास्तु द
क्षिणभागे महाकालं समर्चयेत्॥ कालीतंत्रेपि॥ महाकालं यजेद्यादौ पश्चाद्देवीं प्रपूजयेत्॥ अथ मंत्रो यथा॥ ॐ क्षां यां शं लां हां क्षौं महाकालभै
रव सर्वविघ्नान्नाशय २ ह्रीं ह्रीं ह्रीं फट् स्वाहा॥ अनेन पाद्यादिभिराराध्य त्रिस्तर्पयित्वा मूलदेवीं प्रपूजयेत्॥ मूलमंत्रमुच्चार्य॥ एतत्पाद्यं महाका
लसहितायै श्रीमद्दक्षिणकालिकायै नम इति पादपद्मे दद्यात्॥ केषांचिन्मते तु महाकालसहितपदसंवलितदेवीनामप्रयोगो न भवतीति सांप्र
दायिकाः॥ एषोर्घ्यः स्वाहा शिरसि दद्यात्॥ इदमाचमनीयकं मधुपर्कं च नमिति वरुणबीजांतं श्रीमुखपंकजे दद्यात्॥ स्नानीयं नमः॥ सर्वांगे स्नानी
यं॥ दत्वा समुत्थाप्य शुद्धदुकूलेनांगं प्रोक्ष्य विचित्रपट्टवस्त्रद्वयकस्तूरीकुंकुमचंदनसिंदूरकज्जलमुकुटकुंडलताडंकहारत्रयशंखस्वर्णकंकणां
गदग्रीवाभूषणकांचिनूपुररत्नांगुलीयकाद्याभरणानि विविधपुष्परचितमालादिनि निवेद्य केवलजलेन पुनराचमनं दद्यात्॥ तदुक्तं काली
तंत्रे॥ पाद्यं च पादयोर्दद्यात नमोंतेन च मंत्रवित्॥ शिरोमंत्रेण देवेशि अर्घ्यं दद्याच्छिरोपरि॥ आचमनं मधुपर्कं च सुधामंत्रेण वै मुखे॥ स्नानं गंधं
हृदा दद्यात्पुष्पाणि वषडेण च॥ ततो निवेदयामीति दद्यात्सर्वं महेश्वरि॥ सुधामंत्रेणेति वरुणमंत्रेणेत्यर्थः॥ गुप्तार्णवेपि॥ उपेत्याचमनीयं च त्रिवारं
मुखपंकजे॥ अपि च तंत्रांतरे॥ नमः स्वाहा स्वधा चैव वौषडीतियथाक्रमं॥ अत्र लिखितवचनस्येति शब्दवशात्॥ स्वाहासंनिधिपाठाच्च॥ आचम

MEMORIAL

नं स्वधेति वा॥ ॐकारमध्यपाठो युक्तश्चेति वदंति तत्र समीहितं॥ अत्रागमे प्रायः संकेतेन वमंत्रोद्धारः क्रियते॥ एवं मंत्रोद्धारेपि कुत्रापि त
दक्षरेण कुत्रापि जाप्यं च शब्देनापि तत्तन्मंत्रोद्धारोपि दृष्ट इति तस्मादोंकारपाठः किंतु ॐकारमध्यपाठो निर्मूल इति सत्संप्रदायिका वदंति
अन्यथा शारदातीकाकारराघवभट्टलिखितं वचनविरोधमतत यथा मधुपर्कविषये तदुक्तं शारदातीकायां॥ मधुपर्कं मुखे दद्यात् त्र्यालनं
त्रेण देशिकः॥ इत्येवस्त्वनं मधुपर्कं च मनयारेकमंत्रोपादानात्॥ तस्मात्तत्रापि स्वधेति पाठो युक्तः॥ एवमिति निश्चितः॥ ततो मध्यमाना
मिकांगुष्ठैर्गंधो नम इति गंधं॥ अंगुष्ठतर्जनीभ्यां पुष्पाणि वौषट् इति पुष्पांजलिं संपूज्य साक्षतं स्वयंभूकुसुमदकं च दद्यात्॥ धूपपात्रं फ
डिति संप्रोक्ष्य यमिति जप्त्वा पुरतो निधाय वामतर्जन्या संस्पृशन् धूपं निवेदयामीति श्रीपात्रामृतेनाभ्युक्ष्य॥ जयध्वनिमंत्रमातः
स्वाहेति घंटां संपूज्य वामेन वादयन्॥ मध्यमानामिकांगुष्ठैर्धूपं दत्वा देवतागायत्री मूलमंत्रं च पठन् त्रिधोत्तोलनं कृत्वा देवतां धूप
येत्॥ अथ दीपभाजनं सन्मुखे संस्थाप्य॥ पूर्ववत्प्रोक्षणं पूजनं च कृत्वा वाममध्यमया दीपपात्रं संस्पृशन्॥ दीपं निवेदयामीति निवे
द्य॥ पूर्ववत्प्रोक्षणं पूर्ववद्घंटां वादयन्॥ मध्यमानामिकामध्ये दीपपात्रमंगुष्ठाग्रेण धृत्वा दर्शयेत्॥ ततो मधुद्वयं संमुखे कृत्वा
ॐ कालिकालि महाकालि हूं हूं अमृतं मांसं विविधं वस्तु स्वादुकुरु २ स्वाहेति मंत्रेण सप्तधा अभिमंत्र्य त्रिखंडया समुद्रया पात्र
मादाय दक्षिणपाणिना मुष्ट्यादिकं गृहीत्वा कनिष्ठांगुष्ठाभ्यां नियोज्य मूलांते इदं शुध्यादि सहितं मांसं निवेदयामीति दद्यात्
ततो नैवेद्यं सुवर्णादिपात्रे कृत्वा त्रिकोणमंडलोपरि पुरतः संस्थाप्य॥ फडिति संप्रोक्ष्य यमिति वायुबीजेन संशोष्य॥ रमिति वह्निबीजेन सं
दह्य वमिति धेनुमुद्रयामृतीकृत्य मूलं तदुपरि सप्तधा प्रजप्य॥ वामांगुष्ठेन नैवेद्यपात्रं स्पृशन्॥ नैवेद्यं निवेदयामीति दक्षिणहस्तेन दर्शयेत्॥ १९
ततो दक्षहस्तेनानामिकांगुष्ठाभ्यां मुत्सृजेत्॥ ततः पुनराचमनीयं दत्वा कर्पूरादियुक्तं तांबूलं वामांगुष्ठेन धृत्वा तांबूलं निवेदयामीति तत्त्वमुद्रया
दद्यात्॥ सर्वत्रैवार्घ्यजलेनोत्सर्गः कार्यः॥ ततः तत्त्वमुद्रयार्घ्यामृतेन देवीं त्रिः संतर्प्य पूर्ववत्॥ योन्यादिमुद्रादिकं दर्शयेत्॥ तदुक्तं तंत्रसारे॥

मध्यमानामिकाभ्यां तु अंगुष्ठाद्येन पार्वती॥ दद्याच्च विमलं गंधं मूलमंत्रेण देशिकः॥ अंगुष्ठतर्जनीभ्यां तु वक्रे पुष्पं निवेदयेत्॥ यथा गंधं तथा दे
वि धूपं दद्याद्विचक्षणः॥ मध्यमानामिकाभ्यां तु मध्यपर्वणि देशिकः॥ अंगुष्ठाग्रेण देवेशि धृत्वा धूपं निवेदयेत्॥ उत्तोलनं त्रिधा कृत्वा गायत्र्या मूल
योगतः॥ तत्त्वाख्यमुद्रया देवि नैवेद्यं तु निवेद्यं तु निवेदयेत्॥ मूलेनाचमनं दत्वा तांबूलं तेन मुद्रया॥ तेन तत्त्वेनेति सामान्यविशेषणान्वयः॥ शारदाती
कायामपि धूपभाजनमस्त्रेणाप्रोक्ष्याभ्यर्च्य हृदाणुना॥ मंत्रेण पूजितां घंटां वादयन्गुग्गुलं दहेत्॥ अन्यत्रापि॥ जयध्वनिमंत्रमातः स्वाहेत्युदीर्य
च॥ अभ्यर्च्य वादयन्घंटां सुधूपैर्धूपयेत्ततः॥ तंत्रांतरे च॥ ततः समर्पयेद्धूपं घंटां वादन्जयस्वनैः॥ एवं दीपप्रदानेपि घंटां वादयेदिति सांप्रदायिका
राघवभट्टश्च॥ अथ गंधादिनिवेदनस्थानं यथा यामले॥ निवेदयेत्पुरोभागे गंधपुष्पं च भूषणं॥ दीपं दक्षिणतो दद्यात्पुरतो वा न वामतः॥ वामतस्तु य
था धूपमग्रे वा न तु दक्षिणे॥ नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः इति॥ दीपमिति घृतयुक्तं चेद्दक्षिणे॥ तैलयुक्तं चेद्वाम इति सांप्रदायिकाः॥ एवं सि
तावर्तिश्चेद्दक्षिणे रक्तावर्तिश्चेद्वाम इति राघवभट्टः संमुखे न तु नियमः॥ वामदक्षिणभागस्तु देवताया एव न तु साधकस्य वचनांतरदर्शनात्॥ धूपदी
पौ सुभोज्यं च देवताग्रे निवेदयेत्॥ नैवेद्यमिति सिद्धं चेद्देवतावामे आमं चेद्दक्षिण इति बोद्धव्यं पक्वापक्वभेदान्नैवेद्यं कल्पनीयमिति अथ पुष्पनि
यमो यथा॥ मुंडमालातंत्रे तु पुष्पाण्यपि दद्याद्रक्तकृष्णासितानि च॥ श्वेतरक्तजपापुष्पकरवीरे तथा प्रिये॥ नगरं मल्लिका जाती मालती यूथि
का तथा॥ धूसकाशोकबकुला श्वेतकृष्णापराजिता॥ बकपुष्पं बिल्वपत्रं चंपकं नागकेसरं॥ मल्लिका सिंटिकाकांची रक्तं यत्सरिकीर्तितं॥ अर्क
पुष्पं जयंती च चर्वनं च प्रियं वृषे॥ अष्टम्यां च विशेषेण तुष्टा भवति पार्वती॥ पद्मपुष्पेण रक्तेन सर्वं तुष्टाः सर्वदेवताः॥ कृष्णां च यदि वा शुक्लं कालि
का वरदा भवेत्॥ श्मशानधत्तुरैश्चैव तुष्टा धूमावती परा॥ वनपुष्पैश्च विविधैः संतुष्टा देवि पार्वती॥ आमलक्यास्तु पत्रेण तुष्टा भवतु पार्वती॥ अष्ट
म्यां च चतुर्दश्यां नानापुष्पैः समर्चयेत्॥ विशेषेनाशनिभोमनिशीतिन॥ मत्स्यसूक्तेपि॥ सुगंधिश्वेतलोहितकुसुमैरर्चयेद्दलैः॥ बिल्वैर्मुनिवका
येश्च तुलसीवर्जितैः शुभैः॥ ओड्रपुष्पैर्विशेषेण रजःपुष्पेण मिश्रितैः॥ सर्वपुष्पं प्रदद्याच्च भक्तियुक्तेन चेतसा॥ शारदातीकायां॥ सर्वैः पुष्पैः

श्या·र· १९

नंस्वधेतिवा॥ॐकारमध्यपाठोयुक्तश्चेतिवदंतितत्रसमीहितं॥अत्रागमेप्रायःसंकेतेनैवमंत्रोद्धारःक्रियते॥एवंमंत्रोद्धारेपिकुत्रापित
दक्षरेणाकुत्रापिजात्यंचशब्देनापितत्तन्मंत्रोद्धारोपिदृष्टइतितस्मादोंकारपाठः किंतुॐकारमध्यपाठोनिरूढइतिसत्संप्रदायिकावदंति
अन्यथाशारदाटीकाकारराघवभट्टलिखितवचनविरोधमततयथामधुपर्कविषयेतदुक्तंशारदाटीकायां॥मधुपर्कंमुखेदद्यात्जलमं
त्रेणदेशिकः॥इत्येवस्वचनंमधुपर्कांचमनयोरेकमंत्रोपादानात्॥तस्मात्तत्रापिस्वधेतिपाठोयुक्तः॥एवंतिनिश्चितः॥ततोमध्यमाना
मिकांगुष्ठैर्गंधोनमइतिगंधं॥अंगुष्ठतर्जनीभ्यांपुष्पाणिवौषट्इतिपुष्पाणित्रिसंपूज्यसाक्षतंस्वयंभूकुसुमादिकंचदत्वा॥धूपपात्रंफ
डितिसंप्रोक्ष्ययमितिजलेनापुरतोनिधायवामतर्जन्यासंस्पृशन्धूपंनिवेदयामीतिश्रीपात्रामृतेनोत्सृज्य॥जयध्वनिमंत्रमातः
स्वाहेतिघंटांसंपूज्यवामेनवादयन्॥मध्यमानामिकांगुष्ठैर्धूपंदत्वादेवतागायत्रींमूलमंत्रंचपठन्त्रिधोत्तोलनंकृत्वादेवतांधूप
येत्॥अथदीपभाजनंसन्मुखेसंस्थाप्य॥पूर्ववत्प्रोक्षणंपूजनंचकृत्वावाममध्यमयादीपपात्रंसंस्पृशन्॥दीपंनिवेदयामीतिनिवे
द्य॥पूर्ववत्प्रोक्षणंपूर्ववद्घंटांवादयन्॥मध्यमानामिकामध्येदीपपात्रेमंगुष्ठाग्रेणधृत्वादर्शयेत्॥ततोमधुरत्र्यंसंमुखेकृत्वा
ॐकालिकालिमहाकालिकेइंअमृतंमांसंवंविधिवत्खादकुरु२स्वाहेतिमंत्रेणसप्तधाअभिमंत्र्यत्रिखंडग्रासमुद्रयापात्र
मादायदक्षिणपाणिनामुध्यादिकंगृहीत्वाकनिष्ठांगुष्ठाभ्यांनियोज्यमूलांतेइदंशुध्यादिसहितंमांसंनिवेदयामीतिदद्यात्
ततोनैवेद्यंसुवर्णादिपात्रेकृत्वात्रिकोणमंडलोपरिपुरतःसंस्थाप्य॥हुमितित्यवगुंठ्ययमितिवायुबीजेनसंशोष्य॥रमितिवह्निबीजेनसं
दह्यवमितिधेनुमुद्रयामृतीकृत्यमूलंतदुपरिसप्तधाप्रजप्य॥वामांगुष्ठेननैवेद्यपात्रंस्पृशन्॥नैवेद्यंनिवेदयामीतिदक्षिणहस्तेनदर्शयेत्॥
ततोदक्षहस्तेनानामिकांगुष्ठाभ्यामुत्सृजेत्॥ततःपुनराचमनीयंदत्वाकर्पूरादियुक्तंतांबूलंवामांगुष्ठेनधृत्वातांबूलंनिवेदयामीतितत्वमुद्रया १९
दद्यात्॥सर्वमेवार्घ्यजलेनोत्सर्गःकार्यः॥ततःस्तत्वमुद्रयार्घ्यामृतेनदेवींत्रिःसंतर्प्यपूर्ववत्॥योन्यादिमुद्रादिकंदर्शयेत्॥तदुक्तंतंत्रसारे॥

मध्यमानामिकाभ्यांतुअंगुष्ठाद्येनपावती॥दद्याच्चविमलंगंधंमूलमंत्रेणदेशिकः॥अंगुष्ठतर्जनीभ्यांतुदत्तपुष्पंनिवेदयेत्॥यथागंधंतथादे
विधूपंदद्याद्विचक्षणः॥मध्यमानामिकाभ्यांतुमध्यपर्वणिदेशिकेः॥अंगुष्ठाग्रेणदेवेशिधृत्वाधूपंनिवेदयेत्॥उत्तोलनंत्रिधाकृत्वागायत्र्यामूल
योगतः॥तत्वाख्यमुद्रयादेवीनिवेद्यंतुनिवेद्यंतुनिवेदयेत्॥मूलेनाचमनंदत्वातांबूलंतेनमुद्रया॥तेनतत्वेनेतिसामान्यविशेषणान्वयः॥शारदाटी
कायामपिधूपभाजनमभ्येत्यप्रोक्ष्याभ्यर्च्यहृदाणुना॥मंत्रेणपूजितांघंटांवादयन्गुग्गुलंदहेत्॥अन्यत्रापि॥जयध्वनिततोमंत्रमातःस्वाहेत्युदीर्य
च॥अभ्यर्च्यवादयन्घंटांसुधूपैर्धूपयेत्ततः॥तंत्रांतरेच॥ततःसमर्पयेद्धूपंघंटावादनजयस्वनैः॥एवंदीपप्रदानेपिघंटांवादयेदितिसांप्रदायिकाः
राघवभट्टश्च॥अथगंधादिनिवेदनस्थानंयथायामले॥निवेदयेत्पुरोभागेगंधपुष्पंचभूषणं॥दीपंदक्षिणतोदद्यात्पुरतोनानवामतः॥वामतस्तुय
था॥धूपमग्रेवान्तुदक्षिणे॥नैवेद्यंदक्षिणेभागेपुरतोवामपृष्ठतइति॥दीपमितिघृतयुक्तंचेद्दक्षिणे॥तैलयुक्तंचेद्वामइतिसांप्रदायिकाः॥एवंसि
तावर्तिश्चेद्दक्षिणेरक्तावर्तिश्चेद्वामइतिराघवभट्टःसंमुखेनतुनियमः॥वामदक्षिणभागस्तुदेवतायाएवनतुसाधकस्यवचनांतरदर्शनात्॥धूपदी
पौसुभोज्यंचदेवताग्रेनिवेदयेत्॥नैवेद्यमितिसिद्धंचेद्देवतावामेआमंचेद्दक्षिणइतिबोद्धव्यंपक्वापक्वभेदान्नैवेद्यंकल्पनीयमितिअथपुष्पाणि
यमोयथा॥मुंडमालातंत्रात्पुष्पाण्यपिदद्याद्यारक्तकृष्णसितानिच॥श्वेतरक्तजपापुष्पकरवीरंतथाप्रिये॥नगरंमल्लिकाजातीमालतीयूथि
कातथा॥भूसकाशोकबकुलाश्वेतकृष्णापराजिता॥बकपुष्पंबिल्वपत्रंचंपकंनागकेसरं॥मल्लिकासिंदिकाकांचीरक्तंयत्सारिकीर्तितं॥अर्क
पुष्पंजयंतीचचर्चनंचप्रियंवदे॥अष्टम्यांचविशेषेणतुष्टाभवतिपार्वती॥पद्मपुष्पेणरक्तेनसंतुष्टाःसर्वदेवताः॥कृष्णांचयदिवाशुक्लंकालि
कावरदाभवेत्॥श्मशानधत्तुरेश्चैवतुष्टाधूमावतीपरा॥वनपुष्पैश्चविविधैःसंतुष्टादेविपार्वती॥आमलक्यास्तुपत्रेणतुष्टाभवतुपार्वती॥अष्ट
म्यांचचतुर्दश्यांनानापुष्पैःसमर्चयेत्॥विशेषेणाशनिभौमनिशीतिच॥मत्स्यसूक्तेपि॥सुगंधिश्वेतलोहितकुसुमैरर्चयेद्दलैः॥बिल्वैर्मुनिवका
द्यैश्चतुलसीवर्जितैःशुभैः॥ओड्रपुष्पैर्विशेषेणरजःपुष्पेणमिश्रितैः॥सर्वपुष्पंप्रदद्याच्चभक्तियुक्तेनचेतसा॥शारदाटीकायां॥सर्वैःपुष्पैः

सदाभक्त्याविहिता। विहितैरपि॥ कर्तव्याः सर्वदेवानां भक्तियोगोत्रकारणं॥ देवानामप्युपलक्षणं॥ देवानामिमिनिबोद्धव्यं॥ तदुक्तं योगिनीतंत्रे॥ दे
वीपूजासदाशस्ताजलजैस्थलजैरपि॥ विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन चेतसा॥ नीलतंत्रेपि॥ नानापहारबलिभिर्नानापुष्पैर्मनोरमैः॥ अपामा
र्गदिलेभृंगेतुलसीदलवर्जितैः॥ पूजनीयासदाभक्त्यान्ननंशीघ्रफलाप्तये॥ अथपुष्पदानविधानं॥ यथातदुक्तंफेत्कारीतंत्रे॥ पुष्पंवायदिवाप
त्रंफलंनैवाधोमुखं॥ दुःखदंतत्समाख्यातंयथोत्पन्नंतथार्पणं॥ अधोमुखंफलंचैवपुष्पांजलिविधौनतु॥ अथनैवेद्यंतदुक्तंमत्स्यसूक्ते॥ पा
यसंकृसरंदद्यात्छर्करागुडसंयुतं॥ गव्यंसर्पिर्मधुपयस्तथान्यानिनिवेदयेत्॥ शालमत्स्यचपाठीनंगोधामांसमनुत्तमं॥ अन्नंचमधुनायुक्तंय
त्नाद्द्याच्चमंत्रवित्॥ कृसरमितितिलतंडुलांपाठीनंवोरालमिति॥ अन्यत्रापि॥ कंडुपक्वंस्नेहपक्वंघृतपक्वंचपायसं॥ मनःप्रियंचनैवेद्यंदद्या
द्देव्यैप्रयत्नतः॥ कंडुपक्वमितिभ्रष्टतंडुलपृथुकादिकं॥ स्नेहपक्वंतंडुलादि॥ कुमारिकल्पेपि॥ तांबूलंचसकर्पूरंनारिकेलंसशर्करं॥ पायसं
सघृतंचैवआर्द्रकंसगुडंतथा॥ सतंडुलतिलंचैवदधिचैवसशर्करं॥ जांबीरंपनसंचैवमाम्रातकफलंतथा॥ कदली तिंतिलीदेवीश्रीफलं
फलमुत्तमं॥ करंजंबकुलंचैवतालंखर्जूरमेवच॥ अन्यानीवसुगंधीनिसुस्वादूनिफलानिच॥ मुंडमालातंत्रेपि॥ दधिक्षीरंगुडंचान्नंपाय
संशर्करान्वितं॥ पायसंक्षौद्रमांसंचनारीकेलंसमोदकं॥ शशाकंमेषखड्गश्चसोर्द्रकंसहशर्करं॥ रंभाफलंलड्डुकंचैवभर्जितान्नंचपिष्ट
कं॥ शालमत्स्यंचपाठीनंसंकुलमुद्गरंतथा॥ जलजंमत्स्यं॥ मधुजवाल्लिसंदद्यान्मांसंमाहिषमेवच॥ पक्षिमांसंवराहस्यमांसंनानासमु
द्भवं॥ कृष्णाछागंमहामांसंगोधिकाहरितंतथा॥ जलजंमत्स्यमासंचगंडकीमांसमेवच॥ नानाव्यंजनयुक्तानिदुग्धानिचबहूनिच॥ नंत्रां
तरेपि॥ नरछागास्तथामेषामहिषाःशशकास्तथा॥ एतेषांचैवरक्तानिदेयानिपरमेश्वरी॥ नरबलीदानंमहीभृताकार्यं॥ नान्येनेत्यर्थः॥
तदुक्तंयामले॥ राजानरबलिंदद्यान्नान्योपिपरमेश्वरि॥ अथनैवेद्यपात्रंयथातदुक्तं॥ रुद्रयामले॥ तैजसेषुचपात्रेषुसौवर्णेराजतेतथा॥ ता २०
म्रेवाप्रस्तरेवापिपद्मपत्रेथवाततः॥ यज्ञदारुमयेवापिनैवेद्यंकल्पयेद्बुधः॥ सर्वाभावेचमाहेयस्वहस्तघटितेयदि॥ यद्योगाभर्घ्यपात्रेतु

तद्विधायनिवेदयेत्॥ अन्यतोयेर्यदुत्सृष्टमर्घ्यपात्रस्थितेतरे॥ नगृह्णंतिमहादेविदत्तेविधिशतैरपि॥ एषामन्यतमेपात्रेकृत्वानैवेद्यमर्पयेत्॥ नै
वेद्यक्रमश्चस्वतंत्रे॥ दक्षिणेवापुरोभागेवामेवामंडलंलिखेत्॥ त्रिकोणवृत्तभूबिंबमाधारंशक्तिमर्पितं॥ नैवेद्यंतत्रसंस्थाप्यप्रोक्षयेदस्त्रमंत्रे
नः॥ कवचेनावगुंठ्यैतन्मूलंसंशोध्यवायुना॥ रमितिबीजेनसंदह्यामृतेनामृतीकृतं॥ पुष्पंदत्वातत्रमंत्रंसप्तधाप्रजपेत्सुधीः॥ ततःसमुत्सृजे
दर्घ्यतोयंमूलादिमंत्रतः॥ सर्वोपकरणादीनिमूलांतेननिवेदयेत्॥ अशक्तोमनसादद्याद्देवंकर्मनलोपयेत्॥ अमृतोपस्तरणमसिस्वाहेतितद
नंतरं॥ चुलकंप्राशयित्वाचपंचमुद्राःप्रदर्शयेत्॥ प्राणापानौतथाव्यानउदानश्चसमानकः॥ चतुर्थ्यंतानिजायांतामुद्रामंत्राःक्रवादिकाः॥ वृद्धा
नामाकनिष्ठाभिःप्राणमुद्रासमीरिता॥ हस्यामध्यातर्जनीभिरपानस्यप्रकीर्तिता॥ वृद्धानामामध्यमाभिर्व्यानमुद्रासमीरिता॥ कनिष्ठावर्जसर्वाभि
रुदानस्यसमीरिता॥ समानमुद्रासर्वाभिरंगुलीभिरितीरिता॥ वामहस्तेथासमुद्राविकचोत्पलसंनिभा॥ ततःसुवासितजलंदद्यात्स्वर्णादिभाजने॥
ॐअमृतापिधानमसिस्वाहेतिचमनुंपठेत्॥ पुनश्चचुलकंदत्वादद्यात्तांबूलमुत्तमं॥ एलालवंगकर्पूरजातीफलपरिष्कृतं॥ सर्वाण्येतान्यर्घ्यजलेर्देया
नि॥ अर्घ्यपात्राणिपुनः॥ श्रीतत्वचिंतामणौचतुर्थप्रकाशे॥ अथकृतांजलिः॥ श्रीदक्षिणकालिकेआवरणंसंपूजयामीत्युक्त्वागृहीत्वा॥ अग्नीशासुर
वायव्यसंमुखेषुचदिग्वस्त्रेचषडंगदेवता ध्यात्वाषडंगमंत्रेणार्चयेत्॥ तदुक्तंज्ञानार्णवे॥ अग्नीशासुरवायव्येमध्येदिक्षुस्त्रदेवताः॥ इत्थंहृदयमा
ग्नेय्यामैशान्यांतुशिरोभवेत्॥ नैरृत्यांतुशिखापूज्यावायव्यांकवचंयजेत्॥ यजेन्नेत्रंपुरतोनेत्रंदिक्षुशस्त्रमथार्चयेत्॥ अपिच॥ वह्न्यादिदिक्षुवापूज्यं
तत्तदंगेषुवाक्रमः॥ अथषडंगदेवताध्यानंयथातदुक्तंज्ञानार्णवे॥ तुषारस्फटिकश्यामनीलकृष्णारुणास्तथा॥ वरदाभयधारिण्यःप्रधानतनवस्त्रि
यइततोगुरुपंक्तिक्रमंवायव्यादीशानपर्यंतयजेत्॥ तदुक्तंशारदातिलकायांवायव्यादीशपर्यंतंगुरुपंक्तिंसमर्चयेत्॥ ततोदेवऋषिमिति अथगुरुपं
क्तिर्यथाभावचूडामणौ॥ भैरवउवाच॥ मातर्देविमहाभागेधर्ममोक्षप्रवर्तिनि॥ इदानींश्रोतुमिच्छामिगुरुक्रममनुत्तमं॥ देव्युवाच॥ गुरुक्रमस्तुबहुधा
ग्रंथेविस्तरगौरवात्॥ कालानामप्यनादित्वात्कथंतत्कथयामिते॥ नज्ञात्वातत्कुलंदेवनष्टमार्गोभविष्यति॥ नष्टमार्गोन्मंत्रविघ्नेनताद्दृक्फलगोचरे॥

गुरूणां शिष्यभूतानांना स्त्रिचेसंततिक्रमः ॥ तत्रमंत्राश्चविद्याश्चनिष्फलानात्रसंशयः ॥ विंशतिः पुरुषावापिनवसप्तत्रयोपिवा ॥ नज्ञात्वा गुरुवंशानां
शिष्यश्चेन्नष्टसंततिः ॥ स्ववंशादधिकंज्ञेयं गुरुवंशंमहाशुभं ॥ जनकादधिकोज्ञेयोमंत्रदस्तुमहेश्वरः ॥ तस्मात्सर्वत्रदेवेशसंक्षेपाच्छृणुतान्गुरून् ॥ आ
दौसर्वत्रदेवेशमंत्रदः परमोगुरुः ॥ परापरागुरुस्त्वंहिपरमेष्ठीगुरुस्त्वहं ॥ सर्वमंत्रेषुविद्यासुस्वयंप्रकृतिरूपिणी ॥ ततः पुरुषरूपश्चततश्चगुरुसंततिः
तेनैवहिमदंशाश्चमञ्जकाश्चविशेषतः ॥ सर्वमंत्रेषुगुरवः सर्वत्रसिद्धिदायकाः ॥ शिवश्चैयाश्चयविद्यास्तापिसर्वत्रदेशिकाः ॥ गणेशागाणपत्याश्चगण
दीक्षाप्रभुर्मता ॥ सौरास्तथावत्सविष्णुर्यावाविष्णुपरायणाः ॥ दिव्याघागुरवोदेवसिद्धाघागुरवस्तथा ॥ मानवौघाः समासेनकथयामितवाग्रतः ॥ स
र्वमंत्रेषुतंत्रेषुप्रोक्तामंत्रचतुष्टयी ॥ तत्रादौकालिकादेवीतस्याः शृणुगुरुक्रमं ॥ महादेवीमहादेवस्त्रिपुरश्चैवभैरवः ॥ दिव्यौघागुरवः प्रोक्तासिद्धौघा
न्कथयामिते ॥ ब्रह्मानंदः पूर्णदेवः चलचित्तश्चलाचलः ॥ कुमारःक्रोधनश्चैववरदः स्मरदीपनः ॥ मायामायावतीचैवमानवौघान्शृणुप्रिये ॥ वि
मलः कुशलश्चैवभीमसेनः सुधाकरः ॥ मीनोगोरक्षकश्चैवभोजदेवः प्रजापतिः ॥ मूलदेवोरंतिदेवोविघ्नेश्वरहुताशनो ॥ समयानंदसंतोषो
कालिकागुरवस्तथा ॥ अत्रदेवीप्रतीभैरववाक्यं ॥ दिव्यावस्तिरवंनित्यंसिद्धाभूमावहापिच ॥ मानवोमामानवेषुममरूपधरासदा ॥ आनंद
नाथशब्दांतगुरवः सर्वसिद्धिदाः ॥ स्त्रियापिगुरुरूपाश्चदंशातः परिकीर्तिताः ॥ मानवौघांतिकेदेविस्वगुरुंपरिपूजयेदिति ॥ अथवाप्रातःकृत्येयत्स
मान्यगुरुमुक्तंतदेवार्चयेत ॥ तद्यथातदुक्तंभावचूडामणौ ॥ अथवासर्वशास्त्रेषुगुरवः पूर्वसूचिताः ॥ कुलचूडामणौ ॥ एकचितमनाभूत्वा शृणु
वत्ससमाहितः ॥ येषुयेषुचमंत्रेषुयेयऋषिगणाः स्मृताः ॥ तेतेपूज्याः सपर्यादौसंक्षेपाऋदितंमया ॥ अज्ञात्वागुरुनाम्नावैगुरुत्रितयमर्चयेत ॥
चतुष्टयंवासंकोचान्नचकार्यंततः परं ॥ गुरुः परगुरुश्चैवपरापरगुरुस्ततः ॥ परमेष्ठीगुरुश्चैवकथितागुरवस्ततः ॥ गुरुपूजांविनावत्सयदिपू
जांसमाचरेत ॥ तद्दोषशमनेवत्सकुलपूजांसमाचरेत ॥ विगुणंयत्रयत्रस्यात्सगुणंकुलपूजनात ॥ कुलावलोकनंचेस्यात्कुलप्रोक्षणमार्जनं ॥ क्व २१
चस्नानंकचाशुद्धिः क्वचन्यासविशोधनं ॥ दीक्षाप्रभुः कुलीनश्चकुलंवाबटुकेश्वरः ॥ तद्देहेगुरुमानीयकुलरूपंगुरुंस्मरेत ॥ कुलंयत्रगुरुस्तत्र

नतथाकुलसाधकः ॥ गुरुक्रमंचकथितंगोपनीयंप्रयत्नतः ॥ नदेयंयत्रकुत्रापियोगभ्रंशंचचुंबके ॥ परोरथेनचैतंत्वेत्रामयायंकुलेश्वर ॥ वेष्ण
वेशाक्ततंत्रेवागाणपत्येवाथपुनः ॥ निजगुरुंततोध्यात्वाततोगुरुचतुष्टयं ॥ पूजयित्वाजपेदेवनैवसंकोचमाचरेत ॥ अथप्रयोगः ॥ श्रीमहादे
व्यंबाश्रीपादुकांपूजयामिनमः ॥ इतिसंपूज्यपूर्ववत्तर्पयेत ॥ गुरुपात्रामृतेनत्रिः सकृद्वातर्पयेत ॥ एवंश्रीमहादेवानंदनाथश्रीपादुकांपूज
यामिनमः ॥ संपूज्यपूर्ववत्तर्पयेत ॥ एवंक्रमेणगुरुपंक्तित्रयंसंपूज्य ॥ मानवौघांतिकेस्वगुरुत्रयंसंपूज्यतर्पयेच्च ॥ ततोरश्मिवृंददेवताः पूज
येत्तर्पयेच्चयथा ॥ बाह्यत्रिकोणस्यसंमुखकोणे ॥ ॐ कालीश्रीपादुकापूजयामिच ॰ मध्यादिपाद्यादिभिस्त्रिः संपूज्ययोगिनीपात्रामृतेनत
च्चमुद्रयात्रिः सकृद्वातर्पयेत ॥ एवंदेव्यावामे ॥ ॐ कपालिनीश्री ॰ दक्षेॐ कुल्लाश्री ॰ तदंतः स्त्रिकोणे ॥ ॐ कुरुकुल्ला ॰ ॐ विरोधिनी ॰ ॐ वि
प्रचित्ता ॰ तदंतस्त्रिकोणेॐ उग्रा ॰ ॐ उग्रप्रभा ॰ ॐ दीप्ता ॰ तदंतस्त्रिकोणे ॥ ॐ नीला ॰ घना ॐ बलाका ॥ तदंतस्त्रिकोणे ॐ मात्रा ॰ ॐ मुद्रा ॰
ॐ मिता ॰ पाद्यादिभिः पूर्ववत्पूजयेच्च ॥ देव्यादक्षिणेमहाकालंपूजयेत ॥ तदुक्तंकुमारिकल्पे ॥ देव्यास्तुदक्षिणेभागेमहाकालंसमर्चयेत ॥ त
तोष्टदलेपूर्वादिक्रमेणाष्टशक्तीः पूजयेद्यथा ॥ पूर्वे ॥ आंब्राह्मीश्रीपादुकांपूजयामिनमः ॥ इतिपाद्यादिभिस्त्रिः संपूज्यतर्पयेत ॥ अग्निकोणेॐ ई
नारायणीश्री ॰ दक्षिणेऊंमाहेश्वरी ॰ नैर्ऋत्यांॐ ऋंचामुंडाश्री ॰ वारुणेॐ लृंकौमारीश्री ॰ वायव्यांऐंअपराजिताश्री ॰ उदीच्यांॐ वाराही
श्रीपा ॰ ईशानेॐ अः नारसिंहीश्री ॰ पूर्ववत्पूजयेत्तर्पयेत ॥ तदुक्तंश्रुतौ ॥ द्वितीयचतुर्थषष्ठाष्टदशद्वादशचतुर्दशषोडशस्वरभेदेनप्रथमे
नयंत्रमंत्रक्रमेणावाहनंपूजनमिति ॥ कुमारिकल्पे ॥ ब्राह्म्याद्याः पूजयेत्पत्रपत्राग्रेभैरवान्यजेत ॥ लोकपालांस्ततोबाह्येतदस्त्राणिचतद्बहिः
अथभैरवायथाज्ञानार्णवे ॥ असितांगोरुरुश्चंडःक्रोधश्चोन्मत्तभैरवः ॥ कपालीभीषणश्चैवसंहारश्चाष्टमस्मृतः ॥ एषांमंत्रोयथा ॥ कृशानो
बिंदुसंयुक्तावाद्याबिंदुभूषिता ॥ इति ॥ अथप्रयोगः ॥ पत्राग्रपूर्वादिवामावर्तेनपूजयेद्यथा ॥ ऐंक्लींअंअसितांगभैरवश्रीपा ॰ ऐंह्रींइंरुरु
भैरवश्रीपा ॰ ऐंक्लींउंचंडभैरवश्री ॰ ऐंक्लींऋंक्रोधभैरवश्री ॰ ऐंह्रींलृंउन्मत्तभैरवश्री ॰ ऐंह्रींएंकपालिभैरवश्री ॰ ऐंक्लींॐ भीषणभैरवश्रीपा ॰

ऐं ह्रीं अं संहारभैरवं पूर्ववत्॥ ततो भूवृत्ते चतुरस्रे लोकपालानूतदस्त्राणि पूजयेत्॥ यथा पूर्वोदितः॥ लं इं इन्द्रश्री पा॰ एवं रं अग्नि॰ यं यमं क्षं निर्ऋ
तिं वं वरुणं। यं वायुं ईं कुबेरं हों ईशानं॥ इं इन्द्रेशानयोर्मध्ये ह्रीं ब्रह्माणं॥ नैर्ऋतिवरुणयोर्मध्ये अं अनंतं पूर्ववत्संपूज्य तर्पयेच्च॥ चतुरस्रे वायेए
तेषामस्त्राणि तत्तत्स्थले यजेद्यथा॥ ॐ वं वज्रं श्री॰ शं शक्तिं दं दंडं खं खड्गं पां पाशं अं अंकुशं गं गदां शूं शूलं पं पद्मं चं चक्रं एवं क्रमेण सर्वा दिव्यदे
वता अनुलेपनगंधपुष्पधूपदीपपानद्रव्यादिभिः संपूज्य त्रिः सकृद्वा तर्पयेत्॥ तदुक्तं ज्ञानार्णवे॥ त्रिवारं तर्पयेद्वापि अशक्तो वा यथेच्छया तिका
लीतंत्रेपि॥ सर्वासामपि दातव्या बलिः पूजा तथैव च॥ अनुलेपनकं गंधं धूपदीपौ च पानकं॥ त्रिः पूजा च प्रकर्तव्या सर्वासामपि साधकैः॥ ततो देव्या
अस्त्राणि पूजयेद्यथा॥ देवीवामोर्ध्वहस्ते॥ ॐ खं खड्गं तदधो मुंडं॥ वरदो र्ध्वे॥ अभयं॥ तदधो वरं पूजयन्तर्पयेत्॥ तदुक्तं यामले॥ ततः संपूजये
द्देव्या अस्त्राणि क्रमयोगतः॥ वामे खड्गश्च मुंडश्च वामे दक्षिणे च वराभयमिति॥ ततः षडंगन्यासं विधाय॥ पूर्ववद्देव्याः गंधपुष्पाक्षतधूपदीपा
न्दत्वा॥ पूर्ववद्घंटां वादयन्॥ धूपदीपान् दर्शयेत्॥ ततः पानादिद्रव्यं दत्वा पूर्ववन्नैवेद्यं निवेद्य त्रिस्तर्पयेत्॥ ततः पुष्पांजलित्रयेण देवीं संपू
ज्य सायुधसवाहनसपरिवारमहाकालसहितश्रीदक्षिणाकालिकां पूजयामि नमः॥ इति पुष्पांजलित्रयेण संपूज्य त्रिस्तर्पयेत्॥ ततो योनिमुद्रा
दिकं दर्शयेत्॥ तदुक्तं स्वतंत्रे॥ ततः पुनर्मूलदेवीं मुद्रातर्पणपूजनैः॥ भर्त्सयित्वा जपं कृत्वा नत्वा विसर्जयेत्सुधीः॥ कालितंत्रे॥ एवं पूजां पुरा कृ
त्वा नियमेन यथाविधि॥ नैवेद्यादीन्यथाशक्ति दद्याद्देव्यै पुनः पुनः॥ ततो वै दशवारं तु दीपं दत्वा च साधकः॥ पुष्पादिकं पुनर्दद्यान्मूलेनैव यथावि
धि॥ कुमारीकल्पे॥ ततो नीराजनं कुर्याद्दशवारं प्रदीपकैरिति॥ अथोत्तरे त्रिकोणमंडलमालिख्य मांसमीनरक्तपुष्पाज्यतंडुलान्कीकृत्य तत्त्व
संस्थाप्य संशोध्य च॥ ॐ क्रीं श्रीदक्षिणकालिकायै स्वाहा एष बलिर्नमः इत्युत्सृज्य नैर्ऋत्यां धारयेदिति॥ तदुक्तं स्वतंत्रे॥ पूजांते भोजनादौ च ब
लिं दद्यान्महेश्वरि॥ ततः प्राणायामं कृत्वा कामकलां विभाव्य शिरसि गुरुं ध्यात्वा हृदि देवीं भावयन्मनसा अष्टोत्तरसहस्रं रहस्यमालायाः कर २२
मालाया वा संतुं कृत्वा प्रजप्य पुनः प्राणायामं विधाय ार्घ्यजलं पुष्पादिकं गृहीत्वा॥ ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु

मे देवि त्वत्प्रसादान्महेश्वरि॥ इति मंत्रेण तेजोमयं जपजलं देव्या वामहस्ते समर्पयेत्॥ तदुक्तं कालीतंत्रे॥ ततः सावहितो मंत्री गुरुं नत्वा शिरस्थि
तं॥ देवीं ध्यात्वा वाष्टोत्तरसहस्रं प्रजपेन्मनुं॥ तेजोमयं जपजलं देव्या हस्ते समर्पयेदिति॥ गुह्यातिगुह्यगोप्त्री त्वमिति मंत्रेण मंत्रवित्॥ रहस्यमा
लाया वर्णमालिया कर्णमालया॥ तत्र रहस्यमाला यथा॥ तदुक्तं काली तंत्रे॥ दंताक्षमालया चैवं राजदंतेन मेरुणा॥ प्रजपेदित्यर्थः॥ तस्य द्वा
दशपटले पि दंताक्षमालिकासात्पूर्वो क्ताभुविदुर्लभेति॥ रहस्यमालाशोधनं यथा॥ तदुक्तं काली कुलार्णवे॥ ॐ ह्रीं श्रीं ह्रीं क्रीं क्लीं हूं
फट् स्वाहेति मंत्रेण सप्तधाभिमंत्र्य चषके निक्षिपेत्॥ तत्रावाहनादि मंत्रादिभिर्भगवतीं समावाह्य सपरिवारां भगवतीं षोडशोपचारैरभ्यर्च्य
मूलमावर्त्य दशधा तातः श्रवबीजमनुस्मरन् धेनुमुद्रयामृतीकृत्य कवचेन विगुण्ठ्य महारुद्रया तां आच्छाद्य देवीरूपां तां मालां ध्यायन्॥
बिंदुप्रक्षेपं कुर्यात्॥ तत्र मंत्रः॥ ॐ क्रीं स्वाहा॥ ॐ फट् स्वाहा॥ ॐ क्रीं स्वाहा॥ ॐ रूं क्रीं स्वाहा॥ ॐ फट् स्वाहा॥ अनेन मंत्रेण बिंदुप्रक्षेपं
कुर्यात्॥ कस्तूरिकासुधाकारागुरुधूपादिकं कृत्वा विषकाद्युत्तार्याभिमंत्रः॥ ॐ ह्रीं श्रीं महावज्रिणि घोररूपे कर्कशे महाश्मशानमंडले
प्रविश सर्वसिद्धिं प्रयच्छ॥ ॐ क्रूं क्रीं स्वाहा महाकपालिनी महाघोररूपे स्वाहा॥ ॐ क्रां क्रीं हूं फट् स्वाहा द्वाविंशतैरभ्यर्च्य कामबीजे
नोद्दीपनं कृत्वा षोडशोपचारैरभ्यर्च्य मातृकामंत्रेण संदीप्य हूंकारेण वेष्टयित्वा बलिं दद्यात्॥ तद्यथा॥ ॐ क्रीं क्रीं हूं ॐ हूं हूं ॐ
फट् हं ॐ हूं फट् स्वाहा॥ ॐ हूं महायोगिनि त्रिभुवनतारिणि महाशंखास्थिमालामध्ये निवासं कुरु २ सर्वसिद्धिं देहि २ सुरामांसो
पहारान्गृह्ण २ गृह्णापय २ क्रीं स्त्रीं हूं फट् स्वाहा अनेन यथोचितेन द्रव्येण बलिं दत्वा देवीं विसृज्य मालां निभृतस्थाने स्थापयेत्॥ त
दुक्तं कालीतंत्रे॥ ततः सावहितो मंत्री गुरुं नत्वा शिरस्थितं॥ देवीं ध्यात्वा अष्टोत्तरसहस्रं प्रजपेन्मनुं॥ तेजोमयं जपजलं देव्या हस्ते स
मर्पयेत्॥ अथ वर्णमाला यथा॥ तदुक्तं विशुद्धेश्वरमहातंत्रे॥ मालाविधानं परमं शृणु पार्वति तत्त्वतः॥ येन विज्ञानमात्रेण मंत्राः सिध्यं
ति तत्क्षणात्॥ अनुलोमविलोमेन मंत्रमातृविभेदतः॥ मंत्राणांतरितान्वर्णान्वर्णेनांतरितान्मनून्॥ कुर्यान्मंत्रमयीं मालां सर्वमंत्रप्रदी

श्या॰र॰ थिनी॥ परमाणंमेरुन्नूपलंघनंनैवकारयेत्॥ एतत्परमरहस्यंमयोक्तंतेयशस्विनि॥ त्वयागुप्ततरंकार्यंनाख्येयंयस्यकस्यचित्॥ मतांतरमु
२३ क्तंयामलेपृथ॥ सबिंदुंवर्णमुच्चार्यपश्चान्मंत्रंजपेत्सुधीः॥ क्षमेरुंकल्पयित्वाजपेत्तत्रनलंघयेत्॥ यामले॥ अकारादिक्षकारांतावर्णमा
लाप्रकीर्तिता॥ सवर्णबिंदुमुच्चार्यपश्चान्मंत्रंजपेत्सुधीः॥ अनुलोमविलोमेनक्षकारंमेरुमाचरेत्॥ अथमुक्ताफलमयीचतुर्वर्गप्रदायिनी॥
वाक्सिद्धिश्चयथामालास्फाटिकेनविनिर्मिता॥ रुद्राक्षमालिकामोक्षभवेत्सर्वसमृद्धिदा॥ प्रवालमालावश्येतुसर्वकामार्थसाधिका॥ पुत्रजी
वकमालातुलक्ष्मीविद्याप्रदायिनी॥ पद्माक्षमालयालक्ष्मीर्जायतेसुमहीयसी॥ रक्तचंदमालातुवश्यसौभाग्यदाभवेत्॥ स्वर्णरौप्येणघ
टितामालाकामान्प्रयच्छति॥ निर्मितामृन्मयमालाभिकुरुतेकीर्तिमुत्तमं॥ सर्वैरेभिर्विरचितामालास्याद्भुक्तिसिद्धये॥ पंचविंशतिभिर्माला
बीजैर्मोक्षप्रकल्पयेत्॥ सप्तविंशतिभिः पुष्ट्यैत्रिंशद्भिर्मोक्षकर्मणि॥ त्रिंशद्भिः पंचपूर्वाभिः रभिचारेचकर्मणि॥ पंचाशद्भिश्चबीजैर्यामाला
साकाम्यकर्मफलप्रदा॥ अष्टोत्तरशतैः सर्वसिद्धिदात्रिवर्गदा॥ अधिकास्यान्महादोषानतुसिध्यंतिसाधकाः॥ शुक्लंरक्तंतथाकृष्णंशां
तिवश्याभिचारके॥ सूत्रंसंपादयेद्विद्वान्त्रिसूत्रंकमथापिवा॥ कार्पासंवैष्णवीमालापट्टसूत्रैरथापिवा॥ ऊर्णाभिर्ग्रथितावापिशैवीमा
लाप्रकीर्तिता॥ फेत्कारिण्यां॥ उच्चाटनेमार्करमेवसूत्रंलोहस्यसूत्रंखलुमारणेच॥ पट्टस्यसूत्रंचमहद्वशीचेकार्पाससूत्रंखलुसर्वसि
ध्यै॥ गृहीत्वासंस्कृतांमालांचंदनेनप्रपूजितां॥ समाश्रित्यजपेद्विद्यांकल्पमानेनसाधकः॥ संख्यापूर्णेनिजद्रव्यैर्जपसंख्यादशांशता
तः॥ यद्वाजपचतुर्थांशंस्वाहांतंमंत्रमुच्चरन्॥ यथोक्तकुंडेजुहुयाद्यथाविधिसमाहितः॥ अथवाप्रत्यहंजप्त्वाजुहुयात्तद्दशांशतः॥ अ
थवक्ष्यामिमालायाः संस्कारंसर्वसिद्धिदं॥ अप्रतिष्ठितमालाभिर्मंत्रंजपतियोनरः॥ सकलंविफलंविद्यात्क्रुद्धाभवतिचंडिका॥ कांत
यारचितासातुउत्तमसिद्धिकरीस्थिता॥ यथा॥ ऊर्ध्वंतुत्रिवृतंकार्यंतंतुत्रयमधोवृतं॥ पुण्यस्त्रीरचितंसूत्रंकार्पासंपट्टमेववा॥ मूलाख्येंच २३
पठन्सूत्रंबीजंप्रक्षालयेत्ततः॥ एकैकंमणिमादायब्रह्मग्रंथिंप्रकल्पयेत्॥ ग्रंथिहीनंनकर्तव्यंस्पृष्टास्पृष्टेननश्यति॥ शैवेचवैष्णवेसौ

गणेशेश्रीकरेपिच॥ बीजंस्पर्शेपुनः कुर्यात्तत्रनास्तिविचारणं॥ यादृश्याग्रंथहीनास्यालिख्यतेतद्दशेषतः॥ कालिकातारितायाश्च
शक्त्याद्याः षड्भेदतः॥ तांतलावनवासिन्यावाराद्याश्चवियोजयेत्॥ अनुलोमविलोमाभ्यांमातृकांचरितान्यसेत्॥ पंचगव्येक्षिपेन्मा
लांशिवमंत्रेणमंत्रितां॥ सद्योजातेनगंधाद्यैर्वामदेवेनघर्षयेत्॥ धूपयेत्तामघोरेणलेपयेत्पुरुषेणतु॥ मंत्रयेत्पंचमेनैवंप्रत्येकंतुशतं
शतं॥ मेरुंतुपंचमेनैवमंत्रेणानेनमंत्रयेत्॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः॥ भवेभवेनातिभवेभवस्वमांभवोद्भवाय
नमः॥ ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणायनमोबलविकरणायनमोबलायनमोबलप्र
मथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमोनमः॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥ सर्वेभ्यः सर्वशर्वेभ्योनमस्तेअस्तुरुद्र
रूपेभ्यः॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमहि॥ तन्नोरुद्रः प्रचोदयात्॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानांब्रह्माधिपतिर्ब्रह्म
णोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवों॥ इतिपंचवक्त्रंवाशुद्धिर्नशक्तिविषयेमता॥ तेनोः समीहितामुंडमालाचसंस्मृतायतः॥ गव्यैः सुला
पितांमालांस्थापयहेमपात्रकं॥ पद्माकारस्थिताश्वत्थपत्रेनवकेस्थापयेच्चवा॥ पंचामृतेनसुस्नाप्यशीतलेनजलेनच॥ महाप्रेतासनंबीजंवि
न्यसेत्तत्रसाधकः॥ तत्रदेवींप्रपूज्यैवपरिवारगणैः सह॥ विधिवदग्निमारोप्यघृतेनशक्तितोहुनेत्॥ होमकर्मण्यशक्तश्चेद्द्विगुणंजपमा
चरेत्॥ अष्टोत्तरशतंजप्त्वागुरोर्मालांसमर्पयेत्॥ शिष्यहस्तेततः सोपिप्रजप्याष्टोत्तरंशतं॥ गुरवेदक्षिणांदद्याद्यथाविभवमात्मनः॥ गु
रोरभावेमालायाः संस्कारंस्वयमाचरेत्॥ अभ्युक्ष्यादौजपन्मालांपूजांतेपितथैवहि॥ वाग्भवंभुवनेशानीमक्षमालाचडें: युता॥ हृन्मं
त्रंचसमुच्चार्यपूजयेत्साधकोत्तमः॥ ॐ मालेमालेमहामालेसर्वशक्तिस्वरूपिणी॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मात्वंसिद्धिदाभव॥ अ
भिमंत्र्यततोमालांगृहीत्वादक्षिणेकरे॥ मायासिद्धेश्वरीङेंतांहृदयांतमनुस्मृतः॥ एषपंचाक्षरोमंत्रोग्रहणेषुजपांतिके॥ हृत्प्रदेशस
मानीयनतुवामेनसंस्पृशेत्॥ मध्यमायामध्यभागेस्थापयित्वासमाहितः॥ तर्जन्यानस्पृशेन्मालांमंगुष्ठाग्रेणचालयेत्॥ प्रत्येकंमणि

मादायमेरुं चैव न लंघयेत्॥ अंगुष्ठानामिकाभ्यां तु जपमुत्तमकर्मणि॥ तर्जन्यंगुष्ठयोगेन न विद्वेषोच्चाटने जपः॥ कनिष्ठांगुष्ठयोगेन जपेन्मारण
कर्मणि॥ जपांते मस्तके मालां क्षिप्त्वानेन समुच्चयेत्॥ ॐ क्लीं त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा॥ ज
पांत्यकलितां मालां गोपयेत्प्रयतः सुधीः॥ जपकालेपि गोप्या जपमाला सुशोभना॥ गणनाविधिमुल्लंघ्य यो जपेत्तज्जपं त्यजेत्॥ गृह्णंति
राक्षसास्तेन गणयेत्सर्वथा बुधः॥ जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेत्॥ कराद्भ्रष्टे शब्दकृते जपेद्दष्टोत्तरं शतं॥ निषिद्धस्पर्शने तद्व
ज्जपेत्प्रक्षाल्य मंत्रवित्॥ इति वर्णाक्षमाला॥ अथ करमाला॥ तदुक्तं श्रीक्रमसंहितायां॥ तर्जन्यग्रे तथा मध्ये यो जपेत्स तु पापकृत्॥ अना
मिकात्रयं पर्व कनिष्ठिकात्रिपर्विका॥ मध्यमायास्त्रयं पर्व तर्जनीमूलपर्वणि॥ जपेदित्यर्थः॥ हंसपारमेश्वरेपि॥ पर्वद्वयमनामायाः परिवर्तेन
वै क्रमात्॥ पर्वत्रयं मध्यमायास्तर्जन्येकं समाहरेत्॥ शक्तिमालासमाख्याता सर्वमंत्रप्रदीपिका॥ मुंडमालायां॥ अनामायाद्वयं पर्व कनिष्ठा
यां क्रमेण तु॥ तर्जनीमूलपर्यंतं करमाला प्रकीर्तिता॥ मेरुं प्रदक्षिणं कुर्वन्ननामामूलपर्वतः॥ नित्यं जपं करे कुर्यान्न तु काम्यं कदाचन॥
काम्यमपि करे कुर्यान्मालाभावेपि सुंदरि॥ इति॥ यामले॥ देवतागुरुमंत्रेणामैक्यं संभावयेन्धिया॥ शवासने जपेन्मंत्रं संतुष्टस्थिरमान
सः॥ सर्वासनं सार्थं॥ वासनामाह उत्तरतंत्रे॥ अथ वक्ष्ये महेशानि वासनातत्त्वनिर्णयं॥ बीजत्रयं सा भवी सा कैवल्यं चित्कलात्मिका॥ ह
ल्लेखाद्वयमात्रेण सृष्टिस्थित्यंतकारिणी॥ शब्दजा विजद्वयेनैव शब्दराशिप्रबोधिनी॥ संबोधनपदेनैव सदा संविन्निरूपिणी॥ जाग
र्त्येषा महाविद्या केवलं चित्प्रकाशिनी॥ न सुप्ता न च शांता च तस्मात्काश्यफलप्रदा॥ अत्र शब्दबीजद्वयं प्रायुर्द्वारार्थ क्रमाच्छब्दक्रमबोधः
एकाक्षरार्थं वक्ष्यामि साक्षान्मे यत्फलप्रदं॥ ककारात्छिवरूपत्वात्केवलं मोक्षदायिनी॥ बीजत्रयेण देवेशि सृष्टिस्थित्यंतकारिणी॥
ज्वलनार्कसमायोगात्सर्वतेजोमयी शुभा॥ बिंदुना निष्फलत्वाच्च केवल्यफलदायिनी॥ बीजत्रयेण देवेशि विद्येश्वरपरावरा॥ जी २५
वात्मना बीजत्रया छिवशक्तिस्वरूपिणी॥ बीजद्वयार्थे शब्दं च भाविनी भाववर्जिता॥ इति कुलेश्वरसंहितायां॥ जपेन्मंत्रं प्रसन्नात्मा

मंत्रार्थं च हृदि स्मरन्॥ असंख्यातं च यज्जप्तं यज्जप्तं मेरुलंघने॥ पर्वसंधिषु यज्जप्तं तत्सर्वं निष्फलं भवेत्॥ सावधानं जपेन्मंत्रं न द्रुतं
न विलंबितं॥ एतद्दानिकः प्रोक्तः संख्यातः फलमुच्यते॥ अयं क्रमो निशायामप्युमर्षिणियः॥ तदुक्तं॥ यामले॥ बलिपूजादिकं सर्वं नि
शायां क्रियते सदा॥ तत्र रक्षयतां याति काली विद्याप्रसादतः॥ कुलचूडामणौ॥ रात्रौ पर्यटनं कुर्यात्रात्रौ च शक्तिपूजनं॥ न करोति कथं देव
साधकः कौलिको भवेत्॥ ततः काम्यं बलिं दद्यात्॥ तदुक्तं कालिकापुराणे॥ छागं तु वामतो दद्यान्महिषं वृत्तिरेत्सुनः॥ दक्षिणे वामतो
दद्यात्स्वदेहस्य शोणितं॥ नाभेरधस्तु रुधिरं पृष्ठभागेस्य न प्रिये॥ स्वगात्ररुधिरं दद्यान्न कदाचित्तु साधकः॥ नोष्टकस्य चिबुकस्यापि नें
द्रियाणां तथैव च॥ कंठाधो नाभितश्चोर्ध्वं हृद्भागस्य च यत्नतः॥ पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत्॥ न च रोगादिकं गात्र नान्यत
श्चैव भैरवे॥ सौवर्णे राजते ताम्रे कांस्ये वा धारये भानवः॥ निधाय देव्यै दद्यात्तु तदुक्तं मंत्रपूर्वकं॥ यः स्वहृदयसंजातमांसं माषप्रमाणतः॥
तिलमुद्गप्रमाणं वा देव्यै दद्यात्तु भक्तितः॥ षण्मासाभ्यंतरे तस्य काम्याभीष्टमवाप्नुयात्॥ अथ बलिदानं॥ अथातो बलिदानं तु वक्ष्या
मि श्रीकरं परं॥ प्रणवं पूर्वमुद्धृत्य पश्चाद्युगं ततः पठेत्॥ महापदेपदं ब्रूयात्पावतिपदं ततः॥ वह्निजाया विधिः पश्चाद्बलिं दद्याच्च तु
ष्पथे॥ प्रणवं भुवनेशानीमेकजटेपदं ततः॥ महायक्षाधिपं ब्रूयात्पतये पदमुच्चरेत्॥ भयापनीतकं ब्रूयाद्बलिं गृह्ण द्विधा पदं॥ गृह्णा प
ययुगं मम सर्वशांतिं कुरु द्वयं॥ परिविद्यां द्विधा कुष्य कु रु हुं हुं च छिंधि युक्॥ मायाबीजं ततो ईं च बलिं दद्यान्महानिशि॥ बलिमंत्र
द्वयं प्रोक्तं वीराणां हितकाम्यया॥ वाराही संहितायां॥ अथातो बलिदानस्य विधानं हि प्रवक्ष्यते॥ चामरः कृष्णरात्रश्च मत्स्यामेधो थ
शूकरः॥ महिषो वानरः खड्गो बलिश्छागादिको भवेत्॥ कृष्णछागद्वयं दद्यात्पश्चाद्दद्यान्महाबलिं॥ श्वेतः कृष्णो लोहितश्च कपिल
श्चित्रपांडरौ॥ षड्विधः श्यामलः प्रोक्तो ग्रहस्थानां परो बलिः॥ उत्तमो सितकृष्णो च मध्यमो चित्रपांडुरो॥ लोहितः कपिलश्चैव कनि
ष्ठः परिकीर्तितः॥ त्रिमासात्परतश्चैव यावदेकं तु वत्सरं॥ कृष्णो वा श्वेततरुणः प्रशस्तो बलिरुच्यते॥ षण्मासात्परतश्चैव यावद्वर्ष

श्या॰र॰ २५ दृश्यं भवेत्॥ मध्यमो सो बलिः प्रोक्तस्तस्माद्धीनो धमः स्मृतः॥ कृष्णावर्णो बलिर्यस्तु श्वेतपुछो यदा भवेत॥ छागलं तादृशं विद्वानुद्ध
तः परिवर्जयेत्॥ एवं सितेकृष्णपुछे वर्जयेन्मतिमान्सदा॥ कृष्णवर्णः छागलो वा पृष्ठवंशो सितो यदि॥ प्रशस्तं तं विजानीयाद्विपरी
तं तु वर्जयेत्॥ खंजं काणं तथा कुब्जं साछिद्रं व्याधिसंयुतं॥ वासनेदंतरहितं वर्जयेत्तं विचक्षणः॥ पंचाढ्यं महिषं श्वेतं प्रशस्तं परिकी
र्तितं॥ स एव महिषः कृष्णपांडुरश्चाधमो बलिः॥ पक्षिणः सुप्रशस्तास्तु सर्ववर्णाः सुशोभनाः॥ त्रिपक्षात्परतश्चापि दिने चैव विव
र्जयेत्॥ मनुष्ये को द्विवर्षाणि तृप्तिं गछंति देवता॥ गंडे वर्षसहस्राणि महिषे शरदः शतं॥ छागले वत्सरार्द्धं यावद्द्वादशमासिकं॥ पू
र्णे संवत्सरे चैव त्रिवर्षकं श्येनतु॥ वराहेन तु पंचाशत् द्वे चामरेण तु॥ अर्द्धे कंगोधिका भिस्तु षण्मासं गात्रशोषितं॥ पायसेनापि
षण्मासं तृप्तिं गछंति देवताः॥ नरस्य धात्वी पशोर्मांसं हव्यकव्ये विशेषतः॥ होमे उक्ताग्रमांसं च सरोमं चार्द्धरात्रके॥ सिंहं वा बिल्वा
कृतिं चैव रमस्तु दृशमेव च॥ उक्ताग्रमांसमानं स्याद्दतुलायुस्यनरस्य च॥ तेषां प्रमाणमात्रं स्यादजस्य च नरस्य च॥ धातकी फलमानं
तु गोधिकायाइती रितं॥ एतदामभजस्यैव भर्जितं मानवर्जितं॥ हीनेंद्रियपशोर्मांसं हरतः परिवर्जयेत्॥ दिवा न जुहुयान्मांसं सं
ध्यायां माषसानिके॥ ब्राह्ममुहूर्ते जुहुयाद्रथवा पूर्वसंधिषु॥ एकेन च सहस्रं स्याद्द्विगुणं चार्धरात्रके॥ ब्राह्ममुहूर्ते त्रिगुणं संध्या
यां च चतुर्गुणं॥ पर्वसंधौ शतगुणं तिथिसंधौ शतोत्तरं॥ काम्येषु जुहुयान्मांसं पुरश्चरणशोधके॥ योन्यासि शतगुणं स्थंडिले पिनचा
वेरे॥ अथ प्रोक्षणं कृत्वा बलिं समुत्सृजेद्बुधः॥ स्वयं पूर्वामुखो भूत्वा बलिं कुर्यादुदङ्मुखं॥ अथ वेतच्छ्रुत्यः स्यात् सिंदुराद्यैरलंकृ
तं॥ अर्घ्यपात्रोदके शुद्धे मूलेन प्रोक्षयेत्त्रिशः॥ ॐ गंगाहे यमुनागंगाकरतोयासरस्वती॥ कावेरी चंद्रभागा च सिंधुभैरवसागरा॥ २५
अजस्वांते महेशानि सांनिध्यमिह कल्पय॥ पशुपाशविनाशाय हेमकूटस्थिताय च॥ परापराय परमेष्टिने कंद्वाराय च मूर्तये॥ ॐ स
हस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं॥ बिल्वपत्रोदकैरेभिः प्रोक्षणं कारयेद्य॥ त्रिशः

संपूज्य मेतं च तत्रैव गंधचंदनैः॥ ततो निरीक्षते मंत्री पठेत्करपुरः स्वयं॥ छागलं बलिरूपेण मम भाग्यादुपस्थितं॥ प्रणमामि सदा भक्त्या रूपिणं ब
लिरूपिणं॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशनं॥ चंडिकाबलिरूपाय बलेतुभ्यं नमो नमः॥ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा॥ अतस्त्वां घा
वधः तयाम्यद्य तस्माद्यज्ञे वधोऽभवं॥ वाग्मायाकमलाबीजैस्तन्मूर्ध्नि त्रिः पशुं क्षिपेत्॥ ततो बलिं समुत्सृज्य काम्यं कृत्वा विशालधीः॥ आनीय खड्गपुर
तो गंधादिभिः समर्चयेत्॥ कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणं॥ उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनं॥ रक्तांबरधरं चैव पाशहस्तं कुटुंबि
नं॥ पिबमानं च रुधिरं भुंजानं क्रव्यसंहतिं॥ इति ध्यात्वा यजेन्मंत्री मंत्रेणानेन याजकः॥ रसनास्त्वं चंडिकाया सुरलोकप्रसादकः॥ मायाद्वं खड्ग
पदं कालिकालिपदं ततः॥ वज्रेश्वरी तत्रो लोहदंडे तं नमः पदं॥ मायाबीजेलिखेत्खड्गे सिंदूरचंदनादिना॥ रेखाबीजं न्यसेत्तत्र पूजयित्वा नमश्च
रेत्॥ असिविशोषणः खड्गः तीक्ष्णधारो दुरासदः॥ श्रीगर्भो विजयश्चैव धर्मपालनमोस्तु ते॥ ततः खड्गं गृहीत्वा देवतारसनाधियो॥ अभिमंत्र्य च
मूलेन वक्ष्यमाणेन च स्वयं॥ ब्रह्ममायायुगं कालियुगं विकरवूपतः॥ दंष्ट्रे स्कें स्कें पदं ब्रूयात्फेत्कारिणि तिरवादय॥ इति यं छेदय युगं सर्वान्दुष्टांस्त
तः पठेत्॥ मारय द्वितयं पश्चाद्दर्जं खड्गेन छिंधि युक्॥ कालिका लि किं विद्धि पिबयुग्रुधिरं पदं॥ स्कें स्कें किलियुगं कालिका लियुग भिर्मं च णे॥
आंह्रं फ डिति मंत्रेण स्कंधे खड्गं नियोजयेत्॥ अथ वक्ष्यामि खड्गानां लक्षणं तंत्रवर्त्मना॥ येन संछेदनेनापि साधकः सिद्धिमान्भवेत्॥ सर्वेषामुत्त
मः खड्गश्चंद्रहासः सुखावहः॥ पंचाशदंगुलेकार्यः किंवा तालत्रयेण तु॥ करवीरदलाकारः किंवा पद्मपत्रदलाकृतिः॥ अथ वा कुक्कुखड्गेन द
उखड्गेन भेदयेत्॥ महाबली नां सर्वेषां दात्रमत्र प्रकीर्तितं॥ कर्तृकया क्षुरेणापि छिद्याच्छुरिकया न च॥ एकुगरपर्शुखड्गाभ्यां भेदयेच्चक्र दात्रेन॥
छेदयेदनिशं सर्वं बलिं पूर्वमुखं शुभं॥ उदङ्मुखः स्वयं नेत्रबीजेनैव च साधकः॥ छागलादिपशूनां च विपरीतमुखेन तु॥ प्रहाराणां च धिकारी ते
षामेव विधीयते॥ स्वयं वा भ्रातृपुत्रो वा भ्राता वा सुहृदोपि वा॥ सपिंडछेदयेद्वापि शुद्धांतःकरणं यदि॥ नरिपुं नामहीनं वा नकाणं वापि कुत्सकं॥
नयाजयेच्छत्रुपक्षं बलिछेदनकर्मणि॥ यदि वायव्यादिभागे नैर्ऋत्ये दक्षिणेपि वा॥ मस्तके पतिते चैव हानिरत्र विनिर्दिशेत्॥ शेषासु दिक्षु सर्वा

श्या॰र॰
२६

सुविदिक्षु च फलं शृणु॥ पूर्वे वोत्तरदिग्भागे पतितं यदि मस्तकं॥ सर्वसंपत्करं विंद्याद्राजा राज्यं विनिर्दिशेत्॥ भ्रामितादक्षिणकर्णे यदा पातति वै शिरः॥
तदा सिद्धिश्च मासांते वामकर्णे विपद्भवेत्॥ राज्ञामग्रे भवेद्धानिर्गृहस्थानां शुभप्रदं॥ ऐशानमध्ये याम्ये च पतते यदि मस्तकं॥ तदा स्वल्पेन कालेन स
र्वसिद्धिर्भवेद्ध्रुवं॥ छिन्नं शिरो न पतितं सहास्यं यदि दृश्यते॥ विभूतिं तस्य जानीयाद्राजा राज्यं विनिर्दिशेत्॥ एकवारं भवेत्सिद्धिर्द्विवारे हानिरुच्यते॥ ग्र
हस्थानां विजानीयाद्राज्ञां तु विपरीतकं॥ यदाश्रु दृश्यते नेत्रे तदा हानिं विनिर्दिशेत्॥ यदा कटकराशब्दो दंतानां श्रूयते क्वचित्॥ तदा तु मरणं विंद्याद्रा
निः सर्वत्र निर्दिशेत्॥ दद्याद्राक्षसदिग्भागे मंत्री बलि शिरः स्वयं॥ तद्दक्षिणे रक्तपात्रे विपरीते न संदहेत्॥ देवस्य संमुखं कुर्याच्छिन्नं भागं प्रकल्पयेत्॥
तदवशस्तं जानीयाम ध्यमं विपरीतकं॥ महाबलीनां वायव्ये प्रदद्यात्साधकोत्तमः॥ बलीनामिति संज्ञानां शिरश्च पुरतो ददेत्॥ कीलकांते न्यसेत्सर्वं
दद्यात्काम्यो निजायते॥ शीर्षोपरि ज्वलद्दीपं प्रदद्याच्चंदनाच्छितं॥ धृतेन सार्वभौमास्यात्तेन सिद्धिं च विंदति॥ सूत्रवर्तिं न दद्याच्च वस्त्रवर्त्या प्रशस्य
ते॥ अंगुष्ठस्य प्रमाणं च दीर्घं चैव षडंगुलं॥ कार्पाससूत्रैर्वा दद्याद्द्वादशविंशति सूत्रकैः॥ सुगंधिद्रव्यैः सत्कुर्यात्कर्पूरागरुचंदनैः॥ ब्राह्मणानां कच्छ
पानां वगोधायाश्च विशेषतः॥ मत्स्यानामपि पक्षीणां नदीपं दापयेच्छिरः॥ शीर्षोपरि ज्वलद्दीपं यावत्कालं प्रवर्तते॥ तावत्कालं वसेत्स्वर्गे तस्माद्य
त्नेन दापयेत्॥ डामराहाह्ववं गंधमाला देवी प्रसीदति॥ तस्मात्संवर्धयेद्दीपं तस्मात्तात्रं विसर्जयेत्॥ निष्प्राणे मृत्युमाप्नोति दीपमान प्रदीपके॥
नष्टे रंशाणिते दद्यान्नवासं चक्रदावनं॥ शर्करायुतदूर्वाणि प्रदद्यात्त्रिमहाघृतं॥ सैंधवं शृंगवेरं च कदलीफलमेव च॥ पातयन्मधुराणां च कामं
मुद्दिश्य साधकः॥ बलिप्रकारमुद्दिष्टं वाराहीसंहिताक्रमात्॥ अथ चान्यत्प्रवक्ष्यामि मंत्रसिद्धिकरं परं॥ मंत्रसाधकयोरैक्यं दुर्लभं मुनिमानवैः॥ उ
क्तं संकर्षणतंत्रे शिवेनाखिलवेदिना॥ आनंदारख्यं पंचरात्रं शुक्रायकवयं पुरा॥ संस्कृतं पूजितं मंत्रं दत्वा शिष्याय देशिकः॥ कुर्यात्स्वतत्तयोरैक्यं
शास्त्रदृष्टेन वर्त्मना॥ मंत्रविद्भिर्तं कृत्वा नामवर्णैर्यथाक्रमं॥ आद्यंते सकलं नाम ततः प्रणवमालिखेत्॥ स्वराः पत्रेषु संलेख्या ध्यायेता नमृतात्म
कान्॥ भूर्जे रोचनगंधाद्यैः पद्ममध्ये सुशोभनान्॥ त्रिधा पवित्रं यौ विष्टान्तसुतः सिक्थकेन तु॥ निक्षिपेन्मधुरे तत्तु मध्ये लघुभाजने॥ क्षीरपूर्णे

२६

MEMORIAL

नवे कुंभे निक्षिपेल्लघुभाजने॥ धारयेद्देशिकः कुंभमग्निकुंडसमीपतः॥ मंत्रसाधकयोरैक्यसिध्यर्थं जुहुयात्ततः॥ मूलमंत्रेण मंत्रज्ञः सहस्रं शतमेव वा॥
कुंभे संपातयन्मंत्री मधुराणां त्रयं शुभं॥ निधाय निक्षिपेत्कुंभं शानैस्तं महदंभवसि॥ मंत्रसाधकयोरैक्यं भवेदेव न संशयः॥ एतद्येन विजानाति नासौ दे
शिक उच्यते॥ रहस्यं कथितं चैव न देयं यस्य कस्यचित्॥ उत्तमाय सुशिष्याय सुपुत्रायाथवा वदेत्॥ पयो मधु घृतं त्वेव समं त्रिमधुरं स्मृतमिति॥ अथोच्य
ते महायंत्रसंस्कारः सर्वसिद्धिदः॥ शुभेह्नि स्नानमाचर्य शुभे लग्ने शुभेक्षणे॥ कृतनित्यक्रियो मंत्री प्राङ्मुखो वाप्युदङ्मुखः॥ भूतशुध्यादिकं कृत्वा क
ल्पोक्तन्यासमाचरेत्॥ सुवर्णं राजतं ताम्रं श्रेष्ठं मध्यं तथाधमं॥ ताम्रं शतगुणं प्रोक्तं रौप्यं कोटिगुणं भवेत्॥ स्वर्णेनानंतफलदं स्फाटिके पि तथासमं॥ ए
कतोलं द्वितोलं वा त्रितोलं पंचतोलकं॥ रसतोलं चतुस्तोलं सप्ततोलं पलं त्वथवा॥ साधकस्य मनोज्ञं वा हूलापीठस्य साधकः॥ पूर्वोक्तधातुद्रव्ये श्चसुं
दरं सुमनोहरं॥ सुरेखं सुखरं यंत्रं लेखयित्वा विधानतः॥ अथवा प्रतिमां कृत्वा निजदेवस्वरूपिणीं॥ प्रतिष्ठां च ततः कुर्याद्यथाशास्त्रप्रमाणतः॥
स्नात्वा संकल्पयेन्मंत्री ततो न्यासं समाचरेत्॥ ततः संकल्पशुद्धात्मा शिवमंत्रविशोधितं॥ पंचगव्यं समानीय तत्र यंत्रं समाहितः॥ सुवर्णा
दिमणौ जन्मे क्षिपेत्प्रणवमुच्चरन्॥ तदुद्धृत्य सुवर्णादिपात्रे संस्थाप्य मंत्रवित्॥ पंचामृतनैवेतीर्थजलेन शीतलेन वा॥ सहस्रशीर्षा मंत्रेण
मूलमंत्रपुरःसरं॥ सुस्नाप्य शुद्धवस्त्रेण जलमुन्मुल्य तेजसे॥ सिंहासनादावारोप्य कुंकुमाद्यैर्विलेपयेत्॥ पीठपूजां ततः कुर्यात्स्वक
ल्पोक्तविधानतः॥ कुशोस्पृशन्मंत्रराजं शतमष्टोत्तरं जपेत्॥ प्रणवं यंत्रराजाय विघ्नहे पदमुद्धरेत्॥ महायंत्राय धीमहि पं लिखेत्ततो मही
ति च॥ तन्नो यंत्रप्रचोदयाद्वेषा प्रकीर्तिताः॥ इमां यंत्रस्य गायत्रीं जप्त्वा देवत्वमालभेत्॥ अथेष्टदेवतां ध्यात्वा मुद्रयावाहयेत्क्रमात्॥ जी
वन्यासं ततः कुर्यात्पूजयेदिष्टदेवतां॥ उपचारैः षोडशभिर्नानाविभवविस्तरैः॥ नृत्यगीतैश्च वाद्यैश्च पंचघोषपुरःसरं॥ ततो जपेदिष्टमं
त्रमष्टोत्तरसहस्रकं॥ इष्टसिध्यै बलिं दत्वा प्रणमेच्च क्रमुत्तमं॥ ततः कल्पोक्तमासाद्य हविषा संस्कृतेन ले॥ अष्टोत्तरशतं कृत्वा गुरुं विभ
वपूर्वकं॥ तोषयेत्स्वर्णवस्त्राद्यैः प्रदद्याद्दक्षिणामपि॥ षोडशोपचारमुद्राया उच्यंते लक्षणान्यथ॥ प्रसारयेदुभौ हस्तौ हृद्देशे विनियो

जिते॥अंगुल्यो विस्तृताः कार्यामध्यंगुष्ठौ विनिर्दिशेत्॥देवतासनविन्यासेपद्ममुद्रांप्रदर्शयेत्॥ईषन्नांगुलिभिर्देया सव्यांगुष्ठकधरं॥न
ग्रकनिष्ठिकातर्जन्यौकरयोरग्रसंगते॥मध्यमानामिकौकुर्यादिनमानसमुद्रया॥ईषन्नमांगुलिर्दक्षासंयोज्यांगुष्ठकंपरं॥स्वागतस्वस्ति
कामुद्रामध्यामूलगतांगुली॥उपचारेस्वागतेतिप्रयोक्तव्याविपश्चिता॥नौचप्रसारितौहस्तौपाद्यमुद्राप्रकीर्तिता॥स्वस्तिमुद्राकृताह
स्तावर्घमुद्राप्रकीर्तिता॥देशिनीमूलगांगुष्ठादक्षिणाधःकनीयसी॥प्रसार्यानामिकाग्रेणमुद्राचामप्रकीर्तिता॥संयुक्तानामिकांगुष्ठोति
स्त्राग्रसंप्रसारिताः॥मधुपर्कस्यमुद्रेयंगदितातंत्रवेदिभिः॥मुष्टियुक्तंतथास्नानेअंगुष्ठाग्रमधोमुखं॥मध्यमांगुष्ठकोलग्नौतिस्रो
न्याःसंप्रसारिताः॥वस्त्रमुद्रासमाख्यातावस्त्रदानविवर्धिनी॥कनिष्ठांगुष्ठकोलग्नौतिस्रोमध्याप्रसारिताः॥यज्ञोपवीतमुद्रेयंकथि
तातंत्रपारगैः॥मधुपर्कसमुच्चानामुद्रालंकारनिर्मिता॥मुद्रानामिकयामुष्टिंगंधमुद्रेतिकीर्तिता॥उत्थिताधोमुखीमध्याबद्धांगुष्ठयदी
रितं॥पुष्पमुद्रासमाख्यातापुष्पदानप्रवर्धिनी॥अंगुष्ठतर्जनीलग्नंतिस्रःसंकुचितापराः॥मुद्राधूपप्रदानेस्याद्देवानांप्रीतिकारिणी॥
उत्तानापोष्णिकामुद्रादीपमुद्रेतिगीयते॥पंचांगुलान्यग्रलग्नाप्रार्थिताधोमुखीयदि॥त्रिधानिबद्धामुद्रेयंनैवेद्यस्यप्रकीर्तिता॥
द्वौकरौश्लिष्टसंलग्नौभ्रामयेद्ग्रथितांगुलीः॥स्फाटिकेतिसमाख्याताप्रणामंतांप्रदर्शयेत्॥अथवादर्शयेन्मुद्राइमागंधादिषुक्रमा
त्॥कनिष्ठांगुष्ठसंयुक्तागंधमुद्राप्रकीर्तिता॥गंधादिषुप्रदिष्टेषुमुद्रावैषाप्रकीर्तिता॥मुद्रयायत्कृतंकर्मतद्दत्तंफलंलभेत्॥अथव
स्थामिदेवानांसुप्रतिष्ठाप्रकीर्तिताः॥पुण्यक्षेत्रेपुण्यकालेशैलादिविहितस्थले॥मंत्रीकल्पासौनुरेणपूर्वेद्युरधिवासयेत्॥सायंसं
कल्पविधिवत्घटस्थापनमुत्तमं॥गणेशादीन्समभ्यर्च्यदिक्पालान्परिपूजयेत्॥यथाशक्त्युपचाराद्यैःपूजयन्मूलदेवतां॥सुगंधतै
लगंधाद्यैर्देवंसमधिवासयेत्॥चंद्रेत्यादिमंत्रेणजययघोषपुरःसरं॥इत्यधिवासनंकृत्वासंयतोविजितेंद्रियः॥प्रातर्नित्यंतुनिर्वर्त्य
कृत्स्नेयागस्थलेविशेत्॥पताकाध्वजसंकीर्णेदिव्यमंडलमंडिते॥वितानचामरछत्रपुष्पमालाविराजिते॥मंगलांकुरपत्राद्यैकल २७

शैःपरिभूषितैः॥मंडलंसर्वतोभद्रंवेदिकोपरिसंलिखेत्॥प्राङ्मुखोवाप्यतोमूलासंकल्पाभीष्टसिद्धये॥पंचशुद्धिंसमाचर्यकूर्चमक्षतसं
युतं॥संस्थाप्यमंडलेतत्रयजेदाधारशक्तिकां॥पीठमंत्रांतमास्तीर्यस्थापयेत्कलशंबुधः॥दीक्षोक्तमार्गविधिनाविशेषकलशंतथा॥पं
चगव्यंततःकुर्याच्छिवमंत्रविशोधितं॥तेनसुस्नापयेन्मंत्रीप्रतिमांप्रणवंजपन्॥पंचामृतेनहविषादध्नाचपयसाक्रमात्॥ततउद्वर्तनंकुर्याज्ज
लेनस्नापयेदपि॥वाससाजलमुत्तुल्यगंधलेपंविधापयेत्॥नयेत्स्थापितकुंभस्यसमीपेदेवतांबुधः॥ततोध्यात्वायथोक्तांतामुद्रयावाहयेत्क्रमा
त्॥लेलिहामुद्रयाहस्तंविन्यसेद्देवताहृदि॥प्राणप्रतिष्ठामंत्रंतुदशधाप्रजपेत्ततः॥ततोदेवतगायत्रींशतमष्टोत्तरंजपेत्॥ततःकल्पोक्तविधि
नापरिवारसमन्वितां॥पूजयेद्देवतांपश्चाद्दिमसुस्नानमंडपे॥अष्टपत्रसमायुक्तेपीठेपरिनिधायच॥सुगंधिदिव्यतैलेनदद्यादभ्यंगमेवहि॥
मूलेनपावमानेनसहस्रशीर्षयाबुधः॥स्नापयेद्भक्तिभावेनअभिषेकघटामृतैः॥कर्पूरागरुकस्तूरीप्रसूनचंदनादिकैः॥नानातीर्थोदकेनापि
स्वर्णरत्नोदकेनतथा॥सर्वौषधिजलैर्गंधजलैर्यत्नेनसेचयेत्॥ततःशुद्धदुकूलेनजलमुत्तुल्यसाधकः॥परिधाप्यदुकूलेद्वेस्वर्णनिर्मितद
लया॥मंडलेतांसमानीयन्यसेत्तेजयस्वनैः॥षोडशोपचारैस्तुपूजयेत्कल्पमानसः॥कुंडेवास्थंडिलेमंत्रीहविषासंस्कृतानले॥शतम
ष्टोत्तरंकृत्वाश्रपयित्वाचरुंततः॥यथाविधिविधानेनकृत्वाहोमंसमाचरेत्॥ग्रासप्रमाणंचरुकंमूलेनाष्टत्यमंत्रवित्॥घृतस्रुवंततोदद्याज्जु
हुयादग्निसंमुखे॥पंचविंशतिवारंचदेवमुद्दिश्ययत्नतः॥चरुणादिक्पतिभ्यश्चदद्यात्पूर्वादितोबलिं॥ततआवृत्तिदेवेभ्योघृतेनाहुतिमा
चरेत्॥अथवाचरुणानद्यत्ततोदेवसमीपगे॥गंधपुष्पांजलिंपंचप्रदद्याच्छत्रचामरे॥अष्टोत्तरशतंमंत्रंजप्त्वामूलंसमाहितः॥अभिषिंचेत्त
तोदेवींपूजांकुंभस्थपल्लवैः॥मातृकायुक्तमंत्रंचजपन्जयजयस्वनैः॥गत्वाहोमसमीपंतुदद्यात्पूर्णाहुतिंततः॥दक्षिणांगुरवेदद्यात्स्वर्ण
कर्षमानतः॥अथवातच्चतुर्थांशंयथाविभवपूर्वकं॥गुंजाद्वादशकोमाषष्तदृष्टौकर्षउच्यते॥ततःसंतोषयेद्विप्रांगृहीत्वाचाशिषोद्विजात्॥
इतिदेवप्रतिष्ठानंसूक्तंसर्वसमृद्धिदं॥यःकरोतिप्रतिष्ठानंदेवतस्यमहात्मनः॥वसेद्दिविसहस्राणिवर्षाणिदेवमानतः॥ततोवर्षसहस्राणि

श्रद्धलोके महीयते॥ अथ अर्को दिकल्पांतं मोदते चाच्युतपदे॥ इति प्रतिष्ठाविधिः॥ ततो देवीं वक्ष्यमाणस्तवेन स्तुत्वा प्रदक्षिणां विधाय साष्टांगप्र
णामं कुर्यात्॥ तदुक्तं कालीतंत्रे॥ ततो वै शिरसि पुष्पं दत्वा ष्टांगं प्रणम्य चेति॥ अथ प्रदक्षिणा यथा यामले॥ त्रिकोणाकारसर्वत्र नतिः शक्तेः स
मीरिता॥ अर्धचंद्रं महेशस्य पृष्ठतश्च समीरितं॥ कालिकापुराणे॥ वृषं सोमं वृषं चैव सोमसूत्रं पुनर्वृषं॥ चंडं चवृषभं चैव पुनश्चंडं पुनर्वृषं॥ सो
मसूत्रं ततः कुर्यात् प्रादक्षिण्यं महेशितुः॥ नमनं मानसं प्रोक्तं कायिकं वाचिकं तथा॥ त्रिविधं च नमस्कारं कायिकं तूत्तमं स्मृतः॥ पौराणिके वै
दिके वा मंत्रैर्या क्रियते नतिः॥ मध्यमो सो नमस्कारो भवद्वाचनिकः सदा॥ यास्तु यंग घपाराभ्यां धरिताभ्यां नमस्कृतिः॥ क्रियते भक्तियुक्तेन वा
चिकस्तूत्तमः स्मृतः॥ जानुभ्यामवनीं गत्वा शिरसा स्पृश्य मेदिनीं॥ क्रियते यो नमस्कारो कायिकस्तूत्तमः स्मृतः॥ पुटीकृत्य करौ शीर्षे दीयते स्व
यथा तथा॥ नस्पृष्ट्वा जानुशीर्षाभ्यां मिथ्यमः कायिका नतिः॥ अष्टांगप्रणामो यथा॥ चिबुकेन मुखेनापि नासया हनुनेव च॥ ब्रह्मरंध्रेण कर्णा
भ्यां यद्भूमौ स्पर्शनं क्रमात्॥ प्रणामोष्टांगयुक्तोयं सर्वदेवस्य तुष्टिदः॥ प्रदक्षिण संख्या तत्रैव॥ एकं देव्यारवेः सप्त त्रीणि कुर्याद्विनायके॥
चत्वारि केशवे कुर्याच्छिवे चार्धप्रदक्षिणामिति॥ प्रसार्य दक्षिणं हस्तं स्वयं नम्रशिरः पुनः॥ दक्षिणं दर्शयेत्साश्वं मनसापि च दक्षिणं॥ त्रिधा
चैव भ्रयेत्सर्वं कालिकायाः प्रदक्षिणं॥ एवं प्रदक्षिणं ज्ञेयं सर्वदेवो घतुष्टिदं॥ अष्टोत्तरशतं यस्तु कालिकायाः प्रदक्षिणं॥ सर्वान्कामानवा
प्नोति पश्चान्मोक्षमवाप्नुयात्॥ कालिकापुराणे च॥ दोर्भ्यां पद्भ्यां अंसाभ्यामुरसा शिरसा दृशा॥ मनसा वचसा चेति प्रणामोष्टांग ईरितः॥
अशक्तौ पंचांगप्रणामं कुर्यात्तत्रैव॥ बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया॥ पंचांगाख्यः प्रणामश्च विद्वद्भिः परिकीर्तितः॥ अथ सा
मयिकैः सह पानादिकं कुर्यात्॥ यथा॥ चक्राकारेण पंक्त्याकारेण वा स्थित्वा सनसाधकैः सह॥ शक्तिसंयुक्तश्च युग्मयुग्मक्रमेण पद्मासनेउ
पविश्य सामयिकलकारे वंदनाक्षतं दत्वा॥ शिवशक्तिबुध्या पुष्पं दद्यात्॥ ततो यदि गुरुस्तत्र तिष्ठति तदा देगंधपुष्पादिना गुरुं पूजयित्वा
तत्पात्रं शुद्धिसहितं तस्मै समर्पयित्वा प्रणमेत्॥ गुरोरभावे तत्पात्रं जले निक्षिपेत्॥ ततः शक्तिपात्रं शुद्धिसहितं शक्त्यै दत्वा॥ सामयिके

भ्योप्येवमादिक्रमेण वीरपात्रात्परामृतेन शुद्धिसहितं पात्रं दद्यात्॥ ततः सामायिकेभ्योपि भक्त्याहरतद्वयेन संगृह्य मूलमंत्रं जप्त्वा पूर्ववदानंद
भैरवानंदभैरव्यौ संतर्प्य॥ गुरुदेवतां समर्पयेत्॥ ततः कल्पोक्तविधिना तत्वशुद्धिं कुर्यात्॥ ततः स्तोः सहपात्रवंदनं कुर्यात्॥ श्रीकैरवेशीखरप्रवि
लसच्चंद्रामृतप्लावितं क्षेत्राधीश्वरयोगिनीगणमहासिद्धैः समाराधितं॥ आनंदार्णवकं महात्मकमिदं साक्षात्रिखंडामृतं वंदे श्रीप्रथमं कराम्बुज
गृतं पात्रं विशुद्धिप्रदं॥ इत्यभिमंत्र्य वामहस्तेन पात्रमुत्तोल्य वंदनं कृत्वा गृह्णामीति साधकेभ्य आज्ञां गृहीत्वा॥ गृह्णीयात्॥ ते च जुषस्वेति ब्रूयुः॥
ततो मूलाधारात्कुंडलिनीमिष्टदेवतास्वरूपामाजिह्वांतं विभाव्य गुरुपादुकां स्मृत्वा शिवोहमिति विचिंत्य हस्ताभ्यां पात्रं धृत्वा मूलमंत्रमुच्चा
र्य कुंडलिनीमुखे देवीं समर्पयेत्॥ तदुक्तं मुद्राकारप्रकल्पं॥ कृत्वा मंत्रं ततः स्मरेद्गुरुपदं देवीं कलां चिन्मयीं पश्चात्पात्रवरं वलं वलासवधृ
तं दीपैर्युतं चोज्वलैः॥ पुष्पाभिश्चाभिमंत्रितं च निबिडं संमोहनं चासवं यत्सं चिंत्य पिबंति यांति खलु ते भुक्तिं च मुक्तिं परां॥ तंत्रांतरे च॥ सिं
दूरतिलकं भाले पाणौ चमदिरारसं॥ कृत्वापि षड्गुरुं ध्यायेत्तथा देवीं च चिन्मयीमिति॥ तत्र च पात्रमाधारोपरि संस्थाप्य पुनस्तेन क्रमेण
परामृतं गृहीत्वा द्वितीयपात्रवंदनं कुर्याद्यथा॥ हेमं भिन्नरसाव हंदयितयारक्तं च पापादिभिः किंचिच्चंचलरत्नपंकजदृशा सस्मेरमातं दि
तं॥ वामे स्वादु विशुद्धिकवलं पाणौ निधायात्मके वंदे पात्रमहं द्वितीयमधुना नांदैक संवर्धनं॥ ततः पूर्ववत्पानं स्वीकृत्यान्यत्पात्रवंदनं कुर्याद्यथा॥
पूर्वाम्नायकलाकलापसहितं कौतूहलोद्घातकं चंद्रोपेंद्रमहेंद्रशंभुवरुणब्रह्मादिभिः सेवितं ध्यातं सिद्धगणैस्तथा मुनिगणैर्मोक्षार्थिभिः सर्व
दा॥ वंदे पात्रमहं तृतीयमधुनात्मावबोधक्षमं ३॥ मद्यं मीनमांसौ रेवहं हरिहरब्रह्मादिभिः सेवितं मुद्रामैथुनधर्मकर्मविरतं क्षारामृतिक्ताश्रि
तं॥ आचार्यौष्टक सिद्धभैरवकलान्यासेन संशोधितं॥ पायात्संचमत्कारमत्तसहितं पात्रं चतुर्थं नमः॥ अधारे भुजगाधीराजवलये पात्रं म
हीमंडलं मध्ये सप्तसमुद्रवारिपिशितं चाष्टौ च दिग्दंतिनः॥ सोहं भैरवमर्चयाम्यनुदिनं तारागणैरक्षितैरादित्यप्रमुखैः सुरासुरगणैराज्ञाक
रैः किंकरैः॥ इति पंचमपात्रं॥ ततो यावद्दुःखादिर्न भवति॥ तावत्पानं कार्यं॥ अथ पानप्रमाणं यथा तदुक्तं रुद्रयामले॥ साधकोप्यश्च शक्तिभ्या

DR BHAU DAJI

श्या·र· दद्यान्निर्माल्यचंदनं॥ सामयिकैः समं कुर्याद्विपानादिभक्षणं॥ अन्यत्रापि॥ निश्वासस्थक्रमेणैवपंक्त्याकारेणवा यथा॥ नपश्चाच्च स्पृशेत्पात्रंन
२९ विंदुंपातयेदधः॥ शक्तियुक्तश्चरेद्वापियुग्मयुग्मविधानतः॥ शिवशक्तिधियासर्वंचक्रमध्येसमर्चयेत्॥ अथपात्रपरिमाणंयथा॥ तदुक्तंकुलसं
भारे॥ नयनाग्निबाणसंख्यंकार्यंचकुलसाधने॥ हेतुपानंप्रकर्तव्यमित्युक्तंपरमेश्वरी॥ इतोप्यधिकपानंतुनकर्तव्यंतुसाधकैः॥ अथोत्तरतंत्रे॥ अनु
ज्ञांधुरताल्लब्ध्वा गृह्णामीतिस्वयंवदेत्॥ जुषस्वेत्यप्यनुज्ञातोगुरुणावाकुलीनकैः॥ गृह्णीयाच्चस्वयंसिद्धः पिबेत्स्वासनः सुधीः॥ ज्ञानार्णवेपि॥
एकासनोपविष्टायेभुंजंतिचैकभाजने॥ एकपात्रेपिबन्द्रव्यंतेयांतिनरकेधमाः॥ एकपात्रमितिसर्वेमिलित्वाएकपात्रेनपिबेत्॥ नतुप्रतिवारंद्रव्यपा
नेभिन्नंकार्यमनुष्ठानेसंप्रदायविरोधाच्च॥ विनामंत्रेणयापूजाविनामांसेनतर्पणं॥ विनाशक्त्यातुयत्पानंतत्सानंनिष्फलंभवेत्॥ स्वशक्तिंवीरश
क्तिंवादीक्षितांगुरुमानिनीं॥ पाययित्वास्वयंदेवीपिबेत्तदमृतंपुनः॥ नैकहस्तेनदातव्यंनपिबेदेकपाणिना॥ अन्योन्यंवंदनंकृत्वापिबेत्तदमृतंपुनः
सव्येनोद्धृत्यपात्रंतुमुद्रांकृत्वातुसव्यतः॥ विनासंगेनयोगेननकुर्याद्द्रव्यसंहतिं॥ साधारंनोद्धरेत्पात्रमाधारेषुविनिक्षिपेत्॥ पात्रंनचालयेत्स्थाना
न्नकुर्याद्द्रव्यसंकरं॥ सशब्दंनपिबेद्द्रव्यंतथैवचनपूरयेत्॥ नस्थूलंनैवसूक्ष्मंचपात्रंकुर्यान्मनोहरं॥ उच्छिष्टंनपिबेच्चक्रेकुलद्रव्याणिसुंदरि॥ ब
हिः प्रक्षाल्यपाणिंचकुलद्रव्याणिदापयेत्॥ नष्टीवेनवधोवायुंचक्रमध्येप्रवर्तयेत्॥ चक्रमध्येघटेभग्नेपात्रेचपतितेभुवि॥ दीपनाशेचशांत्य
र्थंचक्रंस्वीकारयेत्सुधीः॥ स्वपात्रेस्थितहेतुंचनदद्यादीश्वरायवे॥ दत्तेचसिद्धिहानिः स्यात्क्रुद्धाभवतियोगिनी॥ परिहासप्रलापंचवितंडाबहु
भाषणं॥ औदासिन्यंभयंक्रोधंचक्रमध्येविवर्जयेत्॥ अन्योन्यंचिंतयेत्पात्रंनपात्रमाचरेदधः॥ गुरुशक्तिसुतानांचगुरुज्येष्ठकनिष्ठयोः॥ उच्छिष्टं
भक्षयेत्स्त्रीणांताभ्योनोच्छिष्टमर्पयेत्॥ चक्रमध्येचनियतमन्यथापतनंभवेत्॥ कनिष्ठानांस्वशिष्याणांदद्याच्चोच्छिष्टमेवहि॥ दद्यात्स्नेहेनयोगेभ्यः
सभवेदापदांपदं॥ अन्यत्रापि॥ शक्त्युच्छिष्टंपिबेद्द्रव्यंवीरोच्छिष्टंचचर्वणं॥ आत्मोच्छिष्टंनदातव्यंगुरूच्छिष्टंतुभक्षयेत्॥ पीत्वापीत्वापुनः पीत्वा २९
यावत्पततिभूतले॥ उत्थायचपुनः पीत्वापुनर्जन्मनविद्यते॥ ततः शांतिस्तोत्रंपठेत्तदुक्तंयामले॥ पीत्वास्वापिजनैः सार्धंशांतिस्तोत्रंसदापठे

त्॥ नश्यंतुप्रेतकूष्मांडानश्यंतुदूषकानराः॥ साधकानांशिवाः संतुआम्नायपरिपालिनां॥ जयंतिमातरः सर्वाजयंतियोगिनीगणाः॥ जयंतिसिद्धडा
किन्योजयंतिगुरुपंक्तयः॥२॥ जयंतिसाधकाः सर्वेविशुद्धाःकौलिकाश्चये॥ समयाचारसंपन्नाजयंतिपूजकानराः॥३॥ अणिमाद्यष्टसिद्धाश्चनंदंतुभै
रवादयः॥ नंदंतुदेवताः सर्वासिद्धविद्याधरादयः॥४॥ सदाम्नायविशुद्धायेमंत्रिणः शुद्धबुद्धयः॥ सर्वदानंदहृदयानंदंतुकुलपालकाः॥५॥ इंद्राद्या
स्तृप्तिमायांतुतृप्यंतुवास्तुदेवताः॥ चंद्रसूर्यादयोदेवास्तृप्यंतुममभक्तितः॥६॥ नक्षत्राणिग्रहायोगाकरणानिचराशयः॥ तृप्यंतुपित्तरः सर्वे
मासासंवत्सरादयः॥७॥ खेचराभूचराश्चैवतृप्यंतुममभक्तितः॥ अंतरिक्षचरायेचयेचान्येदेवयोनयः॥८॥ सर्वेचसुखिनः संतुसर्पानद्य
श्चपक्षिणः॥ पशवस्थावराश्चैवपर्वताः कंदरागुहाः॥९॥ ऋषयोब्राह्मणाः सर्वेशांतिंकुर्वंतुमेसदा॥ तीर्थानिबहवोराधायेचान्येपुण्यभू
मयः॥१०॥ वृद्धाः पतिव्रतायास्ताः शांतिंकुर्वंतुमेसदा॥ शिवंसर्वत्रमेचास्तुपुत्रदाराधनादिषु॥११॥ राजानः सुखिनः संतुक्षेमंकुर्वंतुमे
सदा॥ शुभामेदिवसायांतुमित्रानंदंतुमेसदा॥ साधकाजयिनः संतुशिवंतिष्ठंतुमेसदा॥ शुभाभिविदिताः संतुसर्वेदाभुविपूजकाः॥१३॥
येयेपापधियः स्वभूषणरतामन्निंदकाः पूजनेदेवाचारविरुद्धनष्टहृदयाभ्रष्टाश्चयेसाधकाः॥ दृष्ट्वाचक्रमपूर्वदुष्टहृदयाभ्रष्टाश्चयेसा
धकाःतेतेयांतुविनाशमत्रसमयेश्रीभैरवस्याज्ञया॥१४॥ साधकानांचद्वेष्टारः सदेवाम्नायदूषकाः॥ डाकिनीनांमुखेयांतुतृप्ता
स्तत्पिशितैस्तुते॥१५॥ शत्रवोनाशमायांतुममनिंदाकराश्चये॥ द्वेष्टारः साधकानांचविनश्यंतुशिवाज्ञया॥१६॥ इतिशांतिस्तोत्रं॥
ततोयथाविधिनाशिवशक्तिसंयोगंकृत्वादेवीपदेआत्मानंसमर्प्य॥ श्रीपात्रस्थकारणंस्वपात्रेकृत्वास्वीकृत्य॥ पात्राण्युत्तानीकृत्यतदु
परिपुष्पंकृत्वापात्रमुत्तोल्यदेव्युपरित्रिधाभ्रामयित्वापुनः संस्थाप्य॥ ततः संहारमुद्रया॥ गच्छगच्छपरंस्थानंस्वस्थानंपरमेश्वरि॥ यत्रब्रह्मा
दयोदेवाः नविदुः परमंपदं॥ इत्यनेनमंत्रेणदेवींस्वहृदयेसमानीयश्रीदक्षिणकालिकेपूजितासिक्षमस्वेतिविसृज्य॥ ततः पूरक
वायुनाध्यायन्देवीमुद्वास्य॥ ऐशान्यांमंडलिकांकृत्वानिर्माल्येननिर्माल्यवासिन्यैनमः॥ इतिमंडलंसंपूज्य प्रक्षाल्यगोपयेत्।

स्तंत्रे॥ ततस्तु दक्षिणादेव्यादेहस्थावृत्तिदेवताः॥ विलीनाः संतु मूले नदेव्यंगे निहिताः स्मरेत्॥ ततः स्त्रिकोणगर्भवृत्तं तु प्रविलिख्यं चमंड
ल॥ ऐशान्यां दिशिकोदेवीं निर्माल्यवासिनीं यजेत्॥ कुमारिकल्पे॥ देवताग्रेतु संभोगो देवतापूजनं भवेत्॥ संभोगात्तु परं कृत्वा देवींहृदि स
मानयेत्॥ कृतकृत्यो भवन्मंत्री नात्र कार्या विचारणा॥ ब्रह्मार्पणमंत्रो यथा॥ ॐ इतः पूर्वप्राणमनोबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषु
प्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यत्कृतं यदुक्तं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयं सकलं श्री दक्षि
णाकालिकाचरणे समर्पणमस्तु॥ ॐ तत्सत्॥ इति पठेत्॥ अथ कालीतंत्रे॥ विसृज्य परया भक्त्या संनिधापनमुद्रया॥ उद्वास्य हृदये दे
वीं तन्मयो भवति ध्रुवं॥ पुरश्चरणकाले तु पूजा चैषा प्रकीर्तिता॥ भैरवतंत्रेपि॥ हृदये च बहिर्देवीं समर्प्य विधिवत्सुनः॥ निर्माल्यं वै तु चोदे
शेनैवेद्यं भक्षयेत्ततः॥ ततस्तद्वा स्निग्धभूमौ मायाबीजं लिखित्वा कनिष्ठांगुलिना तिलकं कुर्यात्॥ ॐ यं यं स्पृशामि हस्तेन यं यं पश्या
मि चक्षुषा॥ स एव दासतां याति यदि शक्रसमो भवेत्॥ ततो यंत्रलेपं ब्रह्मरंध्रे धृत्वा नैवेद्यं सर्वदेवाय साधकाय चदत्वा शेषं स्वीकृत्य सो
हमिति भावयन्॥ वाद्यतो वैष्णवाचारपरायणो निःसंगो यथाक्रमं सुखं विहरेदिति तदुक्तं कुलचूडामणौ॥ ब्रह्मरंध्रे गुप्तस्थाने चक्रले
पं तु धारयेत्॥ नास्तिकेभ्यो न मूर्खेभ्यो न पशुभ्यो न चाद्विजे॥ कुलीनाय च दातव्यमथवा जलमध्यतः॥ ततः सोहमिति ध्यात्वा वैष्णवा
चारतत्परः॥ हरिनामजातभावो भग्नाखिलविचेष्टितः॥ चोरवद्विहरेदेको सदा संगविवर्जितः॥ यामले॥ नैवेद्यं त्रिपुरादेव्या वां
छंति विविधाः सुराः॥ तस्माद्देयं सुरश्रेष्ठ ब्रह्मणे विष्णवे पि च॥ महेशाय सूर्याय गणेशाय यमाय च॥ वह्नये वरुणायापि वायवे
धनदाय च॥ ईशाय च महादेवि साधकाय प्रदापयेत्॥ यामले॥ नैवेद्यं गुरवे दत्वा याचिक्न्यः साधकाय च॥ शेषं भुंजीत मतिमान्
देवीभक्तिपरायणः॥ तत्रैव॥ देव्यं देव्यग्रतः पानं वीरमेकांतवासिनां॥ अन्यत्रापि॥ पानं तु त्रिविधं प्रोक्तं दिव्यवीरपशुक्रमात्॥ दिव्यो ३०
देव्यग्रतः पेयाद्वीरे वीरासनस्थितः॥ ततीयं तु पशोः पानं पापकृत्शोकमोहकृत्॥ उदयाकारपद्धत्यां॥ असंस्कृतं पशोः पानं संस्कृ

तं भैरव स्वयं॥ चक्रपूजादिके तत्र सर्वसिद्धिकरं परं॥ असंस्कृतं पशोः पानं कुलहंतृकरं तथा॥ संस्कृतं सिद्धिजनकं प्रायश्चित्तादिशो
धनं॥ मंत्राणां स्फुरणं तेन महापातकनाशनं॥ आयुः श्रीकांतिसौभाग्यज्ञानं संस्कृतकर्मणां॥ अष्टैश्वर्यं देवेच रत्नं पतनं विधिवर्जनात्॥ ना
न्यत्कर्म प्रजानन्ति तव परिचरणं यद्विना विश्वमातर्नान्या का चित्रभावात्त्वच्चरणमनोभावनायां विना वै॥ नान्यज्ज्ञानं विनात्तेपरमह-- उत्कृ
ष्टभावं स्वरूपं तस्मादिंदे सहायं तव चरणयुगं पाहि मां सर्वमान्ये॥ ॐ स्वस्तिश्री श्रीगणेशाय नमः॥ ॐ नमः शिवाय॥ श्रीशिवउवाच॥ कथि
तोयं महामंत्रः सर्वमंत्रोत्तमोत्तमः॥ यमासाद्य मया प्राप्तमैश्वर्यपदमुत्तमं॥ संयुक्तः परया भक्त्या यथोक्तविधिना भवान्॥ कुरुतामर्चनं दे
व्यास्त्रैलोक्यविजिगीषया॥ २॥ रामउवाच॥ प्रसन्नो यदि मे देव परमेश पुरातन॥ रहस्यं परमं देव्याः कृपया कथय प्रभो॥ विनार्चनं विना हो
मं विना न्यासं विना बलिं॥ विना गंधं विना पुष्पं विना नित्यादितां क्रिया॥ ४॥ प्राणायामं विना ध्यानं विना भूतविशोधनं॥ विना जपं विना दानं
यथा काली प्रसीदति॥ ५॥ शिवउवाच॥ पृष्टं त्वयोत्तमं प्राज्ञ भृगुवंशसमुद्भव॥ भक्तानामपि भक्तोसि त्वमेवं साधयिष्यसि॥ ६॥ देवीं दा
नवकोटिघ्नीं कालिकां रुधिरप्रियां॥ सदा स्तोत्रप्रियामुग्रां कमकौतुकलालसां॥ ७॥ सर्वदानंदहृदयामासवासक्तमानसां॥ माध्वीक
मत्स्यमांसानुरागिणीं वैष्णवीं परां॥ ८॥ श्मशानवासिनीं प्रेतगणनृत्यमहोत्सवां॥ योगप्रभां योगिनीशां योगींद्रहृदयस्थितां॥ ९॥ ता
मुग्रकालिकां राम प्रसीदयितुमर्हसि॥ तस्याः स्तोत्रं महापुण्यं स्वयं काल्या प्रकाशितं॥ १०॥ तव तत्कथयिष्यामि श्रुत्वा वत्सावधारय॥ गोपनी
यं प्रयत्नेन पठनीयं परात्परं॥ ११॥ यस्यैककालपठनात्सर्वे विघ्नाः समाकुलाः॥ नश्यंति दहने दीप्ते पतंगा इव सर्वतः॥ १२॥ निशीथे मुक्तकेश
स्तु नग्नः शक्तिसमन्वितः॥ मनसा चिंतयेत्कालीं महाकालेन लालितां॥ १३॥ पठेत्सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनं॥ प्रसन्ना कालि
का तस्य पुत्रत्वेनानुकंपते॥ १४॥ यथा ब्रह्मामृतैर्ब्रह्मकुसुमैः पूजिता परा॥ प्रयच्छति तथानेन सदा काली प्रसीदति॥ १५॥ अस्य श्रीदक्षि
णकालिकास्तोत्रस्य भैरव ऋषिः॥ अनुष्टुप्छंदः॥ श्मशानकालिका देवता॥ धर्मार्थकाममोक्षार्थे जपे विनियोगः॥ १६॥ ॐ श्मशानकालि

काकाळीभद्रकाली कपालिनी॥गुह्यकाळी महाकाळी कुरुकुल्लाविरोधिनी॥ १७॥ कालिका कालरात्री चमहाकाल नितंबिनी॥ कालभै
रवभार्या चकुलवर्त्मप्रकाशिनी॥१८॥ कामदा कामिनी मान्या कमनी यस्वभाविनी॥ कस्तूरी रसलीलांगी कुंजरेश्वरगामिनी॥ १९॥ क
कारवर्णसर्वांगी कामिनी कामसुंदरी॥ कामार्ता कामरूपा च कामधेनुः कलावती॥ २०॥ कांता कालस्वरूपा च कामा ख्याकुलपालिनी॥
कुलीना कुलवत्यंबा दुर्गा दुर्गार्तिनाशिनी॥ २१॥ कुमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी॥ कृशांगी कुलीशांगी क्रींकारी कमलाक
ला॥२२॥ करालास्या कराली च कुलकांता पराजिता॥ उग्रा उग्रप्रभा दीप्ता विप्रचित्ता महामना॥२३॥ नीलाघना मेघनादा महामुद्रा सि
ता सिता॥ ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला॥ माहेश्वरी च चामुंडा वाराही नारसिंहिका॥ वज्रांगी वज्रकंकाली नृमुंडस्रग्विणी शि
वा॥२५॥ मालिनी नरमुंडाली गलद्रक्तविभूषणा॥ रक्तचंदन सिक्तांगि सिंदूरारुणमस्तका॥ २६॥ घोररूपा घोरदंष्ट्रा घोराघोरतरा शु
भा॥ महादंष्ट्रा महामाया सुंदरी युगदंतुरा॥ २७॥ सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना॥ शारदेंदुप्रसन्नास्या स्फुरत्स्मेरांबुजे
क्षणा॥२८॥ अट्टहासप्रसन्नास्या स्मेरवक्त्रा सुभाषिणी॥ प्रसन्नपद्मवदना स्मिता स्या प्रियभाषिणी॥ २९॥ कोटराक्षी कुलश्रेष्ठा मह
ती बहुभाषिणी॥ सुमतिः कुमतिश्चंडा चंडमुंडातिवेगिनी॥ ३०॥ प्रचंडा चंडिका चंडी चर्चिका चंडिवेगिनी॥ सुकेशी मुक्तकेशी च दीर्घ
केशी महाकचा॥ प्रेतदेहकर्णपुरा प्रेतपाणि सुमेखला॥ प्रेतासिना प्रियप्रेता प्रेतभूमिकृतालया॥ ३२॥ श्मशानवासिनी पुण्या पुण्यदा कु
लपंडिता॥ पुण्यालया पुण्यदेहा पुण्यश्लोका च पावनी॥ ३३॥ पूता पवित्रा परमा पुण्या पुण्यविभूषणा॥ पुण्यनाम्नी भितिहरा वरदा खड्ग
पाणिनी॥ ३४॥ नृमुंडहस्ता शस्ता च छिन्नमस्ता सुनासिका॥ दक्षिणा श्यामला श्यामा श्यामापीनोन्नतस्तनी॥ ३६॥ दिगंबरी घोररूपा स्त्र ३२
कांतारक्तवाहिनी॥ घोररवा शिवासंगा विसंगा मदनातुरा॥ ३७॥ मत्ता प्रमत्ता प्रमदा सुधासिंधुनिवासिनी॥ अतिमत्ता महामत्ता सर्वाक
र्षणकारिणी॥ ३७॥ गीतप्रिया वाद्यरता प्रेतनृत्यपरायणा॥ चतुर्भुजा दशभुजा चाष्टादशभुजा तथा॥ ३८॥ कात्यायनी जगन्माता जगतां

परमेश्वरी॥ जगद्बंधुर्जगद्धात्री जगदानंदकारिणि॥ जगज्जीवमयी हैमवती माया महामही॥ ३९॥ नागयज्ञोपवीतांगी नागिनी नागशायिनी॥ ना
गकन्या देवकन्या गांधर्वी किंनरेश्वरी॥ मोहरात्री महारात्री दारुणा भासुरेश्वरी॥ विद्याधरा वसुमती यक्षिणी योगिनी जरा॥ राक्षसी डाकिनी वेदमती
वेदविभूषणा॥ ४२॥ श्रुतिस्मृतिर्महाविद्या गुह्या गुह्या पुरातनी॥ चिंत्या चिंत्या स्वधा स्वाहा निद्रा तंद्रा च पार्वती॥ ४३॥ अपर्णा निश्चला लोलास
र्वविद्या तपस्विनी॥ गंगा काशी शची सीता सती सत्यपरायणा॥ ४४॥ नीतिः सु   तिः सुरुचिः स्तुष्टिः पुष्टिर्धृतिः क्षमा॥ वाणी बुद्धिर्महालक्ष्मी
लक्ष्मी र्नीलसरस्वती॥ ४५॥ स्रोतस्वती सारस्वती मातंगी विजया जया॥ नदी सिंधुः सर्वमयी तारा शून्यनिवासिनी॥ ४६॥ शुद्धा तरंगिणी मे
धा डाकिनी बहुरूपिणी॥ राकिनी डाकिनी चित्रा विचित्रा चित्ररूपिणी॥ ४७॥ शुभदानंदिनी स्तुत्या स्तवनी यस्वरूपिणी॥ पद्मा पद्मालया पद्म
मुखी पद्मविभूषणा॥ ४८॥ डाकिनी शाकिनी शांता राकिनी रुधिरप्रिया॥ ४९॥ भ्रांतिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी॥ उपेंद्राणी महेशा
नी ज्योत्स्ना चंद्रस्वरूपिणी॥ ५०॥ सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान्॥ शक्तिः सूक्तिर्मतिर्मत्ता भुक्तिर्मुक्तिः पतिव्रता॥ ५२॥
सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा॥ सर्वज्ञा सिद्धिदा सिद्धा भव्या भव्या भयापहा॥ ५३॥ कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया॥ त
मिस्रा तामसी स्थाणुः स्थिरा धीरा तपस्विनी॥ ५४॥ चार्वंगी चंचला लोलजिह्वा चारुचरित्रिणी॥ त्रपा त्रपावती लज्जा विलज्जा ह्रीरजोवती॥
॥ ५५॥ सरस्वती धर्मविद्या श्रेष्ठा विष्टुरवादिनी॥ गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा॥ ५६॥ भीमा भयानका भीमनादिनी भीः प्रभाव
ती॥ वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुः प्रिया॥ ५७॥ ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा॥ कलकंठी कंबुकंठी वेणुवीणापरायणा
॥ ५८॥ ब्रह्माणी वैष्णवी स्वर्गा धरित्री जगदीश्वरी॥ मधुमती कुंडलिनी ऋद्धिः सिद्धिः शुचिस्मिता॥ ५९॥ रंभोर्वशी रती रामा रोहिणी रेव
ती मघा॥ शंखिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा॥ ६०॥ शूलिनी परिघास्त्रा च पाशिनी खड्गपाणिनी॥ पिनाकधारिणी धूम्रा शरभी वन
मालिनी॥ ६१॥ रथिनी समरप्रीता वेगिनी रणमंडिता॥ जयिनी वज्रिणी नीला लावण्यंबुधिचंद्रिका॥ ६२॥ बलिप्रिया सदापूज्या पूर्णा दे

श्या॰र॰ त्येंद्रमाथिनी॥ महिषासुरसंहर्त्री चंडवशिनी रक्तदंतिका॥ ६३॥ रक्तपा रुधिरक्तांगी रक्तखर्परहस्तिनी॥ रक्तप्रिया मांसरुचिरासवासक्तमानसा॥
३२ ॥६४॥ गलच्छोणितमुंडाली कंठमाला विभूषणा॥ शवासना चितांतस्था माहेशी वृषवाहिनी॥ ६५॥ व्याघ्रत्वगंबरा चीनाचेलिनी सिंहवाहिनी॥
वामदेवी महादेवी गौरी सर्वज्ञभाविनी॥ ६६॥ बालिका तरुणी वृद्धा वृद्धमाता जरातुरा॥ सुभ्रूर्विलासिनी ब्रह्मवादिनी ब्राह्मणी मही॥ ६७॥ स्व
प्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी॥ अमोघा रुंधती तीक्ष्णा भगवत्यनुरागिणी॥ ६८॥ मंदाकिनी मंदहासा ज्वालामुख्यसुरांतिका॥ मा
नदा मानिनी मान्या माननीया मदोद्धता॥ ६९॥ मदिरा मेदुरोन्मादा मेध्या साध्या प्रसादिनी॥ सुमध्यानंतगुणिनी सर्वलोकोत्तमोत्तमा॥ ७०॥
जयदा जित्वरा जैत्री जयश्रीर्जयशालिनी॥ सुखदा सुभदा सत्या सभासंक्षोभकारिणी॥ ७१॥ शिवदूती भूतिमती विभूतिर्भूषणानना॥ कौमा
री कुलजा कुंती कुलस्त्री कुलपालिका॥ ७२॥ कीर्तिर्यशस्विनी भूषा भूष्या भूतपतिप्रिया॥ सगुणा निर्गुणा धृष्टा निष्ठा काष्ठा प्रतिष्ठिता॥ ७३॥ धनि
ष्ठा धनदा धन्या वसुधा स्वप्रकाशिनी॥ उर्वी गुर्वी गुरुश्रेष्ठा सगुणा त्रिगुणात्मिका॥ ७४॥ महाकुलीना निष्कामा सकामा कामजीविनी॥ कामदे
वकलारामाभिरामा शिवनर्तकी॥ ७५॥ चिंतामणिः कल्पलता जाग्रती दीनवत्सला॥ ७६॥ कार्तिकी कृत्तिका कृत्या अयोध्या विषमा समा॥
सुमंत्रा मंत्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी॥ त्रैलोक्यजननी हृष्टा निर्मांसा कालरूपिणी॥ ७७॥ तडागनिम्नजठरा शुष्कमांसास्थिमालिनी॥
अवंती मथुरा हृद्या त्रैलोक्यपावनीश्वरी॥ ७८॥ व्यक्ताव्यक्तानेकमूर्तिः शर्वरी भीमनादिनी॥ क्षेमंकरी शंकरी च सर्वसंमोहकारिणी॥
॥७९॥ ऊर्ध्वतेजस्विनी क्लिन्ना महातेजस्विनी तथा॥ अद्वैता भोगिनी पूज्या सुरभी सर्वमंगला॥ सर्वप्रियंकरी भोग्या धारिणी पिशिताश
ना॥ भयंकरी पापहरा निःकलंका वशंकरी॥ ८१॥ आशा तृष्णा चंद्रकला निद्राणा वायुवेगिनी॥ सहस्रसूर्यसंकाशा चंद्रकोटिसमप्रभा॥
॥८२॥ निशुंभशुंभहंत्री च रक्तबीजविनाशिनी॥ मधुकैटभहंत्री च दुर्गासुरविनाशिनी॥ ८३॥ वह्निमंडलमध्यस्था सर्वसत्त्वप्रतिष्ठिता॥ स ३२
र्वाचारवती सर्वदेवकन्याधिदेवता॥ ८५॥ दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिणी॥ इज्या पूज्या विभीर्भूतिः सत्कीर्तिर्ब्रह्मरूपिणी॥ ८५॥

रंभोरुश्चतुरा राका जयंती करुणा कुहूः॥ मनस्विनी देवमाता यशस्या ब्रह्मचारिणी॥ ८६॥ सिद्धिदा बुद्धिदा बुद्धिः सर्वाद्या सर्वदायिनी॥ अगाध
रूपिणी ध्येया मूलाधारनिवासिनी॥ ८७॥ आज्ञा प्रज्ञा पूर्णमना श्चंद्रमुख्यनुकूलिनी॥ वावदूका निम्ननाभिः सत्यसंधा दृढव्रता॥ ८८॥ आन्वी
क्षिकी दंडनीतिस्त्रयी त्रिदिवसुंदरी॥ ज्वलिनी ज्वालिनी शैलतनया विंध्यवासिनी॥ ८९॥ प्रत्यया खेचरा धैर्या तुरीया विमलातुरा॥ प्रगल्भा वा
रुणी छाया शशिनी विस्फुलिंगिनी॥ ९०॥ भुक्तिः सिद्धिः सदाप्राप्तिः प्राकाम्या महिमाणिमा॥ इच्छासिद्धिर्वशित्वा च ईशित्वोर्ध्वनिवासिनी॥ ९१॥
लघिमा चैव गायत्री सावित्री भुवनेश्वरी॥ मनोहरा चिता दिव्या देव्युदारा मनोरमा॥ ९२॥ पिंगला कपिला जिह्वा रसज्ञा रसिका रसा॥ सुषुम्नेडा
योगवती गांधारी नरकांतिका॥ ९३॥ पांचाली रुक्मिणी राधाराध्या भीमा धिराधिका॥ अमृता तुलसी वृंदा कैटभी कपटेश्वरी॥ ९४॥ उग्रचं
डेश्वरी वीरजननी वीरसुंदरी॥ उग्रतारा यशोदाख्या देवकी देवमानिता॥ ९५॥ निरंजना चितादेवी क्रोधिनी कुलदीपिका॥ कुलवागीश्व
री ज्वालामृतकी द्राविणी द्रवा॥ ९६॥ योगीश्वरी महामारी भ्रामरी बिंदुरूपिणी॥ दूती प्राणेश्वरी गुप्ता बहुला डामरी प्रभा॥ ९७॥ कुब्जिका
ज्ञानिनी ज्येष्ठा भुशुंडी प्रकटाकृतिः॥ द्राविणी गोपिनी माया कामबीजेश्वरी क्रिया॥ ९८॥ शाकंभरी कोकनदा मुशला स्त्री तिलोत्तमा॥ अमे
या विक्रमा क्रूरा संपच्छीला त्रिविक्रमा॥ ९९॥ स्वस्ती हव्यवहा प्रीतिरुष्मा धूम्रार्चिरंगदा॥ तपिनी तापिनी विश्वा भोगदा भोगधारिणी॥ १००॥
त्रिखंडा बोधिनी वश्या सकला शब्दरूपिणी॥ बीजरूपा महामुद्रा वशिनी योगरूपिणी॥ १॥ अनंगकुसुमानंगमेखलानंगरूपिणी॥ अनं
गमदनानंगरेखानंगकुलेश्वरी॥ २॥ अनंगमालिनी कामेश्वरी सर्वार्थसाधिका॥ सर्वमंत्रमयी मोदिन्यरुणानंगरूपिणी॥ ३॥ वज्रेश्वरी
च जननी सर्वदुःखक्षयंकरी॥ षडंगयोगयुवती युक्ता ज्वालांशुमालिनी॥ ४॥ दुराशया दुराधर्षा दुर्ज्ञेया दुर्गरूपिणी॥ दुरंता दुष्कृतिहरा
दुर्ध्येया दुरतिक्रमा॥ ५॥ हंसेश्वरी त्रिकोणस्था शाकंभर्यनुकंपिनी॥ त्रिकोणनिलया नित्या परमामृतरंजिता॥ महाविद्येश्वरी श्वेता भेरुं
डा कुलसुंदरी॥ त्वरिता भक्तिसंयुक्ता भक्तवश्या सनातनी॥ ७॥ भक्तानंदमयी भक्तभाविता भक्तसुंदरी॥ सर्वसौंदर्यनिलया सर्वसौभा

ग्यशालिनी॥ ८ ॥ सर्वसंभोगभुवनासर्वसौख्यनिरूपिणी॥ कुमारीपूजनरताकुमारीव्रतचारिणी॥ ९ ॥ कुमारीभक्तसुखिनीकुमारीरूपधारिणी॥
कुमारीपूजकप्रीताकुमारीप्रीतिदाप्रिया॥ १० ॥ कुमारीसेवकासंगाकुमारीसेवकालया॥ आनंदभैरवीबालभैरवीवटुभैरवी॥ ११ ॥ श्मशानभै
रवीकालभैरवीपुरभैरवी॥ महाभैरवपत्नीचपरमानंदभैरवी॥ १२ ॥ सुरानंदभैरवीचउन्मादानंदभैरवी॥ मुक्तानंदभैरवीचतथातरुणभैरवी॥
॥ १३ ॥ ज्ञानानंदभैरवीचअमृतानंदभैरवी॥ महाभयंकरीतीव्रातीव्रवेगातरस्विनी॥ १४ ॥ त्रिपुरापरमेशानीसुंदरीपुरसुंदरी॥ त्रिपुरेशीपंच
दशीपंचमीपुरवासिनी॥ १५ ॥ महासप्तदशीचैवषोडशीत्रिपुरेश्वरी॥ महांकुशस्वरूपाचमहाचक्रेश्वरीतथा॥ १६ ॥ नवचक्रेश्वरीचक्रेश्वरीत्रिपु
रसुंदरी॥ राजराजेश्वरीवीरामहात्रिपुरसुंदरी॥ १७ ॥ सिंदूरपूररुचिराश्रीमत्त्रिपुरसुंदरी॥ सर्वांगसुंदरीरक्तारक्तवस्त्रोत्तरीयका॥ १८ ॥ यवा
यारक्तसिंदूररक्तचंदनरूपधृक्॥ यावयावकसिंदूररक्तचंदनधारिणी॥ चामरीबालकुटिलानिर्मलाश्यामकेशिनी॥ रक्तमौक्तिकरत्नाढ्या
किरीटमुकुटोज्ज्वला॥ २० ॥ रत्नकुंडलसंयुक्तस्फुरत्कुंडमनोरमा॥ कुंजरेश्वरकुंभोत्थमुक्तारंजितनासिका॥ २१ ॥ मुक्ताविद्रुममाणिक्यहारा
ढ्यस्तनमंडला॥ सूर्यकांतेंदुकांताढ्यस्पर्शाश्मकंठभूषणा॥ २२ ॥ बीजपूरस्फुरद्बीजदंतपंक्तिरनुत्तमा॥ कामकोदंडकाभुग्नभ्रूकुटाक्षप्रव
र्षिणी॥ २३ ॥ मातंगकुंभवक्षोजालसत्कोकनदेक्षणा॥ मनोज्ञाशष्कुलीकर्णाहंसीगतिविडंबिनी॥ २४ ॥ पद्मरागांगदद्योतद्दोश्चतुष्कप्रका
शिनी॥ नानामणिगणास्फूर्यच्छुद्धकंकणभूषणा॥ २५ ॥ नागेंद्रदंतनिर्माणवलयाचितपाणिना॥ अंगुलीयकचित्रांगीविचित्रक्षुद्रघंटिका॥
॥ २६ ॥ पट्टांबरपरीधानाकलमंजीररंजिता॥ कर्पूरागरुकस्तूरीकुंकुमद्रवलेपिता॥ २७ ॥ विचित्ररत्नपृथिवीकल्पशाखितलस्थिता॥ रत्न
द्वीपस्फुरद्रत्नसिंहासननिवासिनी॥ २८ ॥ षट्चक्रभेदनकरीपरमानंदरूपिणी॥ सहस्रदलपद्मांतश्चंद्रमंडलवर्तिनी॥ २९ ॥ ब्रह्मविष्णु
शिवक्रीडनानासुखविलासिनी॥ हरविष्णुविरिंचींद्रग्रहनायकसेविता॥ ३० ॥ आत्मयोनिर्ब्रह्मयोनिर्जगद्योनिरयोनिजा॥ भगरूपाभग
स्थात्रीभगिनीभगवासिनी॥ ३१ ॥ भगात्मिकाभगाधाररूपिणीभगमालिनी॥ लिंगाभिधायिनीलिंगप्रियालिंगनिवासिनी॥ ३२ ॥ ३२

लिंगस्थालिंगिनीलिंगारूपिणीलिंगसुंदरी॥ लिंगस्थालिंगिनीलिंगप्रियालिंगसुकांक्षिणी॥ ३३ ॥ शिवशर्वीसुभद्राणीशिवदाशिवनादिनी
मातंगीभ्रामरीमातामातेवानंगमेखला॥ ३४ ॥ डाकिनीयोगिनीचैवतथायोगिनमस्कृता॥ माहेश्वरीवैष्णवीचभ्रामरीशिवरूपिणी॥ ३५ ॥
अलंबुषावेत्रवतीक्रोधरूपासुमेखला॥ गांधारीजगदंबाचइडाचैवशुभंकरी॥ ३६ ॥ पिंगलाब्रह्मदूतीचसुषुम्नाचैवगंधिनी॥ लिंगस्थाचैव
लिंगेशीत्रिपुराभैरवीतथा॥ ३७ ॥ लिंगमालालिंगभवालिंगलिंगाचपार्वती॥ भगवतीकौशिकीचप्रभाचैवप्रियंबधूः॥ ३८ ॥ गृध्रीशागृ
ध्ररूपाचचकेशीचकरूपधृक्॥ लिंगगीतिर्महाप्रीतिभगगीतिःसदारतिः॥ ३९ ॥ लिंगनामसदानंदाभगनामसदारतिः॥ लिंगमालाकंठ
भूषाभगमालीविभूषणा॥ ४० ॥ भगलिंगामृतप्रीताभगलिंगस्वरूपिणी॥ भगलिंगस्वरूपाचभगलिंगसुखावहा॥ स्वयंभूकुसुमप्रीता
स्वयंभूकुसुमार्चिता॥ स्वयंभूकुसुमप्राणास्वयंभूकुसुमेक्षिता॥ ४२ ॥ स्वयंभूकुसुमस्नातास्वयंभूकुसुमार्पिता॥ स्वयंभूपुष्पघटिता
स्वयंभूपुष्पधारिणी॥ ४३ ॥ स्वयंभूपुष्पतिलकास्वयंभूपुष्पचर्चिता॥ स्वयंभूपुष्पनिरतास्वयंभूकुसुमग्रहा॥ ४४ ॥ स्वयंभूपुष्पय
ज्ञांगीस्वयंभूकुसुमात्मिका॥ स्वयंभूपुष्पनिलयास्वयंभूकुसुमप्रिया॥ ४५ ॥ स्वयंभूकुसुमादानलालसोन्मत्तमानसा॥ स्वयंभूकु
सुमानंदलहरीस्निग्धदेहिनी॥ ४६ ॥ स्वयंभूकुसुमाधारास्वयंभूकुसुमोत्सका॥ स्वयंभूपुष्पनिलयास्वयंभूपुष्पवासिनी॥ ४७ ॥
स्वयंभूकुसुमस्निग्धास्वयंभूपुष्पकारिणी॥ स्वयंभूकुसुमप्राणास्वयंभूकुसुमप्रभा॥ ४८ ॥ स्वयंभूकुसुमज्ञानास्वयंभूकुसुमव्रता॥ स्व
यंभूकुसुमध्यानास्वयंभूपुष्पभोगिनी॥ ४९ ॥ स्वयंभूकुसुमोल्लासास्वयंभूपुष्पवर्षिणी॥ स्वयंभूकुसुमानंदास्वयंभूपुष्पपुष्पिणी॥ ५० ॥
स्वयंभूकुसुमाराध्यास्वयंभूकुसुमोद्भवा॥ स्वयंभूकुसुमव्यग्रास्वयंभूपुष्पपूर्णिता॥ ५२ ॥ स्वयंभूपूजकप्रज्ञास्वयंभूपूजकप्रिया॥ स्व
यंभूवंदकाधारास्वयंभूनिंदकांतका॥ ५३ ॥ स्वयंभूप्रदसर्वस्वास्वयंभूप्रदपुत्रिणी॥ स्वयंभूप्रदसस्मेरास्वयंभूपुष्पवारिणी॥ ५४ ॥ स
र्वकालोद्भवप्रीतासर्वकालोद्भवात्मिका॥ सर्वकालोद्भवोद्भावासर्वकालोद्भवोद्भवा॥ ५५ ॥ कुंदपुष्पसमाप्रीतिर्गोलपुष्पसदारतिः

श्या·र·
३४
कुंडगोलोद्भवप्रीता कुंडगोलोद्भवात्मिका॥ ५६॥ स्वयंभूवा शिवा धात्री पावनी लोकपावनी॥ कीर्तिर्यशस्विनी मेधा विमेधा शुक्रसुंदरी॥
॥५७॥ सुखदा मोक्षदा मोक्षा मोक्षदात्मप्रकाशिनी॥ शुक्राधारा शुक्ररूपा शुक्रसिंधुनिवासिनी॥५८॥ शुक्रालया शुक्रभोगा शुक्रपूजासदारतिः॥ शुक्रपूज्या शुक्रहोमसंतुष्टा शुक्रवत्सला॥ ५९॥ शुक्रमूर्तिः शुक्रकरी शुक्रपूजकपुत्रिका॥ शुक्रस्था शुक्रिणी शुक्रस्पृहा च शुक्रसुंदरी॥ ६०॥ शुक्रस्नाता शुक्रदेहा शुक्रतुष्टा तु शुक्रिणी॥ महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी॥ ६१॥ शुक्रोत्सवा सदा शुक्रा पूर्णशुक्रमनोरमा॥ शुक्रपूजकसर्वस्वा शुक्रनिंदकनाशिनी॥ ६२॥ शुक्रात्मिका शुक्रसंपच्छुक्राकर्षणकारिणी॥ शारदा साधकप्राणा साधका शुक्रमानसा॥
॥६३॥ साधकानंदसंतोषा साधकारिविनाशिनी॥ साधकोत्तमसर्वस्वा साधकांतर्निवासिनी॥ ६४॥ त्रिकूटपंचकूटा च सर्वकूटशरीरिणी॥
सर्ववर्णमयी वर्णजपमालाविधायिनी॥ ६७॥ श्री शिव उवाच॥ इति श्री कालिकानाम्नां सहस्रं शिवभाषितं॥ गुह्याद्गुह्यतरं साक्षान्महापातकनाशनं॥ ६८॥ पूजाकाले निशीथे च संध्ययोरुभयोरपि॥ लभते गाणपत्यं च यः पठेत्साधकोत्तमः॥ ६९॥ यः पठेत्पाठयद्वापि शृणोतु श्रावयेदपि॥ सर्वपापविनिर्मुक्तः स याति कालिकापरं॥ ७०॥ श्रद्धयाश्रद्धया वापि यः कश्चिन्मानवः पठेत्॥ दुर्गाद्दुर्गांतरं तीर्त्वा देव्याः पार्श्वचरो भवेत्॥ वंध्या वा काकवंध्या वा मृतवत्सा च यांगना॥ श्रुत्वा स्तोत्रमिदं पुण्यं लभते चिरजीविनं॥ ७२॥ यं यं कामयते कामं पठन्स्तोत्रमनुत्तमं॥ देवीवरप्रसादेन तं तं प्राप्नोति नित्यशः॥ ७३॥ स्वयंभूकुसुमैः शुक्रैः सुगंधिकुसुमान्वितैः॥ यवावकसिंदूररक्तचंदनसंयुतैः॥ ७४॥ मत्स्यमांसादिभिर्वापि मधुभिः साज्यपायसैः॥ भक्त्योपनीतैर्मंत्रेण साधितैः शक्तिभिः सह॥
॥७५॥ पंचोपचारैर्नैवेद्यैर्बलिभिर्बहुशोणितैः॥ धूपदीपैर्महादेवीं पूजयित्वा मनोहरैः॥ ७६॥ जप्त्वा महामनुं स्तोत्रं पठेद्भक्तिसमन्वितः॥ अनन्यचेताः स्थिरधीर्मुक्तकेशो दिगंबरः॥ ७७॥ शवारूढश्चिताष्ठो वा शिवात्मकः॥ स भवेत्कालिकापुत्र इति ख्यातिमुपागतः॥ ७९॥ वायुतुल्यबलं लोके दुर्जयः शत्रुमर्दनः॥ सर्वसंकटमुत्तीर्णः सर्वसिद्धिसमन्वितः॥ ८१॥ मधुमत्या स्वयं देव्या सेव्यमानः ३५

स्मरोपमः॥ महेश इव योगींद्रः सर्वसत्वपुरस्कृतः॥ ८१॥ कामिनीकामरूपासौ सर्वाकर्षणकारकः॥ जलसूर्येंदुवायूनां स्तंभको राजवल्लभः॥ यशस्वी सत्कविर्धीमान्समंत्री कोकिलस्वरः॥ बुद्ध्या पुत्री गजाश्वानामीश्वरो धार्मिकः कृती॥ ८३॥ मार्कंडेय इवायुष्मान्जरापलितवर्जितः॥ नवयौवनयुक्तः स्यादपि वर्षसहस्रभाक्॥ ८४॥ बहुकिं कथ्यते तस्य पठतः स्तवमुत्तमं॥ नाकिंचिद्दुर्लभं लोके यद्यन्मनसि कल्पितं॥ ८५॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः॥ सर्वमाशु तरत्येव स्तवस्यास्य प्रसादतः॥ ८६॥ रजस्वलाभगं पश्यन्जप्त्वा कालीमहामनुं॥ स्तवेनानेन संस्तुत्य साधकः किन्न साधयेत्॥ ८७॥ परदारपरो वापि मनुं जप्त्वा पठेत्स्तवं॥ कुबेर इव वित्ताढ्यो जायते मदनोपमः॥ ८८॥ अष्टोत्तरशतं जप्त्वा योनिमामंत्र्य मंत्रवित्॥ संगम्य पठनादस्य सर्वविद्येश्वरो भवेत्॥ ८९॥ दिगंबरो मुक्तकेशः शय्यास्थो मैथुने नरः॥ जप्त्वा स्तुत्वा महाकालीं खेचरो जायते चिरात्॥ ९०॥ परस्त्रियाभिन्नसंसर्गस्तदा रतः प्रयत्नतः॥ समुत्सार्य ततो जाप्यं तेन स्युः सर्वसिद्धयः॥ ९१॥ शुक्रोत्सारणकाले च जपपूजापरायणः॥ श्मशानकालिकां स्तुत्वा वाणीवत्सकविर्भवेत्॥ ९२॥ आलोकयंश्चिंतयेद्वापि विवस्त्रां परयोषितं॥ जप्त्वा स्तुत्वा महाकालीं खेचरो जायते चिरात्॥ ९३॥ सुरतेषु मनुं जप्त्वा स्तुत्वा भगवतीं शिवां॥ सर्वपापैः परित्यक्तो मानवः स्याच्छुभोपमः॥ ९४॥ कुहूपूर्णेंदुसंक्रांतौ चतुर्दश्यष्टमी शुच॥ नवम्यां मंगलदिने पठेत्स्तोत्रं सुसाधकः॥ ९५॥ भौमावास्यां निशीथे च चतुःपथगतो नरः॥ मांसभक्तबलिं दत्वा सदाचमी नशोणितं॥ ९६॥ अष्टोत्तरशतं जप्त्वा पठन्नामसहस्रकं॥ सुदर्शनो भवेदाशु देवगंधर्वसेवितः॥ ९७॥ येन केन प्रकारेण कालीभक्तिपरायणः॥ स्तंभयेदखिलांल्लोकान्त्रीञ्जानमपि मोहयेत्॥ आकर्षयेद्देवकन्यां वशयेदपि केशवं॥ मारयेदखिलान्दुष्टानुच्चाटयति शात्रवान्॥ ९९॥ नरमार्जारमहिषच्छागमूषिकशोणितैः॥ सास्थिमांसैः समधुभिः सामृतैर्दुग्धपायसैः॥ २००॥ योनिक्षालिततोयेन भगलिंगामृतेन च॥ शुक्रैः पूजाजपांते च कालीं संतर्प्य साधकः॥ १॥ सहस्रनामभिर्दिव्यैः स्तौति भक्तिपरायणः॥ मातेव कालिकातस्य सर्वत्रहितकारिणी॥ २॥ परनिंदापराद्रोहापरवादपराय च॥ खलाय परतंत्राय भ्रष्टाय साधकाय च॥ ३॥ शिवाभक्ताय दु

शायदूषकायदुरात्मने॥ हरिभक्तिविहीनायपरदाररतायच॥४॥ श्लाजपविहीनायसुरास्त्रीनिंदकायच॥ नस्तवंदर्शयेद्दिव्यं संदर्श्य शिवहा
भवेत्॥५॥ कुलीनायमहेच्छायदुर्गाभक्तिपरायच॥ वैष्णवायविशुद्धायशाक्तिभक्तायमंत्रिणे॥६॥ अद्वैतानंदरूपायनिवेदितपरायच॥ द
द्यात्स्तोत्रंमहाकाल्याः साधकायतदाज्ञया॥७॥ गुरुविष्णुमहेशानामभेदेनपरमेश्वरी॥ समंताद्भावयेन्मंत्री महेशोनात्रसंशयः॥८॥
सशाक्तः शिवभक्तश्चसएववैष्णवोत्तमः॥ संपूज्यस्तौतियः कालीमद्वैतंभावमावहन्॥९॥ देव्यानंदेनसानंदोदेवीभक्तिविभक्तिमान्॥
सएवधन्योयस्यार्थेमहेशोव्यग्रमानसः॥१०॥ कामयित्वायथाकामं स्तवमेनमुदीरयेत्॥ सर्वरोगैः परित्यक्तोजायतेमदनोपमः॥११॥
चक्रंवास्तवमेनंवाधारयेदंगसंगतं॥ विलिख्यविधिवत्साधुः सएवकालिकातनुः॥१२॥ देव्यैनिवेदितंयत्तत्तस्यैवभक्षयेन्नरः॥ स
चदिव्यधरोभूत्वादेव्याः पार्श्वचरोभवेत्॥१३॥ नैवेद्यनिंदकंदृष्ट्वानृत्यंतियोगिनीगणाः॥ रक्तपानोद्यताः सर्वामांसास्थिचर्वणोद्य
ताः॥१४॥ तस्मान्निवेदितंदेव्यैदृष्ट्वाश्रुत्वातुमानवः॥ ननिंदेन्मनसावाचासर्वव्याधिपराङ्मुखः॥१५॥ आत्मानंकालिकात्मानंभा
वयन्स्तौतिमानवः॥ शिवोपमंगुरुंध्यात्वासएवश्रीसदाशिवः॥१६॥ यस्यालयेतिष्ठतिनूनमेतत्स्तोत्रंभवान्यालिखितंविधिज्ञैः
गोरोचनालक्तककुंकुमाक्तकर्पूरसिंदूरमधुद्रवेण॥१७॥ नतत्रचोरस्यभयंनहिंस्रान्नवारगस्याशनिवह्निभीतिः॥ उत्पातवायो
रपिनात्रशंकालक्ष्मीस्वयंतत्रवसेदलोलं॥१८॥ स्तोत्रंपठेदेतदनंतपुण्यंकालीपदांभोजपरोमनुष्यः॥ विधानपूजाफलमेवसम्यक्प्राप्नोति
संपूर्णमनोरथोसौ॥१९॥ मुक्ताः श्रीचरणारविंदमुखाः स्वर्गामिनोभोगिनोब्रह्मोपेंद्रशिवात्मकार्चनसुखंलोकेपिसंलेभिरे॥ श्रीमत्शंक
रभक्तिपूर्वकमहाकालीपदध्यायिनोभुक्तिर्मुक्तिमयीस्वयंस्तुतिपरामुक्तिः करस्थायिनी॥१९॥२०॥ इतिश्रीकालीकुलसर्वस्वेशिवपरशु
रामसंवादेमहाकालीस्तुतिसहस्रनामसमाप्तं॥ ॥श्रीभैरवउवाच॥ महाकालप्रवक्ष्यामिदेव्याअष्टोत्तरंशुभं॥ यत्कृत्वापरमंगुह्यं
सर्वत्रभयनाशनं॥ महतीचेदनामायामहादेवीमहेश्वरी॥ महाबुद्धिर्महाचंडीमहाकालीमहाकला॥ महायुद्धामहाबुद्धामहानिद्रामहो

महोद्भवा॥ महाशुभ्रामहालक्ष्मीर्महाभागामहोदया॥३॥ महामोहामहातुष्टिर्महापुष्टिर्महाजया॥ महाधृतिर्महाघोरामहादंष्ट्रामहाद्युतिः॥
॥४॥ महाकीर्तिर्महापद्मामहासिद्धामहातपा॥ महासुधामहोत्साहामहाबोधामहायुधा॥५॥ महाबंधनसंहर्त्री महाभयविनाशनी॥ महाने
त्रामहावक्त्रामहाजिह्वामहाभुजा॥६॥ महामहीमहापाणिर्महाघोषामहानखा॥ महाशांतिर्महाक्षांतिर्महाभ्रांतिर्महामतिः॥७॥ महाश्वा
सामहामुद्रामहापर्वतवासिनी॥ महाब्रह्ममयीमातामहाकायामहारवा॥८॥ महासुरीश्रीर्महतीपार्वतीचंडिकाशिवा॥ महाकुलामहा
लोलामहामातामहाधना॥९॥ महानीलामहाशीलामहावारामहाबला॥ महाचितामहाचित्तामहाहेतुर्यशस्विनी॥ महाविद्यामहासाध्या
महामेध्यामहासती॥ महाश्रुरामहादर्पामहादुःखप्रणाशिनी॥११॥ महामोक्षमहामोक्षामहादक्षासहायनी॥ महाधूम्रामहावाणीमहाशोक
विनाशनी॥१२॥ महाकारामहाधारामहामायाचखेचरी॥ महाक्षेमकरीक्षेम्यामहैश्वर्यप्रदायिनी॥१३॥ महाविषघ्नीविषहामहादुर्गप्रणा
शिनी॥ महादुर्गामहातत्वामहाकैलासवासिनी॥१४॥ महासुतनासुभगामहेज्याचमहासती॥ महाप्रत्यंगिरानित्यामहाप्रेतकराळिनी॥
महाशक्तिर्महामुक्तिर्महामंडलकारिणी॥ यइदंकीर्तयेद्भक्त्याविषमस्थोभवेद्यदि॥ लोहपंजरमध्यस्थं तस्यनश्यतिबंधनं॥ राजानोदा
सतायांतिभवेत्सर्वजनप्रियः॥१७॥ अचलांश्रियमाप्नोतितस्यनश्यंत्युपद्रवाः॥ संग्रामेविजयेच्छत्रूनवगवत्सत्रगामिव॥१८॥ नवि
षक्रमतेदेहेनमृत्युः पावकेजले॥ नाकालेमरणंतस्यकदाचित्तंभविष्यति॥१९॥ यंयंकामयतेकामंतंतंप्राप्नोतिनित्यशः॥ वकुनाकि
महोक्तेनसर्वसिद्धिप्रदंनृणां॥ ॥इतिश्रीरुद्रयामलेभैरवसंवादेश्यामास्तवः संपूर्णः॥ ॥तदुक्तंवीरतंत्रे॥ कर्पूरंमध्यमां
त्यस्वरपररहितंसेंदुवामाक्षियुक्तं बीजंतेमातरेतत्त्रिपुरहरवधूत्रिः कृतंयेजपंति॥ तेषांगद्यानिपद्यानिचमुखकुहरादुल्लसंत्येनवा
चः स्वच्छंदंध्वांतधाराधररुचिरुचिरेसर्वसिद्धिंगतानां॥१॥ ईशानः सेंदुवामश्रवणपरिगतोबीजमन्यन्महेशिद्वंद्वंतेमंदचेतायदिज
पतिजनोवारमेकंकदाचित्॥ जित्वावाचामधीशंधनदमपिचिरंमोहयन्नंबुजाक्षीवृंदंचंद्रार्धचूडेप्रभवतिसमहाघोरशावावतंसे॥२॥

ईशोवैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो बीजं तेद्वंद्वमन्यद्विगलितचिकुरे कालिके ये जपंति॥ द्वेषारंभे तितेच त्रिभुवनमपि तेव
श्यभावं नयंति सृक्काद्वंद्वस्रधाराविनिहितवदने दक्षिणे अस्मरेवा॥३॥ ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुंडं तथाधः सव्ये भीतिं वरं च त्रिज
गद्घहरे कालिके च॥ जस्वेतंनामवर्णं तव मनुविभवं भावयंत्येवमंबतेषामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यंबकस्य॥४॥ वर्गाद्यं वह्निसं
युक्तं विधुरतिललितं तत्त्रयं कूर्चयुग्मं॥ लज्जाद्वंद्वं च पश्चात्स्मितमुखि तदधष्ठद्वयं योजयित्वा॥ मातर्ये यं जपंति स्मरहरमहिले भावयंतस्स्वरू
पं ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवंति॥५॥ प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यंतगुह्यं त्वन्नाम्ना योजयित्वा सकल
मपि सदा भावयंतो जपंति॥ तेषां नेत्रारविंदे विहरति कमला वक्त्रशुभ्रांशुबिंबे वाग्देवी देवि मुंडस्रगतिशयलसत्कंठि पीनस्तनाढ्ये॥६॥ गतासू
नां बाहुप्रकरकृतकांचीपरिलसन्नितंबां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनां॥ श्मशानस्थे तल्पे शवहृदि महाकालसुरतप्रसक्तां त्वां
ध्यायन्जननि जडचेता अपि कविः॥७॥ शिवाभिर्घोराभिः शवनिवहमुंडास्थिनिकरैः परं संकीर्णायां प्रकटितचितायां हरवधूं॥ प्रवि
ष्टां संतुष्टामुपरिसुरतेनापि युवतीं सदा त्वां ध्यायंति क्वचिदपि न तेषां परिभवः॥८॥ वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न धा
ता नापीशो हरिरपि न ते वेत्ति परमं॥ तथापि त्वद्भक्तिर्मुखरयति चास्माकममिते तदेतत्क्षंतव्यं न खलु पशुरोषः समुचितः॥९॥
समंतादापीनस्तनजघनधृग्यौवनवती रतासक्तो नक्तं यदि जपति भक्तस्तव मनुं॥ विवासास्त्वां ध्यायन्गलितचिकुरस्तस्य वशगाः
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः॥१०॥ समः सुस्थीभूतो जपति विपरीतां यदि सदा विचिंत्य त्वां ध्यायन्नतिशयमहाकाल
सुरतां॥ तदा तस्य क्षोणीतलविहरमानस्य विदुषः कराम्भोजे वश्याः स्मरहरमहासिद्धिनिवहाः॥११॥ प्रसूते संसारं जननि भवती पा
लयति च समस्तं क्षित्यादि प्रलयसमये संहरति च॥ अतस्त्वां धातापि त्रिभुवनपतिः श्रीपतिरहो महेशोपि प्रायः सकलमपि किं स्तो ३६
ति भवती॥१२॥ अनेके सेवंते हरगृहिणि गीर्वाणनिवहान् विमूढास्ते मातः किमपि न हि जानंति परमं॥ समाराध्यामाद्यां हरिहरवि

रंच्यादिभिरपि प्रसन्नोस्मि स्मेरां रतिनसमहानंदनिरतां॥१३॥ धरित्री कीलालं शुचिरपि समीरोपि गगनं त्वमेका कल्याणी गिरिश
रमणी कालि सततं॥ स्तुतिः का ते मातर्निजकरुणया माममतिकं प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः॥१४॥ श्मशानस्थः स्व
स्थो गलितचिकुरो दिक्पटधरः सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमं॥ जपंस्त्वत्प्रत्येकं मनुमपि तव ध्याननिरतो महाकालि स्वैरं
स भवति धरित्रीपरिवृढः॥१५॥ गृहे संमार्जन्याः परिगलितवीर्येण चिकुरं समूलं मध्याह्ने वितरति चितायां कुजदिने॥ समुच्चार्य प्रे
म्णा मनुमपि सकृत्कालि सततं गजारूढो याति क्षितिपतिरपि सत्कविरपि सः॥१६॥ सपुष्पैः कीर्णं कुसुमधनुषो मंदिरमहो पुरो ध्याय
न्ध्यायन्जपति परमं वा तव मनुं॥ स गंधर्वश्रेणीपतिरिव कवित्वामृतनदीनदीनः पर्यंते परमपदलीनः प्रभवति॥१७॥ त्रिपंचा
रे पीठे शववशिवहृदि स्मेरवदनां महाकालेनोच्चैर्मदनरसलावण्यनिरतां॥ समासक्तो नक्तं स्वयमपि रतानंदनिरतो जनो यो ध्याय
त्त्वां जननि किल स स्यात्स्मरहरः॥१८॥ सलोमास्थि स्वैरं पललमपि मार्जारमसिवा परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा॥ ब
लिं ते पूजायामपि वितरतां मर्त्यवसतां सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति॥१९॥ वशी लक्षं मंत्रं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणकमलध्याननिपुणः॥ परं नक्तं नग्नो निधुवनविनोदेन च मनुं जपल्लक्षं स स्यात्स्मरहरसमानः क्षितितले॥
॥२०॥ इदं स्तोत्रं मातः स्तव मनुसमुद्धरणमनुः स्वरूपाख्यं पादांबुजयुगलपूजाविधियुतं॥ निशार्धे वा पूजासमयमथवा यस्तु
पठति प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः॥२१॥ कुरंगाक्षीवृंदं तमनुसरति प्रेमतरलं वशस्तस्य क्षोणीपतिरपि कुबे
रप्रतिनिधिः॥ रिपुः कारागारं कलयति च तं केलिकलया चिरं जीवन्मुक्तः स भवति स भक्तः प्रतिजनुः॥२२॥ ॥इति
स्वरूपाख्य कर्पूरस्तवराजं संपूर्णं॥ ॥नमामि ते कालिपदारविंदं तवाश्रयामि प्रणमामि नित्यं॥ ध्यायामि गायामि
वदामि नित्यमेवं कुरु ध्वममचित्तवृत्तिं॥१॥ सीमंतिनी सुंदरि कांतिकन्याकादंबरी घूर्णितनेत्रपद्मा॥ कदंबमालार्चितकेशपा

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इस्लामवाद्याचे संग्रहालय

शाकलावती कौतुकचक्रमध्ये ॥ २ ॥ कंदर्पदर्पाद्रदद्धनेत्रा कामोदिनी बांधवचारुनेत्रा ॥ कलाकलापाकलहंसनादा कलावती
कामकला विलासा ॥ ३ ॥ यत्रैव संगः कुलसुंदरीणां तत्रैव गंगा यमुना च तत्र ॥ वाराणसी मोक्षकरी च तत्र तत्रैव गंगांबुधिसंगम
श्च ॥ ४ ॥ पादारविंदं कुलसुंदरीणां देशांतरे भावितसिद्धमार्गे ॥ विहाय लोकस्तरुणानुभावं गृहांधकूपे विमलं विभाते ॥ ५ ॥ कुरंग
नेत्रेति कुरंगनेत्रा शिवा भवानीति शिवा भवानी ॥ मृगेंद्रमध्येति मृगेंद्रमध्या गौरीति गौरीति वाप्नोति भूयात् ॥ ६ ॥ त्वं तारिणी तार
कहारिणी त्वं त्वं कालिका तारणकारिका त्वं ॥ वैरोचनी दुःखविमोचनी त्वं त्वं भैरवी त्वं भुवनेश्वरी च ॥ ७ ॥ दिगंबरापीनपयोधरा
सा स्मेरा त्रिलोपापरिमुक्तकेशा ॥ सदाशिवांकस्थितिरर्चिता सा श्यामाभिरामा परिपूर्णकामा ॥ ८ ॥ श्रीसुंदरीणां चरणारविंदं
विना नमन्येन च पूजयामि ॥ न जल्पयामि न च कल्पयामि न चाश्रयामि न च देवमन्यं ॥ ९ ॥ जंबावली जावकजालवर्णा सौदामिनी
दाडिमबीजवर्णा ॥ सुवर्णकांचीपरिबद्धमध्या सिद्धार्चिता सिद्धमयी विभाति ॥ १० ॥ कादंबरीपानपरायणानां कुलांगनानां वदना
रविंदं ॥ ध्यानं ममैतद्धि सदैव भूयात्तद्भावनाभावितभूरिभक्तिः ॥ ११ ॥ त्वमेव बुद्धिश्च त्वमेव वृद्धिस्त्वमेव सिद्धिश्च त्वमेव ऋद्धिः ॥
परात्मने वा परमात्मने च प्रमाणमाता इति रूपिणी त्वं ॥ १२ ॥ त्वं कांतिकी कौतुकमूर्तिरात्मा मयूरपृष्ठार्पितपादपद्मा ॥ चंद्रानना
चारुचकोरनेत्रा किं स्तोमि मातस्तव पादपद्मे ॥ १३ ॥ अत्युग्ररंताग्रधृता धरा या घोरानना घोरगभीरनादा ॥ संहारविस्तारविभा
नकर्त्री वाराहि मातस्तत एव सर्वं ॥ १४ ॥ कालस्त्वमेव त्वमेव काष्ठा त्वमेव चात्मा नमनस्त्वमेव ॥ श्रीब्रह्मशक्तिश्च सत्यस्वरूपा
ज्योतिःस्वरूपा जगतः करोषि ॥ १५ ॥ त्वं वैष्णवी विष्णुस्वरूपिणी त्वं त्रैलोक्यरक्षाकरणैकदक्षा ॥ खगेंद्रचूडाघननीलवर्णा
विश्वस्य रक्षा त्वनिलस्त्वमेव ॥ १६ ॥ नानाकलाकेलिकुलालसंगा पीनस्तनी चंद्रमुखी कदाचित् ॥ न विस्मरोनैव विस्मरामो
न विस्मरामः कलहंसनादा ॥ १७ ॥ गतिस्त्वमेवासि गतिस्त्वमेव मतिस्त्वमेवासि मतिस्त्वमेव ॥ धृतिस्त्वमेवासि धृतिस्त्वमेव श्रुति
स्त्वमेवासि श्रुतिस्त्वमेव ॥ १८ ॥ तमालवल्लीलांचितमुंडमाला काली करालाननलोलजिह्वा ॥ विमर्दयंती जगदादिमातः प्रचंडचंडासुरखंडखं
डा ॥ १९ ॥ चतुर्भुजाप्यष्टभुजा त्वमेव षड्बाहुका षोडशहस्तयुक्ता ॥ सहस्रहस्ता शतपाणियुक्ता त्वं कालिके त्वं दशहस्तकासि ॥ २० ॥ युगो
पिकल्पोपि वर्षोपि मासो मन्वंतरं प्रलयो मुहूर्तं ॥ त्वं कालरात्री विरलत्वमेव एकार्णवी काष्ठमयी च काली ॥ २१ ॥ वर्णेश्वरी त्वं पुरवासि
नी त्वं पुरांतकालं परिपूर्णता त्वं ॥ त्वमुग्रतारैकजगत्त्वमेव सुसंमुखी नीलसरस्वती च ॥ २२ ॥ सर्पासना सर्पविभूषणैका धूमावती त्वं भव
ती तिमातः ॥ मातंगिनी त्वं बगला च मातस्त्वमेव काली करवालिनी च ॥ २३ ॥ आधारलग्नं खलु मेरुदंडं तद्वाममुक्तापि च पिंगला च ॥ इडा च
वरक्षेषु निरंतरेषु सुषुम्नमध्याग्रथिताचकस्य ॥ २४ ॥ चित्रांतरस्था खलु वज्रनाडी मृणालतंतुस्वरसुसूक्ष्मा ॥ तन्मध्यगाम्येन विसूक्ष्म
रूपा सा ब्रह्मनाडी तदनंतरेपि ॥ २५ ॥ सहस्रपत्रांबुजनीपगात्रा सुधासुरापानरतिप्रयुक्ता ॥ त्वं सर्वली वाजननी स्वरूपा ब्रह्मस्वरूपा भवदे
हमध्या ॥ २६ ॥ त्वं कुंडलिन्यर्कसहस्रकांतिः कोटींदुकांतिर्भुजगप्रमाणा ॥ आधारयुक्ता कुलकुंडसुप्ता पर्यंकस्वयंभूवदनप्रकाशा ॥ २७ ॥
कात्यायनी कामकलाजयंती सावित्रिपूर्णामधुमांसलुब्धा ॥ त्वमन्नपूर्णा वनदुर्गिका च कामाक्षिका कामवती त्वमंब ॥ २८ ॥ गणेश्वरः षं
मुखः कुबेरो धनेशपुत्रो रविजो जयंतः ॥ त्वं चित्ररूपा च सुकर्मकर्त्री जगतीश्वरी देवमयी त्वमेव ॥ २९ ॥ त्वमेव सर्वासि वदामि तत्त्वं त्वमे
व सर्वस्त्वविकिं त्वमंब ॥ लिंगोप्यलिंगो वयमेव सर्वं यतस्ततः सर्वमयी त्वमंब ॥ ३० ॥ इदं स्तवेंद्रं नियतं च सद्यो भक्त्यैकचित्तः सततं पठेद्यः ॥
पिकस्वरः सर्वजनानुरागं ददाति पुनीतोयि रुद्रदेवभक्तः ॥ ३१ ॥ विघ्नागणेशो भयदुर्गनाशो भोगी सुखी भूमितलोकभर्ता ॥ सदामुदः सर्व
गुणेश्वरोपि दयाचितो रत्नसुतश्रीरायुः ॥ ३२ ॥ शतावधानी रणकालरुद्रो लोकाभिरामो जनसर्वदासः ॥ जित्वाग्रवाणी युवती भुजं
ती सुशीलवार्ताप्रलोकविष्टः ॥ ३३ ॥ ॥ इति श्रीरुद्रयामले भैरवतंत्रे कालिकास्तवेंद्रं समाप्तं ॥ ॥ श्रीभैरव उवाच ॥ स्त
वराजं शृणु रामकालिकाया मनोहरं ॥ यस्य स्मरणमात्रेण कालिकातिप्रसीदति ॥ १ ॥ मक्रत्स्वं यदेवासि भृगुवंशसमुद्भवे ॥ गोपनीयं

३७

प्रयत्नेन पठनीयं परात्परं ॥ काली स्तोत्रं महापुण्यं कस्मै चिन्न प्रकाशितं ॥ कथ्यते त्वदनुरोधात्सर्वपापप्रणाशनं ॥ ३ ॥ शृणु राम शृणु राम शृ
णु राम विशेषतः ॥ गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ ४ ॥ अर्धरात्रे मुक्तकेशो नग्नः शक्तिसमाहितः ॥ रक्तचंदनसिंदूरे स्तथा पंचोपचारकैः
॥ ५ ॥ मत्स्यमांसकारणाद्यैस्तांबूलैश्च विशेषतः ॥ पूजयित्वा महाकाली महाकालरतातुरां ॥ ६ ॥ रेतयुक्तो भवेद्दाता तांबूलं भक्षयेन्नरः ॥
भगलिंगामृतं मध्ये निवेदयेत्स साधकः ॥ जप्त्वा चैव महामंत्रं काली रूपा न संशयः ॥ ७ ॥ मनसा चिंतयेत्काली पठेत्स्तोत्रं सुसाधकः ॥ रक्षो
यक्षपिशाचेभ्यो नित्यं रक्षाकरं परं ॥ ८ ॥ प्रसन्ना कालिका तस्य पुत्रत्वेनानुकंपते ॥ दक्षिणकालिके चाति मुंडमालाविभूषिते ॥ ९ ॥ भक्त्राणाय
यवित्रं मम मज्जा स्यां विनाशय ॥ ज्वलच्चितामध्यसंस्थे परिवारसमन्विते ॥ १० ॥ पादांभोजे च मां नित्यं रक्ष त्वं पुत्रवत्सदा ॥ महामेघछवी श्यामे
मुक्तकेशे चतुर्भुजे ॥ ११ ॥ पांडित्यं कवितां चैव देहि मह्यं सुरेश्वरी ॥ वामोर्ध्वे च महाखड्गं धारयंती भयंकरं ॥ १२ ॥ अधो छिन्नशिरो मुंडे मम
भीर्तिं विनाशय ॥ अभयं दक्षिणे चोर्ध्वे तथाधः पाणिना वरं ॥ कंठावसक्तमुंडालि महाकालि नमोस्तु ते ॥ सततं त्वत्स्वरूपाये स्मरंति साध
कोत्तमाः ॥ १५ ॥ तेषां समस्तरात्रे पुगतिर्व्याहता भवेत् ॥ चिंतयामि च ता मंबरक्ष मां पुत्रवत्सदा ॥ १६ ॥ दिगंबरा कराला स्यां घोररूपां
भयानकां ॥ कर्णमूले च शत्रुर्मा पीनोत्तुंग पयोधरां ॥ १७ ॥ मुंडाली संस्रवद्रक्तसर्वांग चारुचर्चितां ॥ शिवाभिर्घोररावाभिश्चतुर्दिक्षु स
मान्वितं ॥ १८ ॥ पूजाकाले पठेद्यस्तु त्वद्भाव पुलको बुधः ॥ स भवेत्कालिकापुत्र इति ख्यातिमुपागतः ॥ १९ ॥ रजस्वला भगं पश्यन् जप्त्वा
काली महामनुं ॥ स्तवेनानेन संस्तुत्य साधकः किं न साधयेत् ॥ २० ॥ अष्टोत्तरशतं जप्त्वा योनिमामत्र्य मंत्रवित् ॥ संगम्य पठनादेव सर्वविद्ये
श्वरो भवेत् ॥ २१ ॥ मा त्वकालिका तस्य सर्वत्राहितकारिणी ॥ तस्य देहे सदा काली वसन्नेवात्र संशयः ॥ २२ ॥ पूजाजपविहीनाय दुष्टाय
निंदकाय च ॥ गुरुभक्तिविहीनाय असन्मार्गप्रवर्तिने ॥ २३ ॥ शृणु राम प्रयत्नेन स्तवमेनं न दर्शयेत् ॥ प्रमादाद्दर्शयेद्यापि तस्यासिद्धिर्भवेत्र
हि ॥ २४ ॥ ॥ इत्युत्तरतंत्रे परशुरामभैरवसंवादे श्रीदक्षिणकाली स्तवराजः समाप्तः ॥ ॥ अथान्यः स्तवः ॥ नमामि सर्वजन

नीं मुंडमालाविभूषितां ॥ सर्वसिद्धिप्रदां नित्यां शिवरूपां शिवाश्रितां ॥ १ ॥ महाकुलयुतां घोरां कलौ जाग्रत्स्वरूपिणीं ॥ दक्षिणां कालिकां ख्यातां
नमामि विभूतये ॥ २ ॥ य इदं पठति स्तोत्रं पुरतः कालिकेत न ॥ सर्वसिद्धीश्वरो भूत्वा तत्र लोकं स गच्छति ॥ ३ ॥ गद्यपद्यमयी वाणी सभायां तस्य जाय
ते ॥ ४ ॥ ॥ इति काली स्तोत्रं समाप्तं ॥ ॥ ब्रह्मा शक्रादिवंद्यः शशधरकमलालंकृतांघ्रिमूर्तिः सर्वज्ञः सेंदुखंडो मधुमथनसमालिंगि
तासौ द्विमूर्तिः ॥ हंसेशानो च साम्भी विधुरतिललितो दक्षिणकालिके त्वां भूयस्त्सर्वसिध्यै दहनललनयासंगतां प्रोद्गृणाति ॥ १ ॥ पिंगोग्राभिर्जटा
भिः शशधरशकलोत्तंसमंशानुरक्तातालिव्यालिपवीतोज्वलदलचिताभ्यंतरोत्तानसुप्तं ॥ भीमस्यं शूलहस्तं शशिकरविशदं प्रेतभूतेशमंघ्रि
द्वंद्वेनाक्रम्य तस्यो रासि हसितमहाकालरुद्राग्रसंस्था ॥ २ ॥ कालाभ्राभां कडारप्रसमरललितोन्मुक्तधम्मिल्लभारामारक्तोष्ठीं त्रिनेत्रामभयवर
वहं छिन्नमुंडासिहस्तां ॥ दिग्वस्त्रां नारहस्तोच्चयकृतरसनां प्रेतयुग्मावतंसां मान्यो न्यग्रथिकेशाग्रथितगलदसृङ्मुंडमालाभिरामां ॥ ३ ॥ लो
लाजिह्वाग्रदंष्ट्राननकमलचलद्धारवाचाट्टहासां पीनोत्तुंगस्तनाढ्यां पुरहरतरुणीयोगिनीभिः समेतां ॥ यस्त्वां मातः कदापि स्वमनसि कुरुते
तस्य पुण्यैः किमन्यैस्तीर्थस्नानैस्तपोभिर्गुरुभिरथ महादानदीक्षादिभिर्वा ॥ हेलालोलाभिरावाचितकुटिलघनोन्मुक्तकेशव्रजाभिर्मेघश्या
माभिरुद्यद्दिनकरकिरणास्तीक्ष्णभूषणाभिः ॥ रक्षःपाणौ कृपाणं शितमितरकरेतर्जनी बीभ्रतीभिर्दंष्ट्राघोराननाभिर्युवतिभिरभितो योगि
नीभिः समेतां ॥ ५ ॥ फेत्कुर्वत्फेरुवर्यध्वनिजनितमुदस्मेरवक्त्रारविंदां मंदस्तोकप्रसन्नां स्मितवदनमहाकालरुद्राग्रसंस्थां ॥ ये त्वां ध्यायंति
मातः क्वचिदपि न भवं त्याप दां भागिनस्ते नेषां दासा भवंति क्षितिसुरपतयः सर्वसिध्यूर्जितानां ॥ ६ ॥ तीर्थे वा शून्यदेशे शिखरिणि सरितां सं
गमे गह्वरे वाश्मशानागारे श्मशाने शवहृदि सुरते चत्वरे वा प्रदेशे ॥ स्वेच्छाचाराजपंतस्तव भिममखिलं चिंतयंतो विकल्पांस्त्यक्त्वा तः कामयंते य
दिह किमपि तत्सिध्यति स्वेच्छमेषां ॥ ७ ॥ अविवाछागलं वानरमहिषवरं नागजंवा खरं वा विडालं वापि नार्यं पलमथ हविषा मा क्षिकेनाभिसि
क्तं ॥ ऊर्ताकुंडे त्रिकोणे स्मरसदनसमे वा पिलक्षां जितेंद्री वा चावाचामधीशं जयति चिरतरं जीवति क्ष्मातलेस्मिन् ॥ ८ ॥ ये त्वत्त्रस्यैक दा
चिन्निशि विशदधियः कुंडगोलोद्भवाक्तैर्जप्तैः पर्णैरिपर्णौ पितृवनदहने जुकृतिश्रद्दधानाः ॥ तेषां तुष्टा सुगानामविरमपनयत्युत्तमांगे विधा

रन्यस्त्वाद्भुक्षमले रवाः धरिलिखसि चिरैश्वर्यवास्व सतिलं ॥ ९ ॥ यस्त्वां चंद्रार्धचूडां कलितरजयं नागयज्ञोपवीतां चंद्रापीडाग्रितस्त्वां भगवति
सततं ध्यायति श्यामवर्णां ॥ स्वं स्वं संत्यज्य कांतकुसुमशरभयोत्कंपमाना गयस्थैः कांताकांतालकांतारतिपतिमिवतं मन्यमान्याभजंते ॥ १० ॥
येत्वां शूलं कपालं तरुणितरुणिभां बिभ्रतीं भावयंति त्रैलोक्याकर्षसिद्धिर्भवति सुमनसां क्षिप्रमीशानितेषां ॥ येत्वां कत्रीं कृपालीं धृतकरयुगलां
पिंगलां कालरात्रीं ध्यायंत स्त्वां भजंते भगवति सहसातेरिपुं नाशयंति ॥ ११ ॥ भ्रमः किंवा सन्त्रपं जननितनमनोः सर्वमेतेन सा ध्यंतमंत्रान
द्विती यो भवति परतः सिद्धिदा साधकानां ॥ वश्याकर्षप्रमोहप्रहरणमिलनं द्वेषणोच्चाटनानि क्षिप्रं सिध्यंति तेषां किमपरममुना सिद्धयोऽष्टौकृ
रस्थाः ॥ १२ ॥ षट्कोणं भूपुरांतः स्थितमथकमलं तत्र षट्कोणमन्यअस्त्रं वास्मिन्निजंते स्मरहरमहिलेयंत्रमाधारणायाः ॥ अस्मिन्नाराध्यपी
ठे भगवति भवतीं भावनामंत्रगम्यां विश्वारा ध्यत्वा सिद्धिर्भवति सुमनसां सर्वसिध्युद्भवानां ॥ १३ ॥ जगन्मातः कालि त्रिगुणमयि रुद्राणि गिरि
जे भवानी श्रीकंठप्रणयिनि शिवे विश्वमहिले ॥ उदंचित्कारुण्यभगवति तवास्त्वां गुणमयीं गुणातीतेनित्यस्फुटमिति वदन्ये स्तुवदनं ॥ १४ ॥
इदं त्वं मंत्रांगं सकलदुरितध्वंसनकरं स्तवं यः श्रद्धावान्परिपठति कल्याणजनकं ॥ चिरं तस्य क्षोणीतलविहरमानस्य विदुषो भवानीते
नित्यं भवतु वरदाराधनफलं ॥ १५ ॥ इति रुद्रयामले कालिकास्तवराजः समाप्तः ॥ ॥ नमामि कृष्णरूपिणीं कृशांगयष्टिधारि
णीं समस्ततत्वसागरामपारपारगह्वरां ॥ शिवांप्रबिलकं धरां स्फुरत्वशांकशेखरां ललाटनेत्रभास्वरां ज्वलप्रदीप्तसुज्वलां ॥ १ ॥ महे
शकश्यपार्चितां सनत्कुमारसंस्तुतां सुरासुरेंद्रवंदितां मनर्कचारुचेष्टितां ॥ विकारदोषवर्जितां मुमुक्षुभिर्विचेष्टितां विशेषतत्वशोभि
तां नराक्षिनिर्मितस्रजां ॥ ३ ॥ मृगेंद्रवाहनाग्रजां प्रदुष्टसत्वभीषणां ॥ सदोदितेकलक्षणां सुदक्षिणां विलक्षणां ॥ ४ ॥ भुजंगहारहारिणीं
कपालखड्गधारिणीं ॥ सुधोर्मिकोपकारिणीं सुरेंद्रवैरिघातिनीं ॥ ५ ॥ सुनित्यकल्पशाखिनीं द्विजेंद्रदंदतारिणीं ॥ सहस्रसूर्यज्वलांध ३९
नंजयैकवत्सलां ॥ ७ ॥ सुनृत्यहंदमुज्वलां प्रतापिनीं प्रजावती ॥ नमामि मातरं सखीं सुकर्मकारणेगतिं ॥ ८ ॥ हरिप्रियां च पार्वतीमनंतरा

क्तिसंपदां यशः सुभुक्तिमुक्तिदानमो स्तुतेव बालिके ॥ ९ ॥ शिवेद्विजेभवानिके यजेश्वरी त्रिलोचने ॥ प्रसीददेवि पाहिमां जपंति संस्मरंति
च ॥ १० ॥ स्तुवंति येनराः सदा भवंत्यमोघवांछिताः ॥ सदैवते भवाड्ढिया नराः परां शिवेधुना प्रसीदमां करी मिकिं ॥ ११ ॥ अतीवमोहितात्मनोर
था विचेष्टितस्य मे कुरु प्रसादमच्युतं यथाश्रयाम्यहं भृशं ॥ १२ ॥ इमां स्तुतिं मयेरितां पठंति देवि साधकाः नते पुनः सुदुस्तरे पतंति मोहसागरे
॥ १३ ॥ ॥ इति ब्रह्मगाथा समाप्तः ॥ ॥ कैलासशिखरारूढं भैरवं चंद्रशेखरं ॥ वक्षस्थल समासीना भैरवी परिपृच्छति ॥ १ ॥ भैरव्युवाच ॥ देवेश परमेशान लोकानुग्रहकारक ॥ कवचं सूचितं पूर्वं कथयस्व मयि प्रभो ॥ २ ॥ यदि मेम हती प्रीतिस्तावास्ति कुलभैरव ॥ कवचं कालिका
देव्याः कथयस्वानुकंपया ॥ ३ ॥ भैरव उवाच ॥ अप्रकाश्यमिदं देवि नरलोके विशेषतः ॥ लक्षवारं वारितासि स्त्री स्वभावाद्धि पृच्छसि ॥ ४ ॥ अत्यंत
गोपितं गुह्यं कवचं सर्वकामदं ॥ नप्रकाश्यं नृणां देवि गोपनीयं स्वयोनिवत् ॥ ५ ॥ देव्युवाच ॥ सेवका बहवो नाथ कुलधर्मपरायणाः ॥ यतस्ते
त्यक्तजीवाशाः शवोपरि चितोपरि ॥ ६ ॥ तेषां प्रयोगसिध्यर्थं रक्षार्थं च विशेषतः ॥ पृच्छामि वकुधा देव कथयस्व दयानिधे ॥ ७ ॥ श्रीभैरव उ
वाच ॥ कथयामि शृणु प्राज्ञे कालिकाकवचं परं ॥ गोपनीयं पशोरग्रे स्वयोनिमपरे यथा ॥ ८ ॥ सर्वविद्या महाराज्ञी कालिका कालरूपि
णी ॥ कालिकाकवचस्यास्य ॥ भैरव ऋषिः ॥ अनुष्टुप् छंदः ॥ अद्वैतरूपिणी कालिका देवता क्रीं बीजं हूं शक्तिः क्रीं क्रीं कीलकं सर्वकामा
र्थसाधन पुरश्चरण मंत्रसिद्ध्यर्थे जपे विनियोगः ॥ सहस्रारे महापद्मे कर्पूरधवलो गुरुः ॥ वामोरुस्थितशक्तिश्च सदा सर्वत्र रक्षतु ॥ परमा
ख्यो गुरुः पातु परापर गुरुस्तथा ॥ परमेष्ठी गुरुः पातु दिव्यसिद्धश्च मानवः ॥ १० ॥ महादेवी सदा पातु महादेवस्तथावतु ॥ त्रिपुरो भैर
वः पातु दिव्यरूपधरः सदा ॥ ११ ॥ ब्रह्मानंदः सदा पातु पूर्णदेवः सदावतु ॥ चलचित्तस्तथा पातु चलाचलश्च पातु मां ॥ १२ ॥ कुमारः क्रो
धनश्चैव वरदः स्मरदीपनः ॥ मायामायावती चैव सिद्धौघः पातु मां सदा ॥ १३ ॥ विमलः कुशलश्चैव भीमसेनः सुधाकरः ॥ मीनो गोर
क्षकश्चैव भोजदेवः प्रजापतिः ॥ १४ ॥ मूलदेवो रंतिदेवो विघ्नेश्वर हुताशनौ ॥ संतोषः समयानंदः पातु मां मानवः सदा ॥ १५ ॥ स

वैष्यानंदनाथांता अंबाताः परिकीर्तिताः ॥ गणनाथः सदापातु भैरवः पातु मां सदा ॥ १६ ॥ बटुकोनः सदापातु दुर्गा मां परिरक्षतु ॥ शिर
सः पादपर्यंतं पातु मां घोरदक्षिणा ॥ १७ ॥ तथा शिरसि मां काली हृदि मूले च रक्षतु ॥ संपूर्णविद्यया देवी सदा सर्वत्र रक्षतु ॥ १८ ॥ क्रीं क्रीं
क्रीं वदने पातु हृदि हूं हूं सदावतु ॥ ह्रीं ह्रीं पातु सदा धारे दक्षिणे कालिके वतु ॥ १९ ॥ क्रीं क्रीं क्रीं पूर्वे हूं हूं दक्षे ह्रीं ह्रीं वामे तावतु ॥ श
षे पातु सदा स्वाहा मूलं सर्वत्र रक्षतु ॥ २० ॥ षडंगयुवती पातु षडंगेषु सदैव मां ॥ मंत्रराजः सदा पातु ऊर्ध्वाधो दिग्विदिक्षु स्थितः ॥ २१ ॥ च
क्रराजस्थिताश्चापि देवताः परिपांतु मां ॥ उग्रा उग्रप्रभा दीप्ता पातु पूर्वे त्रिकोणके ॥ २२ ॥ नीला घना बलाका च तथा परत्रिकोणके ॥ मा
त्रा मुद्रा मिता चैव तथा मध्यत्रिकोणके ॥ २३ ॥ काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ॥ बहिः षट्कोणके पातु विप्रचित्ता तथा प्रि
ये ॥ २४ ॥ सर्वाः श्यामाः खड्गधरा मुंडमालाविभूषणाः ॥ धारयंत्यो दक्षहस्ते वामहस्ते न तर्जनं ॥ २५ ॥ ब्राह्मी पूर्वदले पातु नारायणी
तथाग्निके ॥ माहेश्वरी दक्षदले चामुंडा राक्षसे वतु ॥ २६ ॥ कौमारी पश्चिमे पातु वायव्ये चापराजिता ॥ वाराही चोत्तरे पातु ऐशान्यां नार
सिंहिका ॥ २७ ॥ ऐं ह्रीं असितांगः पूर्वे भैरवः परिरक्षतु ॥ ऐं ह्रीं रुरुश्चाग्निकोणे ऐं ह्रीं चंडस्तु दक्षिणे ॥ ऐं ह्रीं क्रोधो नैर्ऋत्ये व्याद ऐं ह्रीं
उन्मत्तकस्तथा ॥ पश्चिमे ऐं ह्रीं मां पातु कपाली वायुकोणके ॥ २९ ॥ ऐं ह्रीं भीषणनामा च उत्तरे वतु भैरवः ॥ ऐं ह्रीं संहार ऐशान्यां मातृ
णां अंकगाः शिवाः ॥ ३० ॥ ऐं हेतुबटुकः पूर्वदले पातु सदैव मां ॥ ऐं त्रिपुरांतबटुकश्चाग्नेय्यां सर्वदावतु ॥ ३१ ॥ ऐं वह्निवेतालापि मां ब
टुको दक्षिणे वतु ॥ ऐं अग्निजिह्वा बटुको नैर्ऋत्यां पश्चिमे तथा ॥ ३२ ॥ ऐं कालबटुकः पातु ऐं करालबटुकस्तथा ॥ वायव्ये मामेकपाद उत्त
रे बटुकोवतु ॥ ३३ ॥ ऐं भीमबटुकः पातु ऐशान्यां दिशि मां सदा ॥ ऐं ह्रीं क्लीं हूं फट् स्वाहा याश्चतुःषष्टिश्च मातरः ॥ ३४ ॥ ऊर्ध्वाधो दक्ष
वामाग्रपृष्ठदेशेषु पांतु मां ॥ ऐं हूं सिंहव्याघ्रमुखी पूर्वे मां परिरक्षतु ॥ ऐं कां कार्पासस्थमुखी अग्निकोणे सदावतु ॥ ऐं मां मृगमेषमुखी
दक्षिणे परिरक्षतु ॥ ३६ ॥ ऐं चौं चौं गजवाजिमुखी नैर्ऋत्ये मां सदावतु ॥ ऐं मेंमें बिडालाश्वमुखी पश्चिमे पातु मां सदा ॥ ३७ ॥ ऐं खों खों ४०

क्रोष्टाश्वमुखी वायुकोणे सदावतु ॥ ऐं ह्रां ह्रीं ऊं स्वदीर्घमुखी लंबोदरमहोदरी ॥ ३७ ॥ पातु मामुत्तरे कोणे ऐं ह्रीं ह्रीं शिवकोणके ॥ ह
स्त्रजंघा तालजंघा प्रलंबोष्ठी सदावतु ॥ ३९ ॥ एताः श्मशानवासिन्यो भीषणा विकृताननाः ॥ पांतु मां सर्वदा देव्यः साधकाभीष्टपूर्वि
काः ॥ इंद्रो मां पूर्वतो रक्षेदाग्नेय्यामग्निदेवता ॥ दक्षिणे च यमः पातु नैर्ऋत्यां निर्ऋतिश्च मां ॥ ४० ॥ वरुणो वारुणे पातु वायुर्मां वायवे वतु ॥
कुबेरश्चोत्तरे पायादैशान्यां तु सदा शिवः ॥ ४१ ॥ ऊर्ध्वं ब्रह्मा सदा पातु अधश्चानंतदेवता ॥ सर्वा दिदिक्षु सदाः पातु वज्राद्याः श्चास्त्र
जागणाः ॥ ४३ ॥ कालिका पातु शिरसि हृदये कालिकावतु ॥ आधारे कालिका पातु पादयोः कालिकावतु ॥ ४४ ॥ दिक्षु मां कालि
का पातु विदिक्षु कालिकावतु ॥ ऊर्ध्वं मे कालिका पातु अधश्च कालिकावतु ॥ ४५ ॥ चर्मासृङ्मांसमेदास्थिमज्जाशुक्राणि मे वतु ॥
इंद्रियाणि मनश्चैव देहं संधिं च मे वतु ॥ ४६ ॥ प्राणादीन्दश मे नित्यं कालिका पातु सर्वदा ॥ आकेशात्पादपर्यंतं कालिका मे सदा
वतु ॥ दिशं तं कालिका पातु पथि मां पातु कालिका ॥ ४ शयने कालिका पातु सर्वकार्येषु कालिका ॥ प्राणान्मे कालिका पातु दारान्मे
पातु कालिका ॥ ४८ ॥ पुत्रान्मे कालिका पातु धनं मे पातु कालिका ॥ यत्र मे संशयो विघ्नास्ते नश्यंतु शिवाज्ञया ॥ ४९ ॥ इति दं कवचं देवी ब्र
ह्मलोकेषु दुर्लभं ॥ तव प्रीत्या मया ख्यातं गोपनीयं स्वयोनिवत् ॥ ५० ॥ तव नाम्नि मंत्रे देवि सर्वयज्ञफलं लभेत् ॥ सर्वपापक्षयं याति
वांछा सर्वत्र सिध्यति ॥ नाम्नः शतगुणं स्तोत्रं तस्माच्छतगुणो जपः ॥ तस्माच्छताधिकं ध्यानं कवचं तच्छताधिकं ॥ ५२ ॥ शुचिः स
माहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥ संस्थाप्य वामभागे तु शक्तिं स्वाभिपरायणा ॥ रक्तवस्त्रासमासीनां शिवमंत्रधरां शुभां ॥ या श
क्तिः सा महादेवी शिवरूपस्तु साधकः ॥ ५४ ॥ अन्योन्यचिंतनाद्देवि देवत्वमुपजायते ॥ शक्तियुक्तो यजेद्देवीं चक्रे वामनसा प्रिये ॥
भोगैस्तु मधुपर्काद्यैस्तांबूलाद्यैः सुवासितैः ॥ ततस्तु कवचं देवि पठेदेकमनाः प्रिये ॥ ५६ ॥ तस्य सर्वार्थसिद्धिः स्यान्नात्र कार्या विचा
रणा ॥ इदं रहस्यं परमं परं स्वस्त्ययनं महत् ॥ ५७ ॥ यः सकृत्तु पठेद्देवि शृणुयाद्वा समाहितः ॥ सर्वान्स लभते कामान्परं देवीपुरं व्रजे

J. BHAU DAJI MEMORIAL

त॥ ५८॥ यस्तुसक्कसठेदेविकवचंदेवदुर्लभं॥ सर्वयज्ञफलंतस्यभवेदेवनसंशयः॥ ५९॥ संग्रामेषुयजेच्छत्रून्मातंगानिवकेसरी॥
नास्यानितस्यशस्त्राणिशरीरेप्रपतंतिहि॥ ६०॥ नतस्यजायतेव्याधिर्नास्तिदुःखंकदाचन॥ गतिःसर्वत्रतस्यैवेवायुतुल्यःसदाभ
वेत॥ ६१॥ दीर्घायुःकामभोगीशोगुरुभक्तोभवेत्सदा॥ अहोकवचमहात्म्यंपठमानस्यनित्यशः॥ ६२॥ विनापियोगचर्येणयोगिनां
समतांव्रजेत्॥ भूर्जत्वचिसमालिख्यचक्रंतत्रविनिर्मितं॥ ६३॥ मध्यात्रिकोणेसंलिख्यसाध्यसाधकयोर्लिपिं॥ उद्धरेन्मूलमंत्रेणमा
तृकार्णैर्नवेष्टयेत्॥ ६४॥ लघुमिश्रेणचंद्रेणचंदनाभ्यांचसुंदरी॥ एतद्यंत्रंमहेशानिसुरासुरसुदुर्लभं॥ गोरोचनाकुंकुमेनतद्बाह्य
कवचंलिखेत्॥ श्वेतसूत्रेणसंवेष्ट्यलाक्षयापरिमंडयेत्॥ ६६॥ पंचामृतैःपंचगव्यैःस्नापयित्वाशुभेदिने॥ संपूज्यदेवतारूपांगुटिकां
सर्वकामदां॥ ६७॥ प्राणप्रतिष्ठामंत्रेणप्राणांस्तत्रनियोजयेत्॥ अंतर्यामिंततोध्यात्वातत्रसंस्थापयेद्बुधः॥ ६८॥ एषातुगुटिकादे
विकंठलग्नाखिलप्रदा॥ शीर्षेवश्यकरीदेविनाभौस्तंभनकारिणी॥ ६९॥ बध्वावामभुजेधृत्वासर्ववैरिक्षयंकरी॥ जठरेरोगदम
नीधुत्वदाहृदिसंस्थिता॥ ७०॥ विद्याकरीललाटस्थाशिखायांतुयशःप्रदा॥ सर्वकामप्रदादेविसर्वरोगक्षयंकरी॥ ७१॥ दक्षिणेबा
हुमूलेपियदितिष्ठतिसर्वदा॥ सदासर्वार्थसिद्धिःस्याद्यावज्जन्मनिवर्तते॥ इहातुकवचस्यास्यपठनाद्धारणात्प्रिये॥ सर्वान्कामान
वाप्नोतितवस्नेहात्प्रकाशितं॥ ७२॥ गुरोःपादप्रसादेनसाद्धिर्यांलभतेयदि॥ तथापिकवचंदेवित्रिषुलोकेषुदुर्लभं॥ ७४॥ गुरुर्देवो
हरःसाक्षात्तत्पत्नीपरमेश्वरी॥ यस्यभक्तिर्गुरौनित्यंवर्ततेदेववल्लिये॥ ७५॥ तदामंत्रस्ययंत्रस्यसिद्धिर्भवतिनान्यथा॥ कवचस्यत
थासिद्धिर्गुटिकायाश्चसुंदरी॥ ७६॥ अज्ञात्वाकवचंदेविभजस्वागुरुपादुकां॥ तत्फलंनसमाप्नोतिपरेचनरकंव्रजेत्॥ ७७॥ सत्यं
सत्यंपुनःसत्यंसत्यंसत्यंपुनःपुनः॥ नशक्तोस्मिप्रभावंतुकवचस्यास्यवर्णितुं॥ ७८॥ यस्मैकस्मैनदातव्यंकवचेशांसुदुर्लभं॥ न
देयंपरशिष्येभ्यःकृपणेभ्यश्चसुंदरी॥ ७९॥ शिष्यायभक्तिहीनायवंचकायतथैवच॥ गुरुभक्तिविहीनायपरदाररतायच॥ ८१॥

निंदकाय सुशीतलाय दांभिकाय च सुंदरी ॥ पूजालपविहीनाय स्त्रीसुरानिंदकाय च ॥ ८१ ॥ योददाति निषेधेभ्यः कवचं सन्मुखोदितं ॥ व
लारित स्यन रयंति आयुर्विद्यायशोबलं ॥ ८२ ॥ तंहिंसंति सदादेवि योगिन्यो मातृमंडलाः ॥ पर्तनरके मांप्नोति कोटिवर्षशतानि च ॥ ८३ ॥
देहि शिष्याय शांताय गुरुभक्तिपराय च ॥ सर्वलक्षणसंयुक्तं तंत्रमंत्रयुताय च ॥ ८४ ॥ ॥ इति श्रीरुद्रयामले उत्तरतंत्रे काली प्रस्ता
वे कालभैरवसंवादे दक्षिणकालिकाकवचं समाप्तं ॥ ॥ विरूपाक्ष उवाच ॥ नमामि गुरुमक्षोभ्यं मंत्रशक्तिसमन्वितं ॥ प्रसन्नं ज्ञान
विज्ञानं हेतुबुद्धिप्रकाशकं ॥ १ ॥ गजेंद्रवदनं नौमि रक्तविघ्नविदारकं ॥ भैरवः सर्वदा पातु ऋषिर्मे शिरसोपरि ॥ २ ॥ मुखे छंदः सदा पातु
त्रिभुवनविजयात्मकं ॥ गुणत्रयमयी शक्तिः परशक्तिस्तुरीयकं ॥ ३ ॥ ब्रह्मस्वरूपिणी पातु हृदये कालिका मम ॥ बीजस्वरूपिणी पातु ह्रीं
कारी शक्तिरूपिणी ॥ ४ ॥ ईशशक्तिः सर्वदा पातु सर्वरक्षास्वरूपिणी ॥ महाकालः सदा पातु महाभीमपराक्रमः ॥ ५ ॥ सदा पातु मम का
म्यानि सर्वसिद्धीश्वरोवतु ॥ आदिल्वर्णपर्यंता हृदये मम मातृका ॥ एषांता चादिदांता श्च रक्षंतु बाहुयुग्मके ॥ ६ ॥ णभमध्यगताव
र्णामादिक्षांता स्तथैव च ॥ सबिंदवः सदा पातु जंघयोरुभयोर्मम ॥ ७ ॥ भूतप्रेतपिशाचेभ्यो विघ्नदेहास्तथा पुनः ॥ इत्थंभावाः सम
ध्याश्च वर्णा रक्षं मां सदा ॥ ८ ॥ समस्तरोमकूपेषु मर्मस्थानेषु संधिषु ॥ नाडिधातुविकारेषु रक्षंतु मम मातृकाः ॥ ९ ॥ शक्तिराधारस्व
पाया पातु मां परमेश्वरी ॥ अनंतः सर्वदा पातु सर्वदेवमयः स्वयं ॥ १० ॥ फणागतविनिः पातुः समुद्रः पातु मां सदा ॥ रत्नद्वीपः सदा पा
तु रक्षंतु कल्पपादपाः ॥ ११ ॥ श्मशानपीठकः पातु पातु मां मणिवेदिका ॥ सदाशिवमहाप्रेतासनो मां परिरक्षतु ॥ १२ ॥ द्वारदेशे द्वा
रपालाये योगिन्यः पातु मां सदा ॥ सिद्धयोष्टौ सदा पातु पूर्वादिवसुदिग्गताः ॥ १३ ॥ काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ॥
विप्रचित्तां महाभागां नमामि सर्वसिद्धये ॥ १४ ॥ एतास्तु वरयोगिन्यो बहिःषट्कोणकस्थिताः ॥ रक्षंतु मां सदा देव्यो मातरो भक्तवत्स
लाः ॥ १५ ॥ उग्रां उग्रप्रभां दीप्तां नमाम्यात्मविभूतये ॥ सर्वसिद्धिप्रदं यन्तु पातु मां पुत्रवत्सरा ॥ १६ ॥ नीलां घनां बलाकां च प्रणमामि स

मुल्कका ॥ सर्वविघ्नान्समुत्सार्य रक्षंतु कलुषार्णवात् ॥ १७ ॥ मात्रामुद्रामृता नां च नमामि चरणांबुजं ॥ देवीं प्रेमसखीं नां च शरणं यामि
सिद्धये ॥ १८ ॥ एताः पंचदशे कोणे एकैकाः वरदाः सदा ॥ तर्जनं वामहस्तेन खड्गं दक्षेण संयुतं ॥ १९ ॥ मुंडमालाधराः सर्वा नीलांजनच
यापभाः ॥ शत्रुहा सिद्धिदाः श्चंडाः पातु मां कालिकाप्रिया ॥ २० ॥ बहिः पद्मदलाग्रे तु ब्रह्माण्याद्यष्टशक्तयः ॥ रक्षंतु मे प्रयच्छंतु सर्वसिद्धि
दयान्विताः ॥ २१ ॥ ब्रह्माणी पातु मां पूर्वे सर्वाभयवरप्रदा ॥ वह्नौ नारायणी पातु सर्वकामार्थसिद्धिदा ॥ २२ ॥ माहेशी दक्षिणे पातु सर्वमं
गलकारिणी ॥ चामुंडा नैरृते पातु सर्वशत्रुप्रमर्दिनी ॥ २३ ॥ कौमारी पश्चिमे पातु शक्तिहस्ता निषूदिनी ॥ अपराजिता च वायव्ये पातु मां
जयदा शुभा ॥ उत्तरे पातु वाराही वरदा घोरभाषिणी ॥ नारसिंही सदा पातु ऐशान्यां भयनाशिनी ॥ २५ ॥ एतास्तु परविद्यायाः शक्तयश्चा
ष्टदेवताः ॥ ब्रह्मविष्णुशिवादीनां तेजसि त्वकरा नरा ॥ २६ ॥ सूर्यं उवाक्ति पीठे तु वैदेवि परमेश्वरि ॥ नमामि दक्षिणामूर्तिकालिकां परभै
रवीं ॥ २७ ॥ भिन्नांजनचयप्रख्यां प्रवीणशवसंस्थितां ॥ गलच्छोणितधाराभिः स्मेराननसरोरुहां ॥ २८ ॥ पीनोन्नतकुचद्वंद्वां पीन
वक्षोनितंबिनीं ॥ महाकालसमाविष्टां स्वेरानंदोपसंस्थितां ॥ मुखमांद्र स्मितां मारमोदिनी मदविह्वलां ॥ आरक्तमुखसांद्राभिर्ने
त्रालीभिर्विराजितां ॥ ३० ॥ शवद्वयकृतोत्तंसां सिंदूरतिलकोज्वलां ॥ पंचाशन्मुंडघटितमालाशोभितलोहितां ॥ नानामणिवि
शोभाढ्यां नानालंकारभूषितां ॥ ३२ ॥ शवास्थिकृतकेयूरशंखकंकणमंडितां ॥ शववक्षःसमारूढां लेलिहानां शवं ऋचितं ॥ ३३ ॥
शिवमांसकृतग्रासां साट्टहासां मुहुर्मुहुः ॥ खड्गमुंडधरां वामे सव्ये वराभयप्रदां ॥ ३४ ॥ दंतुरां च महारौद्रीं चंडनादातिभीषणां ॥ शि
वाभिर्घोररावाभिर्वेष्टितां भयनाशिनीं ॥ ३५ ॥ मा भैर्मा भैः स्वभक्तेषु जल्पंती घोरनिःस्वनैः ॥ इत्यं किमिच्छथ ब्रूयुर्ददामीति प्रभाषि
णीं ॥ ३६ ॥ त्वं गतिः शरणं देवि त्वं माता परमेश्वरी ॥ पाहि मां करुणामात्रे नमस्ते परमेश्वरी ॥ ३७ ॥ नमस्ते कालिके देवि नमस्ते भक्तव
त्सले ॥ मूर्खतां हर मे देवी प्रतिभाजयदायिके ॥ ३८ ॥ गद्यपद्यमयी वाणी तर्कव्याकरणादिकां ॥ अनधीतगतां विद्यां देहि दक्षिणका

लिके॥३९॥जयंदेहिसभामध्येधनंदेहिधनागमे॥देहिमेचिरजीवित्वंकालिकेरक्षदक्षिणे॥४०॥राज्यंदेहियशोदेहिपुत्रान्दारान्धनं
तथा॥देहांतेदेहिमेमुक्तिंजगन्मातर्नमोस्तुते॥४१॥मंगलाभैरवीदुर्गाकालिकात्रिदशेश्वरी॥उमाहैमवतीकन्याकल्याणीभैरवेश्व
री॥४२॥कालीब्राह्मीचमाहेशीकौमारीमधुसूदनी॥वाराहीवासवीचंडात्वांजगुर्मुनयोमुदा॥४३॥उग्रतारेतितारेतिशिवेत्येकज
टेतिच॥लोकान्तरेतिबालेतिगीयतेमुनिभिःसदा॥४४॥यथाकालीतथातारातथाछिन्नाचकुल्लुका॥एकमूर्तिश्चतुर्भिन्नादेवित्वंकालि
कापरा॥४५॥एकाद्वित्रिद्विधादेविकोटिधानंतरूपिणी॥अंगांगकैर्नामभिन्नैःकालिकेतिप्रगीयते॥४६॥शंभुसेनमुखेनेनगुणान्च
कुंक्षमानते॥चापल्यंयत्कृतंसर्वंक्षमस्वसुखदाभव॥प्राणान्रक्षयशोरक्षपुत्रदाराधनंतथा॥सर्वकालेसर्वदेशेपाहिदक्षिणका
लिके॥४८॥यःसंपूज्यपठेद्भक्त्यादिवावासंध्ययोस्तथा॥अवाप्यमहतींप्रज्ञांसर्वान्कामानवाप्नुयात्॥४९॥यद्यत्प्रार्थयतेचित्ते
तदाप्नोतिकाकथा॥स्वयंलक्ष्मीर्वसेद्गेहेमुक्तिःकरगतापुनः॥५०॥ ॥इतिविरूपाक्षविरचितंकवचं॥ ॥२॥वीरभद्र
उवाच॥ॐकालिकाकवचस्यास्यऋषिर्भैरवउच्यते॥छंदोनुष्टुप्समाख्यातंदेवीदक्षिणकालिका॥शक्तिर्ह्रींबीजंक्रींज्ञानिविनि
योगश्चरक्षिणे॥शिरसिनयनभालेभ्रूयुगेकर्णगंडेवदनरदनजिह्वास्कंधदेशेगलेच॥भुजहृदयस्वपार्श्वेपृष्ठनाभौचरुद्रेकटिगुद
करपादेसर्वतोमंत्रवर्णान्॥१॥गुणबीजंयुगंमायालज्जायुग्मंचबोधनं॥गुणमायात्रपावह्निवल्लभांताक्रमादिह॥२॥शास्त्रवा
देमहाघोरेशत्रुसंपातसंगमे॥मंगलाच्छन्नकार्येषुस्तंभनमोहनेतथा॥३॥मारणादितथाकार्येनिर्विघ्नंमेप्रजायतां॥यदिवाशुद्ध
भिगदेसभायांवादुर्गमे॥शुद्धंतादितिज्ञानंतुसर्वत्रहरवल्लभे॥महाप्रेतासनंपातुशिवाख्यरक्षमांसदा॥५॥रथनामभृगजाश्वान्
रुंडमालासदावतु॥अभयंवरदंचैवखड्गंमुंडंचरक्षतु॥६॥शवद्वयंतथाकर्णेघोरदंष्ट्रःसदावतु॥मुक्ताश्चचिकुराःसंतुममविघ्न
विनाशकाः॥७॥कालिकामांसदापातुचंडमुंडविनाशिनी॥चामुंडासर्वदापातुपातालतलवासिनी॥८॥महाकालःसदापातु ४३

बीजभूषितमस्तकः॥इतीदंकवचंयस्तुकालिकायाःपठेन्नरः॥मंत्रवत्स्यतेधीमान्संप्राप्नोतिमनोगतिं॥भूर्जपत्रेसुवर्णेवाराजतेवा
थपत्रके॥१०॥लिखित्वाधारयेद्यंत्रंयत्रकुत्रापिमंत्रयुक्॥तस्यदर्शनमात्रेणवैरिणोनिःप्रभांगताः॥११॥सर्वंमनोगतिंतस्यकरतीरस
मंभवेत्॥अज्ञात्वाकवचंयस्तुपूजयेद्दक्षिकांनरः॥१२॥यावज्जीवंभवेद्रोगीसत्यंभवतिजीवितं॥भक्त्याधारयतेयस्तुसर्वान्कामानवाप्नुया
त्॥१३॥ ॥इतिश्रीवीरभद्रतंत्रेवीरभद्रविरचितंश्रीदक्षिणकालीकवचंसंपूर्णं॥ ॥३॥ॐनमःकालिकायैॐनमःसर्वसिद्धि
योगिनीभ्यःॐनमःसर्वसिद्धिमातृभ्यःॐनमःउदितोदितानंदनायै॰ॐनमःसकलकुलचंद्रिकायै॰ॐनमोभगवत्यैचंडमालिन्यै
नमोनमः परमहंसनिर्वाणमार्गदेविषमोपप्लवनाशिनीममशत्रून्मर्दय२खादय२त्रिशूलेनभिंधि२छिंधि२खड्गेनताडय२छेदय२प
राक्रो२केमहाभैरवरूपधारिणीत्रिदशावरनमितेसकलमंत्रमातःप्रणतजनवत्सलेदेविकालिकेशीनरकुं२फट्स्वाहाशतद्वयंतुवर्णा
नांनाम्नात्रैलोक्यमोहनंयएनंधारयेन्नित्यंत्रैलोक्यंवशमानयेत्॥ ॥इतिकालिकापुराणेत्रैलोक्यमोहनंनामसमाप्तं॥ ॥३॥
श्रीपार्वत्युवाच॥अधुनादेवदेवेशकवचंवज्रपंजरं॥कालीरूपाकराक्षोभैकवचंकथयप्रभो॥१॥ईश्वरउवाच॥शृणुदेविप्रवक्ष्या
मितवाग्रेकवचोत्तमं॥यस्मिन्कृतेभवत्येवश्रीकालीतन्मयोनरः॥२॥विनामुनानसिद्धःस्यात्कालिकादक्षिणापरा॥अतःकवचिना
भाव्यंसाधकेंद्रेणसिद्धये॥३॥ऋषिरस्यस्मृतःशंभुःछंदःसंस्कृतिरुत्तमं॥देवतांदक्षिणांध्यात्वाकालीप्रत्यक्षरंन्यसेत्॥४॥अंभोदश्या
मलांगीमतिविकटदंतीलोलजिह्वांजटालांमुंडीवामेदधानांकरकमलतलेदक्षिणेचंद्रहासां॥खड्गंडाखधाराधरमुखकमलां
प्रेतदोर्वल्लिकांचीमाध्वीकांमत्तनेत्रांशवहृदयगतांनौमिकालींसकालां॥५॥क्रींबीजंमूर्ध्निगंडद्वितयमपिपुनस्तद्द्वयंद्वंद्वयंचने
त्रद्वंद्वेचलज्जायुगलमपिपुनःकर्णयोर्विन्यसेच्च॥नासाद्वंद्वेततोवैरसनवदनयोर्नेत्रकेदंतपंक्त्यांलिंगेभ्रूहृदुरेचत्रितयमपिपुनर्बी
जमाद्यंन्यसेद्धे॥६॥बाहुद्वंद्वेचरूंरूंचरणयुगुलकेशक्तिबीजद्वयंचस्वाहासर्वत्रदेहेविशदतरमतिर्विन्यसेद्व्यापकेन॥एवंन्यासंवि

धायाथत्रिभुवनवश्येख्यातकीर्तिः कवींद्रोवज्रांगोज्जीवलोके जयतिविकुधनः साधकः सिद्धमंत्रः॥ क्रीं क्रीं क्रीं देविहूं हूं कहक
हकह क्रीं हाहा दक्षिणे लंकं कंकं कंक रालेकुककककक लिनेकालिके कालपति॥ क्रीं क्रीं क्रीं यो निहूं हूं हहह महिले कोलि क्रीं क्रीं
हरिं रो स्वाहे संनेत्रने त्रेभभभभ भवतीभूतयेनो भवत्वं॥ ८॥ भूतैः प्रेतैः पिशाचैः ग्रहगणसकलैः पन्नगैर्योगिनीभिः॥ पीडायां
वावनेवारणे रिपुरहने प्रांतरे षुप्रवाहे॥ विद्यावादेदवेवा भनुमपिपरमंपः स्मेरसाधकश्चप्राप्यानंदस्तनूपंतरतिताविभयंसागरंनं
रतसः॥ ९॥ ॥ इति रुद्रयामले वज्रपंजराख्यं कालिकाकवचं समाप्तः॥ ॥ ४॥ श्री महाकालभैरव उवाच॥ कालिका
कमलाकाली कामसिद्धामहोदरी॥ भत्यक्षोभवचामुंडे भक्त्याकवच पाठतः॥ २॥ कुसुंभकुसुमारोर्षपायात्कमललोचना॥ ल
लाटंपातुचामुंडाकंठं रक्षतुकालिका॥ हृदयंपातुकालांगी नाभिंरक्षतुपार्वती॥ जघ्नंपातुभीमाक्षी मध्यंरक्षतुचर्चिका॥ ३॥ ऊरू
मेपातुलोलाक्षी कामस्थानं शिवांगना॥ जंघायुग्मं भद्रकाली पादाग्रंपातुभीषणा॥ कटिंरक्षतुसर्वेशी पृष्ठं दक्षिणकालिका॥
श्रीवांरक्षतुक्रोधांगी नेत्रेरक्षतुभीषणा॥ ५॥ पार्श्वद्वयं लोलजिह्वा स्तनौरक्षतुशांकरी॥ भुजद्वयं चलोलाक्षी श्रवणेपातुसुं
दरी॥ गंडंमेपातुविमला नासिकां विजयावतु॥ रक्तदंतादंतराशिं चुबुकं कुसुमायुधा॥ ७॥ अधरंपातुमेचंडा भरुंडालोमसं
चयं॥ चित्रांमेपातुपारंडा सुषुम्नां पातुचित्रिणी॥ ८॥ इडांपातुमेभद्रा पिंगलांरक्तलोचना॥ ब्रह्मरंध्रंमेधवर्णा शुम्भापातु
नितंबकं॥ नाडीरंध्रंपातुविद्या षट्चक्रंवह्निवासिनी॥ पंचभूतं क्रींडचंडाजीवंरक्षतुमंगला॥ १०॥ इंद्रियंकामंकमलात्व
रितासर्वतोवतु॥ मनोरक्षतुमालंकाबुद्धिंरक्षतुमानदा॥ क्षेत्रंरक्षतुपाशीकापशुंरक्षतुपिंगला॥ अर्थंरक्षतुपिंगाक्षी ध
र्मंरक्षतुवज्रिणी॥ १२॥ ऐश्वर्यंपातुमेदुर्गा भार्यांरक्षतुपद्मिनी॥ प्रियंवदासदापातुशयनंभोजनंपरा॥ १३॥ निद्रांरक्षतुमा
तंगीमानंरक्षतुवारुणी॥ अस्त्रंरक्षतुवज्रांगी पुत्रंरक्षतुभारती॥ १४॥ यानिमेसर्वगात्राणि सर्वमंगलकारिणी॥ इदंतुकव

चंदेवि त्रिषुलोकेषुदुर्लभं॥ १५॥ शुचिः समाहितोभूत्वा भक्तिश्रद्धासमन्वितः॥ त्रिसंध्यंपठनादेवि यत्फलंशृणुपार्वति॥ १६॥
वारमेकंपठेद्धीमान् महापातकनाशनं॥ द्विवारंयः पठेद्भक्त्या पूजाफललभेन्नरः॥ १७॥ वारत्रयस्यपठने महदैश्वर्यमाप्नुया
त्॥ मासमेकंक्रमेणैव त्रिसंध्यंयः पठेत्सुधीः॥ १८॥ सर्वान्सलभतेकामान् शिवलोकमवाप्नुयात्॥ श्रीधायुः कामभोगीशोध
नधान्यसमृद्धिमान्॥ जितव्याधीरूपवान् स्यात् गुणवानभिजायते॥ रणेजयप्रदंदेवि शूलरोगनिवारणं॥ विषमज्वरसंदाहवेद
नाकल्पितंयदा॥ २१॥ आतुरंसंस्पृशन्भुजस्वा सद्योरोगात्प्रमुच्यते॥ काश्मारितीर्थयात्रां तुभादक्षिण्यंभुवस्तथा॥ २२॥ गंगास्ना
नसहस्रस्यपुण्यंकवचपाठतः॥ ॥ इति कालिकाकल्पेकालिकाकवचं समाप्तं॥ ५॥ ॥ देव्युवाच॥ देवदेवमहादेव
संसारप्रीतिकारक॥ महाविद्येश्वरी विद्यां मयित्वं कथयप्रभो॥ १॥ श्री शिव उवाच॥ शृणुदेवि महाविद्या सर्वविद्योत्तमोत्तमां॥
सर्वेश्वरी महाविद्यां सर्वदेवप्रपूजितां॥ २॥ तस्याः कटाक्षमात्रेण त्रैलोक्यविजयी हरः॥ बभूवकमलानाथो विभुर्ब्रह्मा प्रजाप
तिः॥ ३॥ शचीपतिर्देवराजो यमोपिधर्मनायकः॥ त्रैलोक्यपावनी गंगा कमला श्रीहरिप्रिया॥ ४॥ दिनस्वामी रविश्चंद्रोनि
शापतिर्गृहेश्वरः॥ वरुणोपिजलाधीशः कुबेरोपिधनेश्वरः॥ ५॥ अव्याहतगतिर्वायुर्गणेशो विघ्ननायकः॥ वागीश्वरः सुरा
चार्यो दैत्याचार्यः कविर्महान्॥ ६॥ एवंहि सर्वदेवोपि सर्वसिद्धीश्वरः प्रिये॥ तस्यास्तु कवचंपुण्यं मात्तजारंविभावय॥ ७॥
श्री शिव उवाच॥ श्री मद्दक्षिणकालिकामंत्रमयकवचस्य महाकालभैरव ऋषिरनुष्टुप्छंदः॥ श्रीश्मशानकालिकादेवता॥
धर्मार्थकाममोक्षार्थे जपेविनियोगः॥ ललाटंपातुत्रक्रीं भैरवेणाराधिता सदा॥ नेत्रयुग्मं सदापातु क्रीं क्रीं क्रीं विष्णुसेविता॥
॥ १॥ हूं हूं ह्रीं ह्रीं पातुनासां ब्रह्मणासेविता ध्रुवं॥ क्रीं क्रीं क्रीं वदनंपातुराकेणाराधितापुरा॥ २॥ क्रीं स्वाहा शरणंपातुरा
मेणैवप्रपूजिता॥ क्रीं हूं ह्रीं स्वाहा रसनां गंगयासेवितावतु॥ ३॥ दंतपंक्तिः सदापातु क्रीं क्रीं हूं हूं ह्रीं ह्रीं मम॥ भुक्तिमुक्ति

श्या.२
४५

प्रदाकाली श्रियानित्यंसुसेविता॥ ओष्ठाधारंसदापातुक्रींक्रींहूंहूंक्रींक्रीं मम॥ सूर्येणाराधिताविद्यासर्वसिद्धिप्रदायिका॥ कंठंपातुमहाका
ली ॐ क्रीं हूं मेस्वाहासदा॥६॥ चंद्रेणाराधिताविद्याचतुर्वर्गफलप्रदा॥ हस्तौपातुसदाक्रींक्रींहूंहूंक्रींक्रीं स्वाहामम॥७॥ सुखमोक्षप्रदाका
लीवरुणेनैवसेविता॥ ॐक्रींहूंक्रींफट्स्वाहाहृदयंपातुसर्वदा॥८॥ सर्वसंपत्प्रदाकालीकुबेरेणोपसेविता॥ ऐंक्रींॐऐंक्रींफट्स्वाहास्तनद्व
द्वंसदावतु॥९॥ वायुनाघासिताकालीयशोबलसुखप्रदा॥ क्रींक्रींहूंहूंक्रींक्रींफट्स्वाहापातुकुक्षिदेशके॥१०॥ सर्वसिद्धिप्रदाकालीग
णनाथेनसेविता॥ क्रींदक्षिणेकालिकेक्रींस्वाहानाभिंसदावतु॥११॥ सिद्धिबुद्धिप्रदाकालीगुरुणासेवितापुरा॥ लिंगंपातुसदाहूंहूंक्रींक्रीं
दक्षिणकालिके॥१२॥ शुक्रेणाराधिताकालीत्रैलोक्यजयदायिनी॥ पात्वंडकोशंक्रींक्रींतुदक्षिणेकालिकेस्वाहा॥१३॥ धरयासेविताविं
द्यासर्वरत्नप्रदायिका॥ क्रींक्रींपातुगुदंदक्षिणेकालिकेह्रींह्रींस्वाहा॥ द्वादशीचमहाविद्याराघवेणार्चितापुरा॥ जानुनीपातुमेनित्यंसर्वेषां
सुखवर्धिनी॥१५॥ ॐक्रींदक्षिणेकालिकेह्रूंह्रींस्वाहाजंघेवतु॥ द्वादशीचमहाविद्याप्रह्लादेनोपसेविता॥१६॥ क्रींहूंह्रींदक्षिणेकालि
केक्रींहूंह्रींस्वाहावतु॥ चतुर्दशीपारस्तुग्मशुकदेवेनसेविता॥१७॥ क्रींहूंक्रींदक्षिणेकालिकेक्रींहूंह्रींनखांगुलीः॥ पातुमेद्वादशीकाली
क्षेत्रपालेनसेविता॥ ॐक्रींहूंह्रींदक्षिणेकालिकेक्रींहूंचंह्रींस्वाहा॥१८॥ नखंसत्वंसदापातुपंचदशीगृहेश्वरी॥ क्रींक्रींक्रींहूंहूंह्रीं
ह्रींक्रींक्रींक्रींहूंहूंह्रींह्रींस्वाहा॥१९॥ ममपृष्ठंसदापातुषोडशीभैरवेश्वरी॥ क्रींक्रींक्रींपातुरोमाणिहूंहूंरक्षतिचर्माणि॥२०॥ मांसंपा
तुसदाह्रींह्रींरक्तंदक्षिणकालिके॥ क्रींक्रींक्रींमेचित्तमस्थिमज्जाहूंहूंसदावतु॥२१॥ ह्रींह्रींशुक्रंसदापातुरंध्रंस्वाहाममावतु॥ द्वाविं
शत्यक्षरीविद्यासर्वलोकेषुदुर्लभा॥ महाविद्येश्वरीविद्यासर्वतंत्रेषुगोपिता॥ सूर्यवंशेनरामेणसौम्येनजामदग्निना॥२३॥ जयंतेन
सुमंतेनबलिनानारदेनच॥ विभीषणेनबाणेनभृगुणाकश्यपेनच॥२४॥ कपिलेनवसिष्ठेनधौम्येनत्रिपुरेणच॥ मार्कंडेयश्रवणेनैव
द्रोणेनसत्यभामया॥२५॥ ऋषिशृंगेणकर्णेनभारद्वाजेनजह्नुना॥ सर्वैराराधिताविद्याजरामृत्युविनाशिनी॥२६॥ इयंविद्यामहाका

ली विद्याराज्ञी प्रकीर्तिता ॥ काली कपालिनी कुल्लाकुरुकुल्ला विरोधिनी ॥ २७ ॥ विप्रचित्तातथोग्रोग्रप्रभादीप्ताघनत्विषा ॥ नीलाघनाबला
कामात्रामुद्रामिताचमं ॥ २८ ॥ एताः सर्वाः खड्गधरामुंडमालाविभूषणाः ॥ ईंकारादहृहासेनसर्वत्रपांतुमांसदा ॥ २९ ॥ ब्रह्माणीपातु
मांप्राच्येआग्नेय्यांवैष्णवीसदा ॥ माहेश्वरी पातुयाम्येचामुंडानैर्ऋतेसदा ॥ ३० ॥ कौमारी वारुणेपातुवायव्येचापराजिता ॥ वाराही चोत्तरेपा
तुऐशान्यांनारसिंहिका ॥ ३१ ॥ अधऊर्ध्वेपातुकाली पार्श्वेपृष्ठेचकालिका ॥ जलेस्थलेचपाताले शयनेभोजनेगृहे ॥ ३२ ॥ राजस्थानेनलेदु
र्गेविवादेमरणेरणे ॥ प्रांतरेपर्वतेशून्येपातुमांकालिकासदा ॥ ३३ ॥ शवासनेश्मशानेचशून्यागारेचतुष्पथे ॥ यत्रयत्रभयेप्राप्तेसर्वत्रपातु
कालिका ॥ ३४ ॥ नक्षत्रतिथिवारेचयोगकरणयोरपि ॥ मासेपक्षेवत्सरेचयामेदंडेनिमेषके ॥ ३५ ॥ दिवारात्रौशिवापातुसंध्ययोःपातुका
लिका ॥ सर्वत्रकालिकापातुकालिकापातुसर्वदा ॥ ३६ ॥ सकृद्यः शृणुयान्नित्यंकवचंशिवभाषितं ॥ सर्वपापपरित्यज्यगच्छेच्छिवसमालयं ॥
॥ ३७ ॥ त्रैलोक्यमोहनंदिव्यंकवचंदेवदुर्लभं ॥ यः पठेत्साधकः श्रेष्ठः सर्वकर्मजयान्वितः ॥ ३८ ॥ सर्वधर्मेभवेद्धर्मीसर्वविद्येश्वरीश्वरः ॥
कुबेरइवनित्याद्यः सुवाग्मीकोकिलस्वरः ॥ ३९ ॥ गणेशवच्छ्रुतिधरोनूपकामसमः सदा ॥ वायुतुल्यबलोयोगमहेशइवसर्वगः ॥ ४० ॥ ऐ
श्वर्यबलिभिः साक्षात्सांडिल्येवास्पतिर्यथा ॥ जरामृत्युविनिर्मुक्तः सर्वज्ञः सर्वदर्शकः ॥ ४१ ॥ अव्याहतगतिःशांतोभार्यापुत्रसमन्वितः ॥
यइदंकुरुतेनित्यंकवचंदेवदुर्लभं ॥ नशोकोनभयंतस्यनरोगोनपराजयः ॥ महार्णवेविवादेचवारिवाहभयंनहि ॥ ४३ ॥ संग्रामेषुजयेच्छत्रू
न्यथावह्निरिहेन्धनं ॥ ब्रह्मास्त्रादीनिशस्त्राणिपरस्तुः कंटकानिच ॥ ४४ ॥ तस्यदेहेनभिंदंतिवज्रतुल्यंभवेद्वपुः ॥ गृहभूतपिशाचाश्चयक्ष
राक्षसकिंनराः ॥ ४५ ॥ सर्वेहालाहलायंतेहिंसकानश्यतिध्रुवं ॥ तद्देहेनदहत्यग्निर्नतापयतिभास्करः ॥ ४६ ॥ नशोषयतिवातापिक्लेदंन ४६
कुरुतेपयः ॥ पुत्रवत्पालयतेकालोनहिमंकुरुतेशशी ॥ ४७ ॥ जलस्तेयेंदुवाताश्वरक्षंतिनात्रसंशयः ॥ बहुकिंकथयिष्यामिसर्वसिद्धिमुपा
लभेत् ॥ ४८ ॥ नानाभोगसुखंभुक्त्वासेच्छयाशिवतांव्रजेत् ॥ लिखित्वापूजयित्वाचधारयेदंगसंगतं ॥ ४९ ॥ मोहनस्तंभनार्थेचमारणोच्चा

रणाक्षमः ॥ काकवंध्याचयानारीवंध्यावामृतपुत्रिणी ॥ ५० ॥ कंठेवावामहस्तेवालिखिताधारयेद्यदि ॥ तदापुत्रोभवेत्तस्यांचिरायुःपंडितःशु
चिः ॥ ५१ ॥ स्वामिनोवल्लभासापिधनधान्यसुतान्विता ॥ इदंकवचमज्ञात्वायोजपेत्कालिकामनुं ॥ ५२ ॥ ध्यानेनकोटिजापेनतस्यविद्यानसि
ध्यति ॥ पदेपदेभवेद्दुःखंलोकानांनिंदितोध्रुवं ॥ ५३ ॥ इहलोकेमहद्दुःखीपरेचनरकंव्रजेत् ॥ गुरुमंत्रसमज्ञात्वायोजपेत्कवचोत्तमं ॥ ५४ ॥
तस्यविद्याभवेत्सिद्धिः सत्यंसत्यंवरानने ॥ यइदंकवचंदिव्यंप्रकाशाच्छिवहाभवेत् ॥ ५५ ॥ भक्तायज्येष्ठपुत्रायसाधकायप्रकाशयेत् ॥ ॥
इतिश्रीरुद्रयामलेदेवीश्वरसंवादेत्रैलोक्यमोहनंकालिकाकवचंसमाप्तं ॥ ६ ॥ ॥ कैलासशिखरेरम्येनानाचित्रविचित्रिते ॥ कालिकां
परिपप्रच्छभैरवोलोकनायकः ॥ १ ॥ श्रीभैरवउवाच ॥ कालिकायामहाविद्याकथिताभुविदुर्लभा ॥ तथापिहृदयेशल्यमस्तिदेविकृपांकुरु
॥ २ ॥ कवचंतुमहादेविकथयस्वानुकंपया ॥ यदिनोकथ्यतेमातर्विमुंचामिकलेवरं ॥ ३ ॥ श्रीदेव्युवाच ॥ शंकापिजायतेवत्सतवस्नेहात्प्रका
श्यते ॥ सर्वतंत्रेहिगोप्यंहिकालीकुलाप्रकाशितं ॥ ४ ॥ कवचंदिव्यथादेवशृणुष्वसर्वकामदं ॥ रहस्यतान्महादेवसुगोप्यंभुवनत्रये ॥ ५ ॥
कथयिष्यामिमंत्राणांसर्वसिद्धिकरंपरं ॥ नवक्तव्यंनद्रष्टव्यमितिगुह्यतरंमहत् ॥ ६ ॥ कालिकाजगतांमाताशोकदुःखविनाशिनी ॥ विशे
षतः कलियुगेमहापातकनाशिनी ॥ ७ ॥ ॐ कालिकाकवचस्यास्यमहाकालभैरवऋषिरनुष्टुप्छंदः श्रीदक्षिणाकालीदेवतासाधका
नांचतुर्वर्गसिध्यर्थमात्मरक्षायांजपेविनियोगः ॥ क्रीं कालीमेपुरतः पातुपृष्ठतश्चकपालिनी ॥ कुल्लामेदक्षिणेपातुकुरुकुल्लातथोत्त
रे ॥ ८ ॥ विरोधिनीशिरः पातुविप्रचित्ताचचक्षुषी ॥ उग्रामेनासिकांपातुकर्णौचोग्रप्रभामता ॥ ९ ॥ वदनंपातुमेदीप्तानीलाचचुबुकंसदा ॥
घनाग्रीवांसदापातुबलकाबाहुयुग्मकं ॥ १० ॥ मात्रापातुकरद्वंद्वंवक्षोमुद्रासदावतु ॥ मितापातुस्तनद्वंद्वंयोनिमंडलदेवता ॥ ११ ॥ ब्राह्मीमे
जठरंपातुनाभिंनारायणी तथा ॥ ऊरूमाहेश्वरी नित्यंचामुंडापातुलिंगकं ॥ १२ ॥ कौमारी चकटिंपातुतथैवजंघयुग्मकं ॥ अपराजिताचपादौ
मेवाराहीपातुचांगुलीः ॥ १३ ॥ संधिस्थानेनारसिंहीपत्रस्थादेवतावतु ॥ रक्षाहीनंतुयत्स्थानंतत्सर्वंदेवतावतु ॥ १४ ॥ रक्षाहीनंतुयत्स्थानं

श्या.र. पर्जितंकवचेनतु॥तत्सर्वंरक्षमेदेविकालिकेघोरदक्षिणे॥१५॥ऊर्ध्वमधस्तथादिक्षुपातुदेवीस्वयंपुनः॥हिंस्त्रेभ्यःसर्वदापातुसाधकंचजला
४७ दिकात्॥१६॥दक्षिणाकालिकादेवीव्यापकत्वेसदावतु॥इदंकवचमज्ञात्वायोजपेद्घोरदक्षिणां॥नपूजाफलमाप्नोतिविघ्नस्तस्यपदेपदे॥क
वचेनावृतोनित्यंयत्रयत्रैवगच्छति॥१८॥तत्रतत्रभवेत्सिद्धिर्नक्षोभोविद्यतेक्वचित्॥ ॥इत्युत्तरतंत्रेकालिकाकवचंसमाप्तं॥श्री॥ ॥
ॐकैलासशिखरासीनंदेवदेवंजगद्गुरुं॥प्रपच्छपार्वतीनाथंविनयानम्रकंधरं॥१॥श्रीदेव्युवाच॥देवदेवपरंब्रह्मसंसारार्णवतारक॥
केनसिद्धोभवेच्छ्रीघ्रंकालिकामंत्रउत्तमः॥२॥श्रीभैरवउवाच॥शृणुदेविप्रवक्ष्यामिकालीकवचमुत्तमं॥यस्यसंकीर्तनाच्छीघ्रंमंत्रसिद्धिः
प्रजायते॥३॥अपुत्रोलभतेपुत्रंदरिद्रोलभतेधनं॥ग्रहचोरनृपाणांचभयंनैवात्रविद्यते॥४॥शिरोदेशेगलेवापिकरेवामेचदक्षिणे॥धार
णात्सर्वसिद्धिःस्याद्गुंजेस्वर्णत्रिलोहके॥५॥पीतवस्त्रेस्थितंचेदंसर्वस्तंभनकारकं॥कृष्णवस्त्रप्रयुक्तंचेच्छत्रूणांमरणंध्रुवं॥६॥रक्तेस्थितंमहा
सौख्यंकरोतिवशगंजगत्॥प्रणम्यशिरसांकालींकवचंशृणुपार्वति॥७॥पूर्वेचाग्नेयायाम्यभागेनैर्ऋतेवारुणेतथा॥वायोधनददिग्भागेऐशा
न्यामधऊर्ध्वके॥८॥खड्गमुंडधरादेवीपायाद्दक्षिणकालिका॥अग्रतःपार्श्वयोःपृष्ठेरोमकूपेषुसर्वतः॥९॥वराभयधरादेविकालिका
पातुसर्वदा॥अधमोत्तममध्यानियानिचांगानिसंतिमे॥१०॥सर्वत्ररक्षमांदेविसर्वसिद्धिप्रदायिनी॥त्रिकोणेरक्षयेत्पूर्वेदक्षिणेचत्रिको
णकं॥११॥पश्चिमेराक्षिकोणंचत्रिकोणमुत्तरेवतु॥सर्वमध्येचयाशक्तिःसासर्वंरक्षयेत्सदा॥१२॥चक्रस्थमातरःपातुयोगिन्यःपांतु
सर्वदा॥सदाशिवःसदापातुशिवनूपीमहेश्वरः॥ब्रह्माद्यामातरःसर्वारक्षांकुर्वंतुसर्वदा॥जलेस्थलेमहावनेमहामोहेमहाभये॥१४॥
कालिकेयंसदापातुरक्षेज्ञानंकपालिनी॥सुखंकुल्लासदापातुकुरुकुल्लाचडुःखकं॥१५॥इच्छांविरोधिनीपातुविप्रचित्तामनःसदा॥
भार्यामुग्रासदापातुपुत्रमुग्रप्रभामता॥१६॥दीप्तामेभ्रातरंपातुनीलामेमातरंतथा॥राज्यस्थानंघनारक्षेद्बलाकाशत्रुतोवतु॥१७॥ ४७
मात्राधर्मंसदापातुमुद्राचाधर्मतस्तथा॥मितामित्रकुलंरक्षेत्खड्गमुंडविधारिणी॥१८॥चक्रमध्येस्थितादेवीमहाचक्रविनाशिनी॥

रक्षांकरोतुमेनित्यंयामूलाप्रकृतिःसदा॥१९॥अधःपंचारकंरक्षेद्दक्षिणस्थंतथापुनः॥वामस्थंपंचकोणंचसर्वात्रस्तुसर्वदा॥२०॥
कालीत्रयंशिरोरक्षेत्तथामायाद्वयंमुखं॥कूर्चद्वंद्वंचहृदयंजठरंदक्षिणेवतु॥२१॥कालिकेरक्षमेगुह्यंपादौकालीत्रयंतथा॥लज्जाद्वयं
सर्वगात्रेपार्श्वपृष्ठेचकूर्चकं॥२२॥स्वाहाग्रंपातुमांनित्यंरोमकूपेषुसंधिषु॥पृष्ठेभ्योरक्षमांकालिसर्वदुःखभयावहे॥२३॥भूतप्रेतपि
शाचेभ्योदक्षिणेरक्षसर्वदा॥राजचोरग्रहेभ्यश्चसर्वग्रहनिवारिणी॥२४॥स्मरणंतेसदाकालिपादयोर्भावनाच्चमे॥नश्यंतुसर्वविघ्ना
श्चशांतिर्भवतुनिश्चला॥२५॥इतितेकथितंदेविकालिकाकवचंशुभं॥नैतद्देयंमनुष्यायचाभक्तायनमत्सरे॥२६॥पठनान्मंत्रसिद्धिः
स्याद्धारणाच्चनसंशयः॥यस्यगेहेस्थितंचेदंचंदनेनविलेपितं॥२७॥कमलानिश्चलातत्रसदातिष्ठतिपार्वति॥यःशृणोतिनिराहारः
शुचिस्तत्कृतमानसः॥२८॥अष्टम्यांचचतुर्दश्यांतस्यसिद्धिःकरेस्थिता॥ ॥इतिश्रीकालिकुलामृतेकालीकवचंसमाप्तं॥ ॥
श्रीदेव्युवाच॥देवदेवमहादेवभक्तानांप्रीतिवर्धन॥कालिकायामहाविद्यानिर्दिष्टानप्रकाशिता॥१॥श्रीमहेशउवाच॥लक्षवारसह
स्राणिवारितासिमयापुनः॥स्त्रीस्वभावान्महादेविपुनस्त्वंपरिपृच्छसि॥२॥अत्यंतगोपितंगुह्यंकवचंसर्वकामदं॥तथापिकथयाम्य
द्यतवप्रीत्यावरानने॥३॥उक्तंपुरामहायोगिन्कथ्यतांचेत्कृपामयि॥कवचाज्ञानतोदेवविद्यासिद्धिर्नजायते॥४॥श्रीदेव्युवाच॥क
थ्यतांकवचंदेवयदिस्नेहोमयिप्रभो॥अन्यथाजगतांनाथप्राणांस्त्यक्ष्यामिनिश्चितं॥५॥श्रीमहादेवउवाच॥कवचंकथयिष्यामिसुगो
प्यमतिदुर्लभं॥गोपनीयंप्रयत्नेनस्वयोनिवद्वरानने॥६॥पूर्वस्यांपातुकालीचकपालीदक्षिणेवतु॥कुल्लारक्षतुपाश्चात्येकुरुकुल्ला
तथोत्तरे॥७॥विरोधिनीतथैशान्यांविप्रचित्ताग्निकोणके॥नैर्ऋत्येपातुमांचोग्रावोग्रप्रभातुवायवे॥८॥दीप्तारक्षतुशीर्षेमेनीलाव्या
तमुखमंडले॥घनारक्षतुकंठेचबलकाहृदयेवतु॥९॥नाभौमात्राजंघयोश्चमुद्रामिताधरेवतु॥ब्रह्माण्याद्यामहादेव्यःसर्वतःपांतु
सर्वदा॥१०॥श्लोकत्रयंमहागोप्यंयज्ञात्वामेसमाभवेत्॥तवस्नेहान्महादेविकथयामिसुदुर्लभं॥१२॥सर्पिःसागरविस्फुन्माणिम

यद्दीपिकदंबाचितेगेहेरत्नमयेशवस्यहृदयेरक्तामृतेसालने॥वर्गाद्यानलवामलोचनमयीश्रीदक्षिणांकालिकांसद्यःछिन्नशिरःकरांभग
वतींध्यायंतिपुण्याशयाः॥१२॥मद्याघूर्णितलोचनत्रयमहाशोभांमयीपोषितांलक्षैःसेवितपादपद्मयुगलांश्रीभैरवोद्योतितां॥श्रीमत्
कालमुखेमुखंप्रदधतींचांद्रींकलांबिभ्रतींतांध्यायंतिसुसिद्धसेभगवतींतद्भाविनानंदिताः॥मांसासृक्क्षीरखंडोछलितमधुमहापानमत्तां
हसंतींअट्टाट्टंकालिकालंकहहकहतमितिप्रोल्लसंतींसखीषु॥नृत्यद्भैरवकोटिकौतुकपरांगीतेचवाद्येप्रियांस्त्रीयेभ्योरस्तीवरांभगवतीं
श्रीकालिकांसंस्तुमः॥१५॥इदंतुदिव्यंकवचंमनोहरंकथंकदाचितुवरापिनैव॥मोहाद्भिया स्नेहवशानदत्वाहानिःशरीरेणचसाधक
स्य॥१५॥तस्मादिदंतुकवचंलभ्यतेबहुपुण्यतः॥तेनरत्नंतुसकलंसगुरुःपरमःप्रियः॥१६॥यस्मैकस्मैनदातव्यंप्राकृतेभ्योविशेषतः॥
प्रकाशेसिद्धिहानिःस्यात्तस्माद्यत्नेनगोपयेत्॥१७॥गुरुपादप्रसादेनयदिकालीप्रलभ्यते॥जह्वाकालीमहाविद्यामिदंतुकवचंपठेत्॥
अज्ञात्वाकवचंदेविकालिकांचेत्प्रजाप्यते॥सर्वनाप्नोतिफलंतस्याःपरेचनरकंव्रजेत्॥१९॥सर्वत्रसुलभाविद्याकवचंतुसुदुर्लभं॥श
रीरधनदाराभिर्युक्तंसंतोष्यतसत्पठेत्॥२०॥सफलारजनीप्रज्ञादिवापूजातुनिष्फला॥तस्मात्सर्वप्रयत्नेनरजन्यांकवचंपठेत्॥२१॥
विवादेचरणेद्यूतेविधायांकवचागमे॥राजगेहेविचारेचसर्वत्रैवंपठेन्नरः॥२२॥मोहनंस्तंभनाकर्षमारणोच्चाटनंतथा॥कवचोच्चार
णाद्देविजायंतेसर्वसिद्धयः॥२३॥अथवाकिंबहूक्तेनसत्यंसत्यंममप्रिये॥प्रत्यक्षादक्षिणाकालीवरंयच्छतिसुंदरा॥२४॥गुरोश्चकव
चेमंत्रेमंत्रेदेवीसदाभवेत्॥गुरुस्त्वाताम्हादेविकवचंयःप्रयच्छति॥२५॥ ॥इतिश्रीरुद्रयामलेकालीकल्पेकालिकाकव
चंसमाप्तं॥१०॥ ॥श्रीभैरव्युवाच॥कालीपूजाश्रुतानाथभावाश्चविविधाप्रभो॥इदानींश्रोतुमिच्छामिकवचंपूर्वसूचितं॥१॥त्व
मेवशरणंनाथत्राहिमांदुःखसंकटात्॥भैरवउवाच॥रहस्यंशृणुवक्ष्यामिभैरवीप्राणवल्लभे॥२॥त्रैलोक्यमंगलंनामकवचंमंत्रवि
ग्रहं॥पठित्वाधारयित्वाचत्रैलोक्यंमोहयेत्क्षणात्॥३॥नारायणोपियद्धृत्वानारीभूत्वामहेश्वरं॥योगेसंक्षोभमनयद्धृत्वारघूद्वहः॥ ४८

वरदृप्तान्जघानैवरावणादिनिशाचरान्॥यस्यप्रसादादीशोपित्रैलोक्यविजयीप्रभुः॥५॥धनाधिपःकुबेरोपिसुरेशोभूछचीपतिः॥एवं
हिसकलादेवाःसर्वसिद्धीश्वराःप्रिये॥६॥श्रीजगन्मंगलस्यास्यकवचस्यऋषिःशिवः॥छंदोनुष्टुप्देवताचकालिकादक्षिणेरिता॥
॥७॥जगतांमोहनेदुष्टविजयेभुक्तिमुक्तिषु॥योषिताकर्षणेचैवविनियोगःप्रकीर्तितः॥८॥शिरोमेकालिकापातुक्रींकारैकाक्षरीपरा॥क्रीं
क्रींक्रींमेललाटंचकालिकाखड्गधारिणी॥९॥हूंहूंपातुनेत्रयुग्मंह्रींह्रींपातुश्रुतीमम॥दक्षिणेकालिकेपातुघ्राणयुग्मंमहेश्वरी॥१०॥क्रीं
क्रींक्रींरसनांपातुहूंहूंपातुकपोलकं॥वदनंसकलंपातुह्रींह्रींस्वाहास्वरूपिणी॥११॥द्वाविंशत्यक्षरीस्कंधौमहाविद्याखिलप्रदा॥
खड्गमुंडधराकालीसर्वांगमभितोवतु॥१२॥क्रींहूंह्रींत्र्यक्षरीपातुचामुंडाहृदयंमम॥ऐंहूंॐऐंस्तनद्वंद्वंह्रींफट्स्वाहाककुत्स्थलं॥
॥१३॥अष्टाक्षरीमहाविद्याभुजौपातुसकर्तृका॥क्रींक्रींहूंहूंह्रींह्रींकरौपातुषडक्षरीमम॥१४॥क्रींनाभिंमध्यदेशंचदक्षिणेकालि
केवतु॥क्रींस्वाहापातुपृष्ठंचकालिकासादशाक्षरी॥१५॥ह्रींह्रींदक्षिणेकालिकेह्रूंह्रींपातुकटिद्वयं॥कालिकाद्वादशाक्षरीस्वाहामेचो
रुयुग्मकं॥१६॥ॐह्रींक्रींमेस्वाहापातुजानुनीकालिकासदा॥कालीहृदयविद्येयंचतुर्वर्गफलप्रदा॥१७॥क्रींहूंश्रींपातुमेगुल्फंद
क्षिणेकालिकेवतु॥क्रींहूंह्रींस्वाहासदापातुचतुर्दशाक्षरीमम॥१८॥खड्गमुंडधराकालीवरदाभयधारिणी॥विद्याभिःसकला
भिश्वसर्वांगमभितोवतु॥१९॥कालीकपालिनीकुल्लाकुरुकुल्लाविरोधिनी॥विप्रचित्तातथोग्रोग्रप्रभादीप्ताघनत्विषा॥२०॥नी
लाघनाबलाकाचमात्रामुद्रामिताचमां॥एताःसर्वाःखड्गधरामुंडमालाविभूषणा॥२१॥रक्षंतुमांदिग्विदिक्षुब्राह्मीनारायणीत
था॥माहेश्वरीचचामुंडाकौमारीचापराजिता॥२२॥वाराहीनारसिंहीचसर्वाश्चामितभूषिताः॥रक्षंतुस्वायुधैर्दिक्षुब्राह्मीनारा
यणीतथा॥२३॥इतितेकथितंदिव्यंकवचंपरमाद्भुतं॥श्रीजगन्मंगलंनाममहाविद्यौघविग्रहं॥२४॥त्रैलोक्याकर्षकंब्रह्मकवचम
न्मुखोदितं॥गुरुपूजांविधायाथविधिवत्पठतेनरः॥२५॥कवचंत्रिःसकृद्वापियावज्ज्ञानंचवापुनः॥एतच्छतार्धमावर्त्यत्रैलोक्यविज

थी भवेत॥२६॥त्रैलोक्यंक्षोभयत्येष कवचस्य प्रसादतः॥महासिद्धिर्भवेन्मासात्सर्वसिद्धीश्वरो भवेत॥२७॥पुष्पांजलिं कालिकायै मूलेनै
वपठेत्सकृत॥सतु वर्षसहस्राणां पूजायाः फलमाप्नुयात॥२८॥भूर्जे विलिखितंचैतत्स्वर्णस्थं धारयेद्यदि॥शिखायां दक्षिणे बाहौ कं
ठे वा धारयेद्बुधः॥२९॥त्रैलोक्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात॥पुत्रवान्धनवान्श्रीमान्नानाविद्यानिधिर्भवेत॥३०॥ब्रह्मास्त्रादी
नि शस्त्राणि तद्गात्रस्पर्शनात्ततः॥नाशमायांति या नारी वंध्या वा मृतपुत्रिणी॥३१॥कंठे वा वामहस्ते वा कवचस्यास्य धारणात॥बहु
पत्या जीववत्सा भवत्येव न संशयः॥३२॥न देयं परशिष्येभ्यो भक्तेभ्योपि विशेषतः॥शिष्येभ्यो भक्तियुक्तेभ्यश्चान्यथा मृत्युमाप्नुयात॥३४॥
इदं कवचमज्ञात्वा यो जपेत्कालिदक्षिणां॥शतलक्षंप्रजप्त्वापि तस्य विद्या न सिध्यति॥३५॥सशस्त्रघातमाप्नोति सोचिरान्मोहमाप्नुयात॥
इति श्री भैरवभैरवी संवादे कालिकल्पे श्री कालिका जगन्मंगलं कवचं समाप्तं॥ ॥११॥ॐ अस्य कवचस्य भैरव ऋषिरुष्णिक्
छंदः श्रीकालिका देवता कालीकवचपाठे विनियोगः॥ॐ कपालं पातु चामुंडा कर्णौ रक्षतु कौशिकी॥श्रुतीं पातु इष्टा दृष्टा नेत्रे रक्षतु कालि
का॥१॥लिंगं रदशं रक्तकंठं दशपत्रं हृदंबुजं॥पादौ रक्षतु लोलाक्षी सर्वदा हृदयांबुजं॥२॥इडां रक्षतु दंतोग्रा चंडोग्रा नाभिमंडलं॥सु
षुम्नां भोगदा पातु चित्रं चित्रस्वभावजा॥३॥आधारं पातु चामुंडा अपर्णा पातु पिंगलां॥इत्येतत्कवचं देवी पठनीयं सुरासुरैः॥४॥गंध
र्वै राक्षसैर्यक्षैः किंनरैर्मानवैरपि॥भोगदं कवचं देवी भुक्तिदं धनदं प्रिये॥५॥आयुरारोग्यदं देविकवचं शत्रुमर्दनं॥राजद्वारे लाभकरं भू
तप्रेत निवारणं॥६॥कवचं दुर्लभं देवि त्रैलोक्ये शुभावहं॥सर्वकामार्थसिद्धिः स्यान्नात्र कार्या विचारणा॥७॥ ॥इति कालीतंत्रे
कालीकवचं॥१२॥ ॥देवदेव महादेव श्रृणु ष्व वचनं मम॥देवेश कालिकवचं कथयस्व मम प्रिया॥१॥ईश्वर उवाच॥श्रृणु ष्व देव देव
वेशिकवचं सर्वकामदं॥जपपूजाविधानस्य फलदं सर्वसिद्धिदं॥२॥यस्य ध्येदेवदेव देवेशि कवचं सर्वकामिकं॥गोपितं त्रिषु लोकेषु स
र्वतंत्रेषु गोपितं॥३॥गोपितं सिद्धसंघेश्च भूतप्रेत पिशाचकैः॥यत्र यत्र न वक्तव्यं कवचं सर्वभावदं॥४॥शठाय भक्तिहीनाय निंदका

यमहेश्वरि॥प्राणान्तेपि न वक्तव्यं कालीकवचमुत्तमं॥५॥यंत्र पूजा जपफलं श्मशाने देवदास्यति॥शिष्याय भक्तियुक्ताय साधकाय
प्रदापयेत॥६॥आ स्तिकाय विशेषेण दातव्यं कवचं प्रिये॥धनं पुत्रो भवेद्बुद्धिर्धर्मायुरवाप्नुयात॥७॥भूतप्रेतपिशाचानां न भयं विद्यते
क्वचित॥वाय्वग्निवरुणादीनां स्तंभनं नात्र संशयः॥८॥ॐ कालीकवचस्य भैरव ऋषिरनुष्टुप्छंदो भगवती दक्षिणकालिका देवता॥ह्रीं बी
जं हूं शक्तिः क्रीं कीलकं मम अभीष्टार्थे जपे विनियोगः॥क्रीं पातु मस्तके देवि शिखायां क्रीं महेश्वरि॥भ्रूमध्ये क्रीं महेशानि पातु मां चक्षुषोर्द्व
योः॥१॥हूं पातु नासिकारंध्रे ह्रूं जिह्वायां महेश्वरी॥क्रीं पातु तालुमूले च ह्रूं पातु ब्रह्मरंध्रके॥दक्षिणाकालिका पातु हृदये सर्वसिद्धिदा॥
क्रीं पातु कर्णयुगुले क्रीं पातु चोष्ठयुग्मके॥११॥जिह्वामूले च क्रीं पातु हूं पातु वदने पुनः॥दंतपंक्तौ च ह्रूं पातु ह्रीं पातु पार्श्वयुग्मके॥१२॥
मूलाधारे महेशानि ह्रीं पातु मम सर्वदा॥सर्वांगं पातु देवेशि वाक्पत्नी समन्विता॥१३॥करालवदना पातु नाभौ मे सर्वसिद्धिदा॥उप
स्थं पातु देवेशि मुक्तकेशा सदा मम॥१४॥चतुर्भुजा सदा पातु गुह्यं मे सर्वशक्तितः॥मुंडमालाधरा पातु जंघायुग्मं महेश्वरि॥१५॥चामुं
डा पातु देवेशि जानुयुग्मं सदा मम॥सद्यश्छिन्नशिरोधरा पातु मां पादयुग्मकं॥सर्वांगुलीषु मायां तु वामोर्ध्वे खड्गधारिणी॥अभयं वर
दं पातु श्मशाने मां महेश्वरी॥१७॥महामेघप्रभा पातु अरण्ये सर्वसिद्धिदा॥श्यामा देवी सदा पातु संकटे शत्रुमध्यतः॥१८॥दिगंबरी
सदा पातु राजद्वारे महेश्वरी॥मुंडमालाधरा देवी रणे द्यूते महेश्वरी॥घोरदंष्ट्रा सदा पातु जलमध्ये महेश्वरी॥२०॥शवकुंडलधारा मां
प्रांतरे परमेश्वरी॥करालास्या सदा पातु वह्निमध्ये महेश्वरी॥२१॥पीनस्तनी सदा पातु योषितासंगयोगतः॥करकांचीधरा पातु भू
तप्रेताधिमध्यतः॥२२॥रक्तपाना सदा पातु प्रमत्तस्थानयोगतः॥घोररूपा महारौद्री पातु मां भोजने सदा॥२३॥श्मशानवासिनी पा
तु मृत्युस्थानात्सदा मम॥भवने पातु मां देवी काली सर्वसमृद्धिदा॥२४॥कपाली पातु मां देवी पुत्रादिषु समृद्धये॥कुला मां पातु देवेशि
शयने विघ्ननाशिनी॥२५॥कुरुकुल्ला सदा पातु शय्यायां मां महेश्वरी॥विरोधिनी सदा पातु शत्रूणां च विरोधिका॥२६॥विप्रचित्ता स

दापातुपर्वतेपर्वतात्मजा॥उग्रादेवी सदापातुवाग्व्ययेसर्वसिद्धिदा॥२७॥उग्रप्रभासदापातुक्षुधायांपार्वती सदा॥।निद्रायांपातुदेवे
शीदीप्तासर्वसमृद्धिदा॥२८॥नीलादेवी सदापातुममवृध्येमहेश्वरी॥लज्जामेपातुदेवेशीघनानामममहेश्वरी॥२९॥चोरव्याधिभयात्
पातुबलकाबलदायिनी॥मात्रादेवी सदापातुग्रहस्तेत्राधिकेषुच॥३०॥मुद्रादेवी सदापातुस्वर्गेमर्त्येमहेश्वरी॥मितादेवी सदापातु
ममसर्वार्थसिद्धये॥३१॥असितापातुदेवेशीममसर्वार्थरक्षिणी॥पाताललेपातुमांनित्यंब्रह्माणी ब्रह्मवादिनी॥३२॥महेश्वरी सदा
पातुपृथिव्यांपर्वतात्मजा॥कौमारी पातुमांदेवीनौकायांसंकटेषुच॥वैष्णवी पातुमांदेवी व्यवहारजयप्रदा॥वाराही जलमध्येचपा
तुमांसर्वकामदा॥३४॥संग्रामेपातुमांदेवी इंद्राणी विजयप्रदा॥चामुंडापातुमांदेवी परराष्ट्रमहेश्वरी॥३५॥दुर्गेमांपातुदेवेशि
लक्ष्मीः सर्वसमृद्धिदा॥योगिनी चक्रसहितापातुकाली सदामम॥३६॥कवचस्मरणादेविचतुर्वर्गफलंलभेत्॥कवचस्यास्य
महात्म्यमहं वर्षशतैरपि॥३७॥नशक्नोमिमहेशानिवक्तुमस्यफलंचयत्॥नपुत्राणांनपुत्रीणांनबंधूनांमहेश्वरि॥३८॥नश्यं
तिनाहितेशोकंराज्यप्रध्यापिभवंतिते॥श्रुत्वैभूत्वाश्रुत्वैवापिकवचंसर्वकामदं॥३९॥प्रपठन्वास्मरन्मर्त्यःशापानुग्रहणेक्षमः॥
अमंदानंदसंधूनामधिपोवाकूपातिर्भवेत्॥४०॥सर्ववागीश्वरोमर्त्यो लोकवंद्योधनेश्वरः॥रणद्यूतविवादेचजयस्तस्यभवे
द्ध्रुवं॥४१॥पुत्रपौत्रान्वितोमर्त्योलोकश्रेष्ठोमहाशयः॥शत्रवोदासतांयांतिसर्वेषांवल्लभोभवेत्॥४२॥गुर्वीखर्वीभवत्येववादी
स्खलतितत्क्षणात्॥मृत्युश्चवश्यतांयातिदासस्तस्यावनीपतिः॥४३॥प्रसंगात्कथितंदिव्यंकवचंसर्वकामदं॥गुरोःप्रसाद
मासाद्यविद्यांप्राप्यसुगोपितां॥४४॥तत्रापिकवचंदेविदुर्लभंभुवनत्रये॥गुरुर्देवोहरःसाक्षात्तत्पत्नीतुहरप्रिया॥४५॥अभे
देनयजेद्यस्तुतस्यसिद्धिरदूरतः॥मंत्राचारामहादेवी कथितापूर्वतः प्रिये॥४६॥नाभौज्योतिस्तथारक्तंहृदेपपरि चिंतयेत्॥ऐ
श्वर्यसकवित्वंचमहायोगीश्वरोभवेत्॥४७॥नित्यंतस्यमहेशानिमहिलासंगमंचरेत्॥पंचाचाररतोमर्त्यःसिद्धोभवतिनान्यथा॥ ५०

शक्तियुक्तोभवेन्मत्री सिद्धोभवतिनान्यथा॥लतायुक्तंभवेन्मंत्रीमंत्रयुक्तसमृद्धिदं॥४९॥मनसायोगयुक्तेनजपेन्मंत्रमनन्यधीः॥
ब्रह्माविष्णुश्चरुद्रश्चयेदेवाःसुरसत्तमाः॥५०॥तद्दृष्ट्वासाधकंदेविलज्जायुक्ताभवंतिते॥स्वर्गेमर्त्येचपातालेयेदेवाःसिद्धिदायकाः
॥५१॥प्रशंसंतिसदादेवी दृष्ट्वातंसाधकोत्तमं॥इतितेकथितंदेविमहाकालप्रवर्तितं॥५२॥मुक्तिदंमुक्तिदंसाक्षात्कल्पवृक्षस्वरू
पकं॥आसाद्यापिगुरुंप्रसाद्ययइदंकल्पद्रुमालंबनंमोहेनापिमदेनवाकुरधियाजाड्येनवामुह्यसि॥सिद्धोसौभुविसर्वदुःखविपदां
परंप्रयात्यंतकान्मित्रंतस्यनृपश्चदेविरिपवोनश्यंतितस्याशुभाः॥५४॥लिखित्वाधारयेद्यस्तुकंठेवामुकुटेभुजे॥तस्यसर्वार्थसिद्धिः
स्याद्यद्यन्मनसिवर्तते॥५५॥गोरोचनाकुंकुमेनरक्तचंदनकेनवा॥ताम्रपट्टेमहेशानिलिखेद्यस्तुविशेषतः॥५६॥अष्टम्यांमंग
लदिनेचतुर्दश्यामथापिवा॥कुजदिनेदेवदेवेशिलिखेद्यस्तुसमाहितः॥५७॥मघायांश्रवणायांवारेवत्यांवाविशेषतः॥सिंहरा
शौगतेचंद्रेकर्कस्थेवादिवाकरे॥५८॥मीनराशौगुरुगतेवृश्चिकस्थेशनैश्चरे॥लिखित्वाधारयेद्यस्तुउत्तराभिमुखोभवन्॥५९॥श्म
शानप्रांतरेवापिशून्यावासेविशेषतः॥निशायांवापठेद्यस्तुतस्यसिद्धिरदूरतः॥६०॥भूर्जपत्रेलिखेद्यस्तुगुरुणाचमहेश्वरि॥ध्या
नधारणयोगेनधारयेद्यस्तुभक्तितः॥६१॥अचिरात्तस्यसिद्धिःस्यान्नात्रकार्याविचारणा॥वादीमूकतिदूषकस्तवयतिक्ष्मावल्ल
भेदासतेगर्वीखर्वतिसर्वविज्जयतेवैश्वानरःशीलति॥आचार्याष्टकसिद्धिरूपमपरंसिद्धंचयत्सेवनात्तांवंदेभवभीतिभंजनकरीं
कालींगिरीशप्रियां॥६२॥ ॥इतिश्रीभूतडामरेश्रीमहाकालीभाषितंकालिकाकवचंसंपूर्णं॥१३॥ ॥तदुक्तंरु
द्रयामले॥ऋषिरुवाच॥दक्षिणाकालिकादेवीनामकथयशंकर॥कान्रूपासाविमाचारा कथंसेव्या किमात्मिका॥१॥एवंसंप्रा
र्थितोदेवःपुनःप्राहमुनीश्वरं॥शिवउवाच॥साधुसाधुमहाप्राज्ञसम्यक्कुलश्रेष्ठवानसि॥२॥अहंत्वांकथयाम्येतांपुत्रसावहितोभ
व॥सच्चिदानंदरूपायविद्याक्तिरितिगीयते॥३॥याक्षितावप्यसकलंविद्धितांदक्षिणामुने॥उत्तीर्यतंन्यतेसत्त्वि स्तस्यांचपरि

लीयते॥४॥तस्याः प्रसादमासाद्य ब्रह्मा सृष्टिकरो भवेत्॥ विष्णुस्तां पालयामास संजहार सदाशिवः॥५॥नानारूपधरा या सोप
स्थिता इति भूतले॥ पुरे यं स्मृतिमात्रेण सर्वसिद्धिप्रदा मता॥ पुरे यं पूजिता धात्रा साधका भीष्टसिद्धिदा॥ इति श्रुत्वा मुनिर्वाक्यं पुनराह
सदाशिवं॥७॥ महात्मि संशयो ह्यस्ति तन्त्वं छिंधि महेश्वर॥ इत्युक्तो भार्गवेनाथ जगाद गिरिजापतिः॥८॥ धूतक्रीडां मया सार्धं प्रकु
र्वाणां विहायसा॥ सा गता साधकस्यांते दत्वा तस्मै वरं ततः॥९॥ निवृत्ता सा मया शप्ता क्रोधेन मनसा मुने॥ यतो मां त्वं विहाय वै गत्वा
साधकसंनिधिं॥१०॥ ततस्त्वं शीघ्रफलदा न भविष्यसि दक्षिणे॥ ततो दीनमया देवी संतोषयत वै स्तवैः॥११॥ ततस्तुष्टो हि भगवान्
पुनरेनां समूचिवान्॥ महाविद्यासंपुटिता जप्ता या त्वं सुमध्यमे॥१२॥ ततस्त्वं शापनिर्मुक्ता भविष्यसि फलप्रदा॥ ततः प्रभृति विद्ये
यं फलदात्री विदुर्बुधाः॥१३॥ ॥इति शिववाक्यं शापमोचनं॥ ॥अथ सहस्राक्षरो मंत्रः॥ क्रीं ३ हूं २ ह्रीं २ दक्षिणकालिके
क्रीं ३ हूं २ ह्रीं २ स्वाहा शुचिजाये महापिशाचिनि दुष्टजनचितनिवारिणि क्रीं कामेश्वरि व्रीं वाराहिके ह्रीं महामाये खं खः क्रोधाधि
पश्री महालक्ष्म्यै सर्वहृदयरंजनि वाग्वादिनि विद्ये त्रिपुरे हस्त्रीं हसकलरीं हस्त्रैं ॐ ह्रीं क्लीं मे स्वाहा ॐ ह्रीं स्वाहा दक्षिणकालिके
क्रीं हूं ह्रीं स्वाहा खड्गमुंडधरे कुरुकुल्ले तारे ॐ ह्रीं नमो भयोन्मादिनि भयं मम हन २ पच २ मथ २ फ्रें विमोहिनि सर्वदुष्टान्विमोहय वि
मोहय यावीसिंहस्थे अश्वारूढे अश्वमुखि विद्राविणि द्रावय मम शत्रून्ये मां हिंसितुमुद्यतान् ग्रस २ महानीले बलाकिनी नीलपता
केक्रें कामे संक्षोभिणि उच्छिष्टचांडालिनि मातंगिनि सर्वजनवशंकरी नमः स्वाहा विस्फारिणि कपालधरे घोरनादिनि सुरशत्रुनिवा
शिनि उन्मादिनि ऐं ह्रीं श्रीं स्त्रौं सौः वद वद क्लीं ३ क्रीं ३ कति स्वाहा हि २ कालिके शंकरधातिनि कामेश्वरि कामिके ह्रीं श्रीं स्वाहा हृ ५१
दयाय क्रूये ॐ ह्रीं क्रीं मे स्वाहा ठः २ ह्रीं श्रीं हूं चामुंडे हृदयभवना भिमव असूनवयस दुष्टजनानसूनुरां खिनि क्षतचर्चित स्तनउन्न
स्तनि विष्टंभकारिणि विद्याधिपे श्मशानवासिनि कलय २ विकलय २ कालग्रासिके सिंहिके सिंहिके दक्षिणकालिके अनिरुद्धाये ब्रू

हि २ जगच्चित्रचमत्कारिणि हूं कारिके करालिके घोरके ह २ तडागे प्रोये गहने कानने शत्रुपक्षे समरे अरिमर्दिनि पाहि अंबिके तुभ्यं कलविक
लायै बलप्रमथनायै योगमार्गं नियच्छ २ निदर्शिके देहिनि दर्शिनि देहि मर्दिनि बलप्रमर्दिनि ह्रीं महिषमर्दिन्यै स्वाहा रिपुदर्शने दर्शय २ सिद्धि
पुरप्रवासिनि वीरवारिणि क्रीं २ हूं २ दक्षिणकालिके क्रीं ३ ह्रीं २ हूं २ फट् स्वाहा शक्तिरूपायै ऐं ऐं वाग्रूपिण्यै एं एं हौं ध्यामाहि श्रियं त्रिणिके
तनि महाकालिकायै प्रकटदशनायै लोलजिह्वायै मुंडमालिन्यै महाकालरसिकायै नमो नमः॥ अलं प्रभदिन्यै नमो नमः॥ शत्रुग्रहकलत्रपु
त्रभोगिन्यै विषज्वालामालिनि मंत्रकृत निमेघप्रभेरावावर्त सहंसिके कालिकपालिनि कुल्ले कुरुकुल्ले चैतन्यप्रभे प्रज्ञानसम्राज्ञि ज्ञानदे
ह्रीं सः ज्वालाप्रचंडचंडिके खरखोल्के मार्तंडभैरवि विप्रचित्ते उग्रे उग्रप्रभे दीप्तनीलेघनबलाकमात्रमुद्रे मितविरोधिनि आकर्षय २ पिशि
तपिशितप्रियै नमो नमः खः खः मर्दय २ शत्रून् ठः ३ कालिके नमो ब्रह्माण्यै नमो नारायण्यै नमो माहेश्वर्यै नमो नमश्चामुंडायै नमो नमः
कौमार्यै नमो नमस्त्वपराजितायै नमो नमो वाराहिकायै नमो नमो नारसिंहिकायै नमो नमः कालिके महाकालिके अनिरुद्धे अनिरुद्धे
सरस्वति फट् स्वाहा पातु मां ललाटं ललाटे अस्त्र कालि जीव वह वाचं रक्ष रक्ष परविद्यां क्षोभय क्षोभय आकर्षय २ त्रुरमहामायिके वि
वारसिद्धिके कृष्णारूपिणि अंजनसिद्धिके स्तंभिनि मोहिनि मोक्षमार्गं निदर्शय निदर्शय स्वाहा ह्रीं १००० अमुष्या अपि पूजा दिदक्षिणाव
दुदाहृतं॥ यामवाप्य महामाये अमरत्वमहं गतः॥ त्वयैव कथितं पूर्वं किं न स्मरसि भाविनि॥ अविनाभावमालंब्य तयोक्तं च महाकुलं।
न विना भाविना श्रूयात् गणपायि च पार्वती॥ ॥इति गौरीयामले कालीसहस्राक्षरी॥ ॥सिद्धकाली शिरः पातु ललाटं पा
तु दक्षिणा॥ काली मुखं सदा पातु कपाली पातु चक्षुषी॥१॥ कुल्ला गंडौ सदा पातु दशनौ कुरुकुल्लका॥ विरोधिन्यधरौ पातु चिबुकं विप्र
चित्तिका॥२॥ श्मशानवासिनी कर्णौ नासां पातु दिगंबरा॥ अट्टहासा पातु कंठं मे सौ पातु सुरेश्वरी॥३॥ घोररावा करौ पातु हृदयं पातु
कालिका॥ घोररूपा पातु पृष्ठं पार्श्वके मुंडमालिनी॥४॥ कर कांची पातु नाभिं लिंगं पातु रतिप्रिया॥ शिवप्रिया नितंबे द्वे उरू दंष्ट्राकराल

का॥महाकालप्रियाजानुविकरापातुजंघके॥श्मशानकालिकापातुसर्वांगंपरमेश्वरी॥९॥कामबीजत्रयंपातुनाभितः पादमेवच॥कूर्चबीजद्वयंपातु
कंठनेत्राभिमेवच॥शक्तिबीजद्वयंपातुब्रह्मरंध्रदलंपुनः॥तथासर्वाणिकर्माणिदक्षिणकालिकेपदं॥कामबीजत्रयंपातुपूर्वस्यांदिशिसर्वदा॥कू
र्चबीजद्वयंपातुदक्षिणास्यांतुसर्वदा॥९॥लज्जाबीजद्वयंसंबोधनयुग्मंतुपश्चिमे॥पूर्वबीजंवह्निजायाउत्तरस्यांचमांसदा॥१०॥विद्याराज्ञीतु
सर्वांगमनिरुद्धसरस्वती॥कालिकाकवचंदिव्यंयः पठेत्प्रयतः शुचिः॥११॥भूतप्रेतपिशाचाद्यायेपापाखंउअश्वराक्षसाः॥तस्यदूरात्पलायंतेसत्यंसत्यं
नसंशयः॥१२॥कृत्वातुकुलमार्गेणपूजांदेव्याअनुत्तमां॥यः पठेत्कवचंदिव्यंतस्यपुण्यंनगण्यते॥१३॥कुलमार्गबहिर्भूतः कालिकांपूजयेत्तुयः॥
नविद्याफलमाप्नोतिविपरीतंफलंलभेत्॥१४॥ ॥इतिश्रीकुलसारकालिकाकवचंसंपूर्णं॥ ॥देव्युवाच॥यः पठेत्प्रातरुत्थायमम
ध्यानपरानरः॥कवचंतुयथापूर्वंस्वयंवक्त्राद्विनिस्सृतं॥१॥तच्छृणुष्वजगत्स्वामिवदामिप्रियभावतः॥ॐ पूर्वमांदक्षिणेभागेपश्चिमेचोत्तरेतथा
॥२॥दक्षिणाकालिकापातुखड्गमुंडधरासदा॥आग्नेय्यांपातुनैर्ऋत्यांवायव्यांरुद्रगोचरे॥३॥सरस्वतीदेवतानांपात्वनिरुद्धपूर्विका॥ब्रह्मदृष्टी
सदापातुभैरवीऋषिसर्वदा॥४॥अधोदेशेपातुनित्यंशिवरूपोमहेश्वरः॥नेत्रयोः श्रोत्रयोश्चैवदंतोष्ठाधरदेशके॥५॥चंडिकाभैरवीदुर्गा
सीतापातुयथाक्रमं॥भ्रूमध्यकंठदेशेचहृदयेनाभिदेशके॥६॥लिंगमूलेतथामूर्ध्विकेशस्थानेतथापरे॥कालीकपालिनीकुल्लाकुरुकुल्ला
विरोधिनी॥७॥विप्रचित्ताप्रभुद्राचवारुण्याकर्षिणीक्रमात्॥पातुनित्यंसाधकांश्चसर्वशास्त्रार्थसंयुत॥८॥श्मशानभैरवीपातुविमला
नंदभैरवी॥एकांतेविजयापातुक्षामायायोनिमंडले॥९॥दिग्वस्त्रावस्त्रयंपातुशून्येपातुमहेश्वरी॥सभायांपातुचामुंडानिर्जनेकालिका
स्वयं॥क्षोभेचैकजयापातुविचारेखड्गधारिणी॥भुवनेशीसदापातुचक्रमध्येतथारणे॥११॥लक्ष्मीधनेसदापातुवाचांचवाक्प्रदासदा॥१२॥
रतिंरतिप्रियापातुप्रीतिंप्रीतिविवर्धिनी॥१२॥कीर्तिंकीर्तिप्रियापातुपुष्टिंपुष्टिविवर्धिनी॥तुष्टिंतुष्टिप्रियापातुशांतिंशांतिप्रदायिनी॥१३॥
एतास्तुवरयोगिन्यः कालिकासनसंस्थिताः॥कामत्रयंपातुपक्षेकूर्चयुग्मद्वयंतथा॥१४॥मायायुग्मंकरौपातुपादौचदक्षिणेतथा॥कालि

कापातुजानुनीक्रींत्रयंरोमकूपके॥१५॥सर्वांगंरक्षयेदक्षिकूर्चयुग्मंपुनः पुनः॥मायायुग्मंरोमदेशंपातुजंभारिनाशिनी॥१६॥वह्निप्रियासदा
पातुसाधकानांहिविग्रहं॥तत्सर्वंतारिणीरक्षेद्धर्मत्रिपुरसुंदरी॥१७॥भयाद्रक्षाकरंपुण्यंकवचंसर्वदापठेत्॥मंत्रसिद्धिकरंसाक्षान्महापातकनाश
नं॥एकवारंपठेद्यस्तुपूजायाश्चफलंलभेत्॥मोक्षार्थीलभतेमोक्षंधनार्थीधनमाप्नुयात्॥१९॥राज्यार्थीराज्यमाप्नोतिकवचश्रवणाच्छिव॥इदंक
वचराजंवैयदुक्तंस्नेहभावतः॥२०॥तथागुप्ततरंकार्यंप्रकाशोसिद्धिरोधकृत्॥ ॥इतिश्रीशांभवीसंहितायांमहाविद्याकालिकाकवचं
संपूर्णं॥ ॥श्रीपार्वत्युवाच॥भवदुःखमहोद्विग्नसंतप्तान्करुणार्णव॥१॥त्रांयाचेहमीशेकत्रातुमर्हसिवागुज्वलेः॥कथितंकालिका
देव्याः कवचंकामदंमहत्॥२॥रहस्यकवचंब्रूहिकस्मैचिन्नयदीरितं॥प्रयोगसंघेभवतासाधकोविमुखीकृतः॥३॥साधकानांतदिदानीमेप्र
त्यक्षीकरणंवद॥यस्माद्देवताप्रत्यक्षानतत्कर्मशतैरपि॥४॥वदत्वंतदुपायंमेयेनस्यादिष्टदर्शनं॥देवताभजनंसम्यग्येनजानातितत्वतः॥५॥
कृतोत्यर्थेसकिंकुर्यादुच्छ्वासंस्वतंप्रभो॥शिवउवाच॥कतिधानमयाप्रोक्तंकवचंकामदंशिवे॥६॥तथापिननिवृत्तिस्तेप्रश्नेगि मुवः किमु॥
श्रृण्विदानींमहादेविप्रभावकवचंजपं॥७॥ततस्नेहवशाद्भिमोखत्वमधुनात्यज॥अस्मोपेद्रमहेंद्राद्यैरुपास्त्यायास्तवादिषु॥८॥तत्तदेकां
स्तुतिंज्ञातुंतामक्षितेलोतिचात्रकः॥येनजानातिकवचंप्राणभृत्सिद्धिदायकं॥तस्याधिकारोनानादौकीर्तिश्चापूर्वलक्षयत्॥येनेदंकव
चंप्राप्तंकाल्याः शिवसुखप्रदं॥१०॥शतंमेशाश्वथाः संतुतस्यसिद्धिः करस्थिता॥कवचेनमहेशानितत्सिद्धिनाविघ्नभाग्भवेत्॥११॥कवचं
मंत्रयोर्मध्येकवचंमहदुत्तमं॥कवचात्साधयेत्सर्वंमृत्युः स्यात्कवचंविना॥१२॥गुह्याद्गुह्यतरंबाह्यमप्रकाश्यंप्रकाशितं॥सर्वविघ्नहरं
सर्वरक्षासिद्धिस्मृतिप्रदं॥१३॥रहस्यकवचस्यास्यऋषिर्देवोमहेश्वरः॥छंदोनुष्टुप्देवताचकालिकाभीष्टदायिनी॥१४॥ह्रींह्रूंफट्का
लिकेकालीकामाक्षाकामदायिनी॥रक्षमांहरविघ्नादीन्यच्छसिद्धिंनमोस्तुते॥१४॥अमुमुक्तंमहामंत्रंश्रीसौभाग्यप्रदायकं॥षड्दीर्घे
रादिबीजस्यषडंगंचारिमर्दनं॥१६॥अथध्यानं॥घोरांघोराट्टहासामुखवरसनयाजातमोहाभ्रमंतीसर्वासर्वादिसेव्यारुणमृदुवसना

कालकर्णाकरालं॥दोर्दंडैः शरचापचक्रपरिघासिंहस्थपद्मासनं दिक्पालार्षिजनाद्दतामसृग्वस्त्रेंदुचूडां भजे॥१७॥किशोरी पातु मां पूर्वे ऽ
ग्न्यां तु नंदनानले॥याम्यां कटंककोटिघ्नी नैरृत्यां कालभैरवी॥१८॥कीलालया प्रतीच्यां मे वायव्यां पातु कैशिका॥कलकंठी कुबेरं मे ईशान्ये
ईशानाशिनी॥१९॥कालखंड्रपापातुर्ध्वे कालाद्या पातु मामधः॥अग्रे कुशलदा पातु पृष्ठे मां कुलपंडिता॥२०॥दक्षिणे कुसुमास्त्रा मां वामे मां कुंत
धारिणी॥शिखां मे कमला पातु मूर्धनि मे कलावती॥२१॥भालं कमलिनी पातु नित्यं कामकला भ्रुवौ॥कंजाक्षी पातु मे नेत्रे कर्णौ कलवरप्रिया॥
॥२२॥कुलदेवी कपोलौ मे कर्णमूले कुलव्रता॥कल्याणी पातु मां सायमुत्तरोष्ठं कलंबदा॥२३॥कमनीयाधरं पातु जिह्वां यां कुंदविग्रहा॥दंता
न्मे पातु कौमारी नासिकां मे कुलेश्वरी॥२४॥कुलकांता तालुदेशे हनू कुमुदगंधिनी॥चूतशाखिचुबुकं पातु ग्रीवां कुंजरगामिनी॥२५॥ पृष्ठं पार्श्वं
कुलिशांगा मे कुक्षौ कात्यायनी मम।दोर्दंडौ कीरकलामे कौशिकी दोस्तलांगुलीः॥२६॥कुक्षौ कुशेश्वरी पातु स्तनौ कामविमोहिनी॥क
पातु हृदयं चेतः श्वासं मे कामरूपिणी॥२७॥कुंडोदर्युदरं पातु नाभिं कुंडलिनीश्वरी॥क्रियाकला पातु वस्तिं मे करिवक्त्रा कटिं सदा॥२८॥कु
रुकुल्ला नितंबौ मे गुह्यं कामेश्वरी मम॥जानुनी क्रूरकर्मा च जंघौ मे कंठभार्दिनी॥२९॥कपालभूषणा भूषणा गुल्फौ पादपृष्ठे करंकिणी॥पा
दांगुली मे कालज्ञा पादाधः कल्पितार्थदा॥३०॥पन्नखान्पातु कूष्मांडी लोमानि कुसुमायुधा॥कामिनी राम कृपाणि कवचं मे कपर्दिनी॥३१॥
कुजार्चिता त्वचं पातु किरीटं मे किरीटिनी॥कपिलां त्राणि मे पातु कालरात्रिर्मम क्रियां॥३२॥कलाममास्रसामांसादी पद्मकोशे कलापिनी॥
क्रमागत समाम्नाय पूज्यास त्वं रजस्तमः॥शब्दस्पर्शरसं रूपं गंधं पातु कुटुंबिनी॥धर्माधर्मक्रियांहृतिः कामदार्थगणान्मम॥३४॥कामा
क्षा कामवर्गान्मे सदा मोक्षं स्तुकेकरा॥पातु कल्यायुरायुर्मे प्राणादीन्कल्पवासिनी॥३५॥पथिक्षेमंकरी पातु कीर्तिं सदसि कौलिनी॥क्रूरार
ण्यजले क्रोडारण्ये कुंजविहारिणी॥३६॥दुर्गे कात्यायनी शैले गृध्रजा कुटिलानने॥कौलिभ्नी मसुतापत्नी कुंकुमश्रीः क्रियागृहान्॥३७॥श्रि
यं शांतिं क्षमां मेधां कीर्तिं वाचं स्मृतिं धृतिं॥पातु कल्पां गरागाद्या मनोहंकृतिमेव च॥३८॥कामयुग्मे पश्रून्पातु ज्ञानं मे कालभैरवी॥करुणा ५३

कल्पतां पातु कुलवागीश्वरं कुलं॥३९॥शैलेंद्रस्वर्णशृंगाग्रे केशरीस्था खिलार्थदा॥शयनासनपानादौ कालिका पातु मां सदा॥४०॥इत्येतत्
कवचं देव्या रहस्यं सर्वकामदं॥मंत्रसिद्धिकरं देवि देवतादर्शनप्रदं॥तुष्टिपुष्टिबलारोग्यमायुधा शांतिक्षांतिदं॥शौर्यधैर्ययशोविद्याश्रीसौभा
ग्यैककारणं॥४२॥भोगमोक्षप्रदं ज्ञानविज्ञानानंदमानदं॥महाचमत्कारकरं नानाद्भुतप्रवर्तकं॥४३॥पापरोगग्रहारातिमारीचौराग्निराजतः॥
रक्षोभूतपिशाचादिडाकिन्यादेर्न भीर्भवेत्॥४४॥एतां त्रिसंध्यमभ्यर्च्य विन्यस्य कवचं जपेत्॥एकांते सद्धिधौ स्वस्थे भोगान्प्राप्यामृतं व्रजेत्॥४५॥
गृही यतिर्वायः कोषा स्त्री वा भक्त्यार्चयेत्क्वचित्॥सर्वारिष्टान्विधूयाशु परत्रेह स सुखी भवेत्॥४६॥संग्रामे संकटे वादे सभायां चोत्सवादिषु॥
मातैवेच्छति कल्याणं कवचं न्यसते र्चिता॥४७॥विस्फूर्जत्कवचस्यास्य प्रभावं वीक्ष्य दारुणं॥इरंडुष्टाः पलायंते दावशंका विचेतसः॥४८॥
मंत्ररूपजगध्याना त्कवचन्यासयोगतः॥यंत्रे च बलिदानाद्यैः स्त्री शिवा स्याच्छिवः पुमान्॥४९॥दिवाशोचपरो मंत्री यदि नित्यं शुचिः सदा॥
यजेद्यथैहितः सम्यक् स स्यात्सर्वसुखैकभूः॥५०॥योषाभिगम्यसारीकाशतं जप्त्वा स्तवं पठेत्॥तेयास्तुष्टिवशाद्द्वितुष्टा स्याल्लां शिवो सदा॥
॥५१॥पास्त्रीयतः स्वयं शक्तिः पुरुषः स्वयमीश्वरः॥मिथः संबंधवशतः साधकः किं न साधयेत्॥५२॥स्त्रिका कुजे कुजास्यां पूर्णिमायां कुहू
कुजे॥शून्यास्थले शवे शैले वने शुचिगृहे थवा॥५३॥प्रदर्श्य योनिमुद्रां योनिपीठैः शक्तिमर्चयेत्॥सार्वभौमपदं प्राप्य याप्यंते सोप्यनाम
यं॥५४॥सुयशाः सुप्रिया सुश्रीः सर्वैर्याच्यः सुखाधिकः॥स्यात्पुनर्जन्मरहितो विन्यस्यार्च्य यो जपेत्॥५५॥सुगंधाक्षतैः पुष्पैः फलैर्द
ध्याज्यपायसैः॥मिष्टान्नैर्मधुमांसाद्यैर्लघुरुगुंबलिपूतैः॥५६॥भक्ष्यव्यंजनमुद्राद्यैः कृशरान्नैर्घृताप्लुतैः॥देवीमभ्यर्च्य विन्यस्य कवचं
स्याज्ज्ञमलस्रभुः॥५७॥वशीकरमोहनद्वेषस्तंभाकर्षोच्चाटकशादिकृत॥भवेत्प्रियेष्टसिद्धीशाश्वरंजी विसुरोपमः॥न्यासे संधारणे पाठे कव
चेकृवची कृत॥लभेत्सिद्धिं मुक्तं मंत्री वाणी लक्ष्मीविलासतां॥५९॥यद्देशे कवचं शोस्तितद्देशे नेतिभीः क्वचित्॥नजातं कष्टवियोगोस्तितस्य
वर्गाः करेस्थिताः॥६०॥सासिद्धिकामो भ्रष्टाय नालस्यस्य वदेत्क्वचित्॥भक्त्यार्चाजपहीनाय स्त्रीवेदगुरुद्रुहके॥६१॥दद्याद्देहतमनायप

Dr. BHAU DAJI

रस्त्रीपुरतायच॥ विशुद्धायकुलीनायनिःसंदेहत्द्दिद्दिषे॥ ६२॥ यद्गृहेवास्तिलिखितंभूर्जेकवचमद्भुतं॥ रोचनारक्तसिंदूरमृगंदकुंकुमंडकेन
॥ ६३॥ चोरदस्युग्रहारातिजलादिव्याधिवह्निभिः॥ नतस्यजायतेक्कापिस्वयंश्रीर्निसत्यपि॥ ६४॥ यत्फलंलभतेमर्त्योदेवसंध्यार्चनेनच॥
कालिकाकवचन्यासात्तत्फलंस्यादसंशयः॥ ६५॥ रहस्यकवचमंत्रोरहस्यकवचंस्तुतिः॥ रहस्यकवचंध्यानंदेव्यावानिसिसिद्धिभाक्॥ ६६॥
रहस्यकवचंनास्तिकिंकुतश्चिन्नरःसुधीः॥ जरामरणनिर्मुक्तःशापानुग्रहकृन्नत॥ ६७॥ ॥इतिश्रीकालिकारहस्येकालिकारहस्यक
वचंजगद्रक्षाकरंसमाप्तं॥ १६॥ ॥श्रीदेव्युवाच॥ भगवन्ब्रूहिकवचंभुक्तिमुक्तिफलप्रदं॥ त्रैलोक्यमोहनंनामकृपयामुजगद्गुरो॥ १॥
शिवउवाच॥ शृणुदेविवरारोहेकवचंपरमाद्भुतं॥ यद्धृत्वापठनाद्ब्रह्मासृष्टिकर्ताभवत्प्रभुः॥ २॥ कृष्णाद्वैदेत्यश्यामोदेवकीगर्भसंभवः॥ अस्य
मेकालिकांध्यात्वानितःकृष्णत्वमाप्नुयात॥ ३॥ कालिकांदक्षिणांध्यात्वाऋद्धिबुद्धिफलप्रदां॥ सर्वाःश्यामाभवंत्येताजनार्दनविग्रहाः
॥ ४॥ एवंदेवगणाःसर्वेसर्वैश्वर्यमवाप्नुयुः॥ शिष्यायशिवभक्तायसाधकायप्रकाशयेत॥ ५॥ यदद्यादन्यशिष्यायशठायपशुरूपिणे॥ पं
चत्वंजायतेतस्यवाथवावातुलोभवत्॥ कवचस्यास्यसुभगेऋषिरुद्रोमुनिःस्वयं॥ विराट्छंदोनिगदितंदेवीदक्षिणकालिका॥ ७॥ धर्मा
र्थकाममोक्षेषुविनियोगःप्रकीर्तितः॥ क्रीं३मेशिरःपातुभालंनेत्रयुगंतथा॥ ८॥ हूंहूंमेकर्णयुगुलंह्रीं२नासापुटद्वयं॥ दक्षिणेकालिकेपातु
सबीजंमुखमेवच॥ ९॥ भुजयुग्मंसदापातुक्रीं३अक्षरात्मिका॥ हूं२रक्षतुमेकंठंह्रीं२चिबुकमेवच॥ १०॥ स्वाहापातुब्रह्मरंध्रंद्वाविंशत्यक्ष
रोमनुः॥ क्रींहूंह्रींदक्षिणेपश्चात्कालिकापदमीरितं॥ क्रींहूंह्रींहृदयंपातुक्रींहूंह्रींपार्श्वमेवच॥ क्रींहूंक्रींनाभिकमलंक्रींहूंह्रींपृष्ठमेव
च॥ १२॥ द्विठांतमुदरंपातुऊरुयुग्मंत्र्यक्षरीयतः॥ दक्षिणेकालिकेयुक्तंस्वाहांतंचषडक्षरी॥ १३॥ ऊरूसत्याक्षरीपायात्स्वादोमेषोडशा
क्षरी॥ क्रींहूंह्रींदक्षिणेपश्चात्कालिकेपदमेवच॥ १४॥ ह्रींहूंक्रींहूंफडंतेचस्वाहेतिपरिकीर्तितं॥ तारःक्रींक्रींतथाह्रींह्रींहूंहूंचदक्षिणप
दं॥ १५॥ कालिकेचतथाहूंहूंह्रींह्रींक्रींक्रीं द्विठामनुः॥ एकविंशत्यक्षरीकालीसर्वांगंमेसदावतु॥ १६॥ प्राच्यांरक्षतुमेकालीतथाग्नेय्यां ५४

कपालिनी॥ कुल्लातुदक्षिणेरक्षेत्कुरुकुल्लातुनैर्ऋते॥ १७॥ विरोधिनीप्रतीच्यांतुवायव्येविप्रचित्तिका॥ उग्रारक्षेदुदीच्यांतुतथैशान्येप्रभायुता॥
॥ १८॥ दीप्तारक्षेत्तथाभगिनीजालेवोर्ध्वकेशके॥ घनामेपुरतःपातुबलाकापृष्ठदेशके॥ १९॥ मात्रातुदक्षिणेरक्षेद्वामेमुद्रासदेवतु॥ पुत्रमित्रक
लत्रादीन्मितारक्षतुसर्वदा॥ २०॥ इतितेकथितंदेविसर्वमंत्रौघविग्रहं॥ त्रैलोक्यमोहनंनामकेवचंब्रह्मरूपिणं॥ २१॥ ब्रह्मेशप्रमुखाधीशानारा
यणमुखच्युतं॥ कवचंकालिकापातुयःपठेत्प्रयतोनरः॥ २२॥ ससर्वसिद्धिमाप्नोतिसत्यमेवनसंशयः॥ गानेनतुंबरुःसाक्षाद्दानेनवासवोयथा॥
॥ २३॥ दत्तात्रेयसमोज्ञानेगंगेवमलनाशकः॥ कामदेवसमस्त्रीणांगंधर्वएवरूपवान्॥ २४॥ शत्रुनाशेयमःसाक्षाद्धनेर्धनपतिर्यथा॥ सभवेत्साध
कश्रेष्ठःसत्यंसत्यंमयोदितं॥ २५॥ नहन्यतेगतिस्तस्यवायोरिवनभस्थले॥ शतमष्टोत्तरंवास्यपुरश्चर्याविधिस्मृतः॥ २६॥ हवनादिदशांशेनकृत्वात
त्साधयेध्रुवं॥ यदिचेत्सिद्धकवचःशिवतुल्योभवेत्स्वयं॥ २७॥ पठनाद्धारणात्सर्वापृथ्वीकाशीपुरीसमा॥ यत्रयत्रविपन्नोपिवाराणस्यांमृतोभवे
त॥ नमंत्रोनौषधंतस्यनाकालमरणंतथा॥ भवत्येवमहेशानिकवचेहृदिसंस्थिते॥ २९॥ अश्वमेधसहस्राणिवाजपेयशतानिच॥ महादानानि
यान्येवप्रादक्षिण्यंभुवस्तथा॥ कलांनार्हतितान्येवसकृदुच्चारणादतः॥ पुष्पांजल्यष्टकंदत्वामूलेनैवंपठेद्यदि॥ ३१॥ शतवर्षसहस्राणांपूजायाःफ
लमाप्नुयात॥ भूर्जेविलिख्यविधिवद्गंधचंदनकुंकुमैः॥ ३२॥ शतमष्टोत्तरंजप्त्वास्वर्णस्थंधारयेद्यदि॥ कंठेवादक्षिणेबाहौविद्यासिद्धिर्भविष्य
ते॥ ३३॥ इदंकवचमज्ञात्वायोजपेत्कालिकांशिवां॥ कोटिसंख्याप्रजप्तोपिनमंत्रःसिद्धिदायकः॥ ३४॥ ॥इतिश्रीरुद्रयामलेकालिका
त्रैलोक्यमोहनंनामकवचंसमाप्तं॥ १७॥ ॥देव्युवाच॥ देवदेवजगन्नाथभक्तानुग्रहकारक॥ सर्वापद्भ्यःसमाप्नोतिपरित्राणंकथंनरः॥ १॥
ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यातरंपरं॥ आपदुद्धारणंनामकवचंपरमाद्भुतं॥ २॥ शतमष्टोत्तरंचैवजप्त्वाध्यात्वाचकालिकां॥ इंद्र
जिद्बंधनान्मुक्तःपुरादेविशचीपतिः॥ ३॥ भैरवोस्यऋषिश्छंदोगायत्रीदेवताप्रभुः॥ कालिकाविनियोगस्यसर्वापद्विनिवारणे॥ ४॥ शिरोमेका
लिकापातुक्रींमायाद्यैःयुतानतिः॥ ललाटंचंडिकापातुकंठंपातुपरांबिका॥ ५॥ चामुंडाहृदयंपातुनाभिंमंगलचंडिका॥ जयचंडिकाशिरःपा

रस्त्रीपुरतायच॥ विशुद्धायकुलीनायनिःसंदेहहृदिद्विषे॥६२॥ यद्गृहे चास्ति लिखितं भूर्जे कवचमद्भुतं॥ रोचनारक्तसिंदूरमृगेंद्रकुंकुमद्रवैः
॥६३॥ चोरदस्युग्रहारातिजलादिव्याधिवह्निभिः॥ नतस्यजायतेक्वापिस्वयं श्रीर्निवसत्यपि॥६४॥ यत्फलंलभतेमर्त्योदेवसंधार्चनेनच॥
कालिकाकवचन्यासात्तत्फलस्यादसंशयः॥६५॥ रहस्यकवचमंत्रो रहस्यकवचंस्तुतिः॥ रहस्यकवचंध्यानंदेव्यावर्त्तिससिद्धिभाक्॥६६॥
रहस्यकवचंनास्तिकिंकुतश्चिन्नरःसुधीः॥ जरामरणनिर्मुक्तःशापानुग्रहकृद्भवेत॥६७॥ ॥इति श्री कालिकारहस्ये कालिकारहस्यक
वचंजगद्रक्षाकरंसमाप्तं॥१६॥ ॥श्रीदेव्युवाच॥ भगवन्ब्रूहिकवचंभुक्तिमुक्तिफलप्रदं॥ त्रैलोक्यमोहनंनामकृपयामेजगद्गुरो॥१॥
शिवउवाच॥ शृणुदेविवरारोहेकवचंपरमाद्भुतं॥ यद्धृत्वापठनाद्ब्रह्मासृष्टिकर्त्ताभवत्प्रभुः॥२॥ कृष्णाद्दिवादलश्यामोदेवकीगर्भसंभवः॥ हृत्य
स्यकालिकांध्यात्वानतःकृष्णत्वमाप्नुयात॥३॥ कालिकांदक्षिणांध्यात्वाऋद्धिबुद्धिफलप्रदां॥ सर्वाःश्यामाभवंत्यत्ताजनार्दनविभूतयः
॥४॥ एवंदेवगणाःसर्वेसर्वैश्वर्यमवाप्नुयुः॥ शिष्यायशिवभक्तायसाधकायप्रकाशयेत॥५॥ येदद्यादन्यशिष्यायशठायपशुरूपिणे॥ पं
चत्वंजायतेतस्यचाथवावातुलोभवेत॥ कवचस्यास्यसुभगेऋषिरुद्रोमुनिःस्वयं॥ विराट् छंदोनिगदितंदेवीदक्षिणकालिका॥७॥ धर्मा
र्थकाममोक्षेषुविनियोगःप्रकीर्तितः॥ क्रीं ३ मेशिरःपातुभालंनेत्रयुगंतथा॥८॥ हूं हूं मेकर्णयुगुलं ह्रीं २ नासापुटद्वयं॥ दक्षिणेकालिकेपातु
सबीजंमुखमेवच॥९॥ भुजयुग्मंसदापातुक्रीं ३ अक्षरात्मिका॥ हूं २ रक्षतुमेकंठं ह्रीं २ चिबुकमेवच॥१०॥ स्वाहापातुब्रह्मरंध्रंद्वाविंशत्यक्ष
रोमनुः॥ क्रीं हूं ह्रीं दक्षिणेपश्चात्कालिकापदमीरितं॥ क्रीं हूं ह्रीं हृदयंपातुक्रीं हूं ह्रीं पार्श्वमेवच॥ ह्रीं हूं क्रीं नाभिकमलंक्रीं ह्रीं हूं पृष्ठमेव
च॥१२॥ द्विठांतमुदरंपातुउदुयुग्मंत्र्यक्षरीयतः॥ दक्षिणेकालिकेयुग्मंस्वाहांतंचषडक्षरी॥१३॥ ऊरूसप्ताक्षरीपायात्सादामेषोडशा
क्षरी॥ क्रीं हूं ह्रीं दक्षिणेपश्चात्कालिकेपदमेवच॥१४॥ ह्रीं हूं क्रीं हूं फडंतेचस्वाहेतिपरिकीर्तितं॥ तारःक्रौं क्रीं तथाह्रीं ह्रीं हूं हूं चदक्षिणप ५४
दं॥१५॥ कालिकेचतथाहूं हूं ह्रीं ह्रीं क्रीं क्रीं क्रीं द्विठामनुः॥ एकविंशत्यक्षरीकालीसर्वांगंमेसदावतु॥१६॥ प्राच्यांरक्षतुमेकालीतथाग्नेय्यां

कपालिनी॥ कुल्लातुदक्षिणेरक्षेत्कुरुकुल्लातुनैर्ऋते॥१७॥ विरोधिनीप्रतीच्यांतुवायव्येविप्रचित्तिका॥ उग्रारक्षेदुदीच्यांतुतथैशान्यांप्रभायुता॥
॥१८॥ दीप्तारक्षत्वधोभागेनीलावैचोर्ध्वकेशके॥ घनामेपुरतःपातुबलाकापृष्ठदेशके॥१९॥ मात्रातुदक्षिणेरक्षेद्वामेमुद्रासदेवतु॥ पुत्रमित्रक
लत्रादीन्मितारक्षतुसर्वदा॥२०॥ इतितेकथितंदेविसर्वमंत्रौघविग्रहं॥ त्रैलोक्यमोहनंनामकवचंब्रह्मरूपिणं॥२१॥ ब्रह्मेशप्रमुखाधीशनारा
यणमुखच्युतं॥ कवचंकालिकापातुयःपठेत्प्रयतोनरः॥२२॥ ससर्वसिद्धिमाप्नोतिसत्यमेवनसंशयः॥ गानेनतुंबरुःसाक्षाद्दानेनवासवोयथा॥
॥२३॥ दत्तात्रेयसमोज्ञानेगंगेवमलनाशकः॥ कामदेवसमस्त्रीणांगंधर्वएवरूपवान्॥२४॥ शत्रुनाशेयमःसाक्षाद्धनेर्धनपतिर्यथा॥ सभवेत्साध
कश्रेष्ठःसत्यंसत्यंमयोदितं॥२५॥ नहन्यतेगतिस्तस्यवायोरिवनभस्थले॥ शतमष्टोत्तरंचास्यपुरश्चर्याविधिस्मृतः॥२६॥ हवनादिदशांशेनकृत्वात
त्साधयेध्रुवं॥ यदिचेत्सिद्धकवचःशिवतुल्योभवेत्स्वयं॥२७॥ पठनाद्धारणात्सर्वापृथ्वीकाशीपुरीसमा॥ यत्रयत्रविपन्नोपिवाराणस्यांमृतोभवे
त॥ नमंत्रौनौषधंतस्यनाकालमरणंतथा॥ भवत्येवमहेशानिकवचेहृदिसंस्थिते॥२९॥ अश्वमेधसहस्राणिवाजपेयशतानिच॥ महादानानि
यान्येवप्रादक्षिण्यंभुवस्तथा॥ कलांनार्हंतितान्येवसकृदुच्चारणादतः॥ पुष्पांजल्यष्टकंदत्वामूलेनैनंपठेद्यदि॥३१॥ शतवर्षसहस्राणांपूजायाःफ
लमाप्नुयात॥ भूर्जेविलिख्यविधिवद्गंधचंदनकुंकुमैः॥३२॥ शतमष्टोत्तरंजप्त्वास्वर्णस्थंधारयेद्यदि॥ कंठेवादक्षिणेबाहौविद्यासिद्धिर्भवेध्रु
वं॥३३॥ इदंकवचमज्ञात्वायोजपेत्कालिकांशिवां॥ कोटिसंख्याप्रजप्त्वापिनमंत्रःसिद्धिदायकः॥३४॥ ॥इतिश्रीरुद्रयामलेकालिका
त्रैलोक्यमोहनंनामकवचंसमाप्तं॥१७॥ ॥देव्युवाच॥ देवदेवजगन्नाथभक्तानुग्रहकारक॥ सर्वोपद्रवःसमाप्नोतिपरित्राणंकथंनरः॥१॥
ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यात्तरंपरं॥ आपदुद्धारणंनामकवचंपरमाद्भुतं॥२॥ शतमष्टोत्तरंचेवजप्त्वाध्यात्वाचकालिकां॥ इंद्र
जिद्बंधनान्मुक्तःपुराद्देविशचीपतिः॥३॥ भैरवोस्यऋषिश्छंदोगायत्रीदेवताप्रभुः॥ कालिकाविनियोगस्यसर्वापद्विनिवारणे॥४॥ शिरोमेका
लिकापातुक्रींभाद्याडेयुतानतिः॥ ललाटंचंडिकापातुकंठंपातुपरांबिका॥५॥ चामुंडाहृदयंपातुनाभिंमंगलचंडिका॥ जयचंडिकाशिरःपा

तुप्रचंडापातुपद्युगं॥६॥भैरवी त्वरिता दुर्गा चामुंडा चंडनायिका॥जयदुर्गा विशालाक्षी भद्रकाली कपालिनी॥७॥शिवदूती तिताः पातु दशा दिक्षु च
मां सदा॥ताराकाली शिवा स्वाहा जयंती मंगला स्वधा॥८॥योगिनी योगनिद्रा च छिन्नमस्ता च डाकिनी॥राजद्वारे जले वन्ये संयुगे संकटे ग्रहे॥९॥रा
शः खड्गनिपाते च कारागारादिभीषणे॥इतिसर्वत्ररक्षंतु सदा मां परमायुधैः॥१०॥इतिचकवचं देवी कथितं ब्रह्मरूपिणं॥आपदुद्धारणं नाम सर्वाप
द्विनिवारणं॥११॥अस्यापि धारणाद्देवि सर्वापन्नाशये क्षणात्॥देव्यै पुष्पांजलिं दत्वा कवचं सर्वकामदं॥१३॥सर्वापन्नाशयेत्सत्यं तत्क्षणान्नात्र
संशयः॥त्रिवारं पठनात्सत्यं नाशयित्वा खिलापदां॥१२॥सर्वैश्रियतमो भूत्वा सर्वैश्वर्यमवाप्नुयात्॥अहं पंजरमध्यस्थो गलपर्दं धनेर्हदं॥१४॥दे
वीं हृदि समाराध्य पठित्वाष्टाधिकं शतं॥खड्गादिभिरवध्यः स्याद्बंधनान्मुच्यते ध्रुवं॥१६॥गुरुवक्रो त्समो साद्य लक्षंयः प्रपठेच्छुचिः॥परितु
ष्टा तदा काली तस्य प्रत्यक्षतां व्रजेत॥१६॥ ॥इतिश्रीरुद्रयामले आपदुद्धारणं कालिकाकवचं समाप्तं॥१८॥ ॥श्रीदेव्युवाच॥
देवीयाकथमीशान प्रादुरासीज्जगत्सते॥तन्मे ब्रूहि महादेव यदि स्नेहोस्ति मां प्रति॥१॥कैलासपर्वतासीनं भगवंतं जगद्गुरुं॥पप्रच्छ सादरं गौ
री विनयावनताखिता॥२॥कामाराध्य महादेव भगवंजपमालिकां॥कीदृशी देवदेवेश यदि स्नेहः प्रवर्तते॥३॥ईश्वर उवाच॥लक्षवारसहस्रा
णि पृष्टा पृच्छसि पार्वती॥यच्छ्रुत्वा च महेशानि प्रसादस्तेभविष्यति॥४॥श्रुत्वा तं च महेशानि पार्वती प्रियवत्सला॥आलिंग्य सर्वभावेन पुन
राह च शंकरं॥५॥आर्धांगवासिनी देवी कथं वरसि शंकर॥यदि स्नेहोनुबंधस्यात्वदातन्मे प्रकाशय॥६॥मममाता जगद्धात्री तामोगुणस
मन्विता॥सत्वं यो विष्णुरेवस्याद्ब्रह्मो गुणसमुद्भवः॥७॥पितामहश्च संजातस्तस्मान्मे जननी परा॥त्वां संचिंत्य देवेशि सृष्टिं हर्तुं त्वहं प्रभुं॥८॥
यस्यास्तु जपमालेयं शृणुष्व परमेश्वरि॥तस्यास्तु कवचं देवि पठमानस्तु नित्यशः॥ममसंजायते बुद्धिः शृणु यानो वरानने॥कवचस्य प्रभावेन
मम जाता यशस्विनी॥१०॥मालेयं ली यत्तेदे हर्तुष्टा कवचपाठतः॥ममगर्भप्रसूतासाम ममाता प्रियंवदे॥११॥अप्रिय षष्ठा महामाया आदौ
माता भवप्रिय॥आदौ माता तथा गुप्ता रजो बिंदु विधीयते॥१२॥तुष्टा तु शालिका देवी माता मातृत्वमागता॥इति ब्रुवति भूतेशो पुनः प्राह प्रि

यंवदा॥१३॥देव्युवाच॥किंचिद्भ्रासा महादेवी कि रूपा भक्तवत्सला॥तत्वं ब्रूहि दयागार तदा जीवामि शंकर॥१४॥पार्वत्या गदिते शं
भुः पुत्रप्राह प्रियंवदा॥त्वमेव सर्वभूतानां जननी सर्वमोहिनी॥१५॥सत्वं रजस्तमो मायात्वमासा धुत्रिणी॥ब्रह्म विष्णु शिव स्वाच
ब्रह्मरूपिणी परा॥१६॥ईशाने ब्रुवति प्राह आकाशे डुंडुभिः स्वयं॥कवचं मृणु मातृणां भूते गगनभारती॥१७॥अस्य श्रीकालीक
वचस्य भैरव ऋषिरनुष्टुप्छंदः श्रीदक्षिणाकालिका देवता कवचपाठे विनियोगः॥कपाले पातु चामुंडा करो रक्षतु कौशिकी॥श्रुती
पातु रथानूपनेत्रे रक्षतु कालिका॥१८॥लिंगदेशं रक्तकंठा दशापत्रं सुमंगला॥घ्राणं रक्षतु कौमारी दंतान् रक्षतु चर्चिका॥१९॥ओ
ष्ठाधरौ पातु नित्यं पार्वती चिबुकं परा॥ग्रीवां रक्षतु भेरुंडा दक्षिणां संहरिप्रिया॥२०॥गुह्यं रक्षतु रक्तांगी लिंगं रक्षतु भीषणा॥पादौ र
क्षतु लोलाक्षी मंगला हृदयांबुजे॥२१॥दंतान् रक्षतु दंतुरा च पिंगला शंभुवल्लभा॥सुषुम्नां सुभगा पातु चित्रां चित्रस्वभावजा॥आ
धारं पातु मे चंडी चंडो ग्रानाभिमंडले॥हृदंबुजं पद्ममुखी कंठं रक्षतु चंडिका॥२३॥ललाटं ललना पातु राजधानी च मंगला॥अलंबुषा
पद्मनेत्रा बाहुं रक्षतु मातृका॥कर्षिणी पात्वपर्णा च हस्तिजिह्वां वरात्मिका॥यशस्विनी यशोदा मे पूर्णा रक्षतु वर्गदा॥२५॥इत्येवं कव
चं देवी पठनीयं सुरासुरैः॥गंधर्वैर्यक्षनागैश्च किंनरैर्मानवैरपि॥भोगदं कवचं देवी मुक्तिदं धनदं प्रिये॥आयुरारोग्यदं देवि कवचं श
त्रुमर्दनं॥२७॥राजद्वारे भयहरं भूतप्रेतनिवारणं॥कवचं दुर्लभं देवि त्रिषु लोके सुखावहं॥२८॥त्रिसंध्यं पठनाद्देवि वांछितं फलमा
प्नुयात्॥कुष्टरोगात्प्रमुच्येत विषमज्वरदारुतः॥२९॥महोत्पातभयात्त्राणं कवचं गिरिजे प्रिये॥शतमावर्तनाद्देवि बंधनान्मुच्यते नरः
॥३०॥सहस्रपठनाद्देवि महाशत्रुनिवारणं॥नवरात्रं जिताहारे विष्णुगेहे च भक्तितः॥तदा स्वयं महाकाली पश्यति प्रेमवांछिता॥भूमि
शय्या कुशनैव पठेच्च त्रितयं यदि॥तदा रात्रौ महाकाली वरदा दक्षिणा परा॥हविष्याशी जिताहारो यदि स्याद्भक्तिभावतः॥३३॥पठे
च्छिवगृहे वापि कवचं संमुखाच्युतं॥तस्य सर्वार्थसिद्धिः स्यान्नात्र कार्या विचारणा॥३४॥इति पार्वती शिवसंवादे कालिका कवचं समाप्तं।

श्या॰र॰ ५६

॥१९॥ देव्युवाच॥ देवदेव महाबाहो भक्तानां सुखवर्धन॥ केन सिद्धिं ददात्याशु काली त्रैलोक्यमोहिनी॥१॥ तन्मे वद दयापार साधकाभी
ष्टसिद्धये॥ कृपांकुरु जगन्नाथ वद देववरावर॥२॥ भैरव उवाच॥ गोपनीयं प्रयत्नेन तत्त्वात्तत्त्वं परात्परं॥ द्रुतसिद्धिकरं सत्यं किं महाकथया
म्यहं॥३॥ महाकालमहं वंदे सर्वसिद्धिप्रदायकं॥ देवदानवगंधर्वकिंन्नरैः परिसेवितं॥४॥ कवचं तस्य देवस्य पठनाद्धारदक्षिणा॥ सत्यं
भवति सा न्निध्यं कवचं स्तव र्नांतरात्॥५॥ सिद्धिं ददाति सा तुष्टा श्रुत्वा कवचमुत्तमं॥ साम्राज्यत्वं प्रियं दत्वा पुत्रवत्परिपालयेत्॥६॥ कव
चस्य ऋषिर्देवि काालिकादक्षिणा तथा॥ विराट्छंदः सुविज्ञेयं महाकाल सुदेवता॥७॥ कालिका साधनं चैव विनियोगः प्रकीर्तितः॥ प्र
णवं पूर्वमुच्चार्य महाकालाय तत्फलं॥८॥ नमः पातु महामंत्रः सर्वशास्त्रार्थपारदः॥ अष्टाक्षरो महामंत्रः सर्वाशापरिपूरकः॥९॥
सर्वपापक्षयं यातिग्रहणाद्भक्तवत्सले॥ कूर्चं द्वंद्वं महाकाल प्रसीदेति पदद्वयं॥१०॥ लज्जायुग्मं वह्निजाया राजराजेश्वरो महान्॥
मंत्रग्रहणमात्रेण भवेत्सत्यं महाकविः॥११॥ गद्यपद्यमयी वाणी गंगा निर्झरिणी यथा॥ तस्य नाम्नानुसंभावं देवाग्रा यंति भावुकाः॥१२॥
शक्तिबीजद्वयं दत्वा कूर्चं स्यात्तदनंतरं॥ महाकालपदं दत्वा मायाबीजयुगं तथा॥१३॥ कूर्चमेकं समुद्धृत्य महामंत्रो दशाक्षरः॥ राजद्वा
रे दुर्गमे च पातु मां सर्वतोमुखः॥१४॥ वेदादि बीजमादाय भवानी तदनंतरं॥ महाकालाय तत्पश्चात्कूर्चं दत्वा च ठद्वयं॥१५॥ ह्रीं कारं पू
र्वमुद्धृत्य वेदादिस्तदनंतरं॥ महाकालिस्यान्तभागे स्वाहांतं मंत्रमुत्तमं॥१६॥ धनं पुत्रं सदा पातु बंधुरादौ निकेतनं॥ पिंगलाख्यः सदा पा
तु वैरिमध्ये विशेषतः॥१७॥ महाभीमः सदा पातु युद्धे नित्यं जयप्रदः॥ सभायां सर्वदुष्टघ्नः पातु स्वस्थान वल्लभा॥१८॥ कालीपार्श्वस्थि
ता देवः सर्वदा परिरक्षतु॥ भैरव उवाच॥ इतितेकथितं देवि देवनामपि दुर्लभं॥१९॥ पठनात्कालिका देवी तुष्टा भवति निश्चितं॥ श्मशा
ने पठनाद्देवि विघ्ननाशस्सदा भवेत्॥२०॥ संपूज्य कालिकां देवीं पठेत्कवचमुत्तमं॥ शृणुयाद्वा प्रयत्नेन शुचिः स्नातः समाहितः॥२१॥
सर्वव्याधिविनिर्मुक्तः सदानंदमयो भवेत्॥ श्रद्धया श्रद्धया वापि पठनात्कवचस्य तु॥२२॥ सर्वसिद्धिमवाप्नोति यद्यन्मनसि रोचते॥ ५६

बिल्वमूले पठेद्यस्तु पठनात्कवचस्य च॥२३॥ त्रिसंध्यं पठनाद्देवि भवेन्नित्यं महाकविः॥ कुमारीः पूजयित्वा च यः पठेद्भावतत्परः॥२४॥ न किं
चिद्दुर्लभं तस्य दिवि वा भुवि मोदते॥ दुर्भिक्षे राजपीडायां संग्रामे वैरिमध्यके॥२५॥ यत्र यत्र भयं प्राप्तः सर्वत्र प्रपठेन्नरः॥ तत्र तत्रा भयं तस्य भ
वत्येव न संशयः॥२६॥ वामपार्श्वे समानीय शोभितां वरकामिनीं॥ जपं कृत्वा पठेद्यस्तु तस्य सिद्धिः करे स्थिता॥२७॥ श्मशानस्थो महारुद्रो
महाकालो दिगंबरः॥ कपालं कर्तृकां वामे शूलं खट्वांगदक्षिणे॥ भुजंगभूषितांगोपि भस्मास्थिमणिमंडितः॥ ज्वलत्पावकमध्यस्थो भस्मश
य्याव्यवस्थितः॥२९॥ विपरीतरतां तत्र कालिकां हृदयोपरि॥ पर्यंकायं च वीर्यं च तौ कृत्वा च परस्परं॥३०॥ परस्परं पठेद्यस्तु तस्य सिद्धिः करे
स्थिता॥ इदं कवचमज्ञात्वा कालीं यो भजते नरः॥३१॥ नैव सिद्धिर्भवेत्तस्य विघ्नस्तस्य पदे पदे॥ ॥इति गंधर्वतंत्रे महाकालकवचं॥ ॥
ॐ ह्रीं क्षां यां रां लां वां क्षों ह्रौं महाकालभैरव सर्वविघ्नान्नाशय २ ह्रीं श्रीं फट् स्वाहा॥ ॐ ह्रीं क्ष्मीं हूं महाकालाय ह्रौं महादेवाय क्रीं कालि
कायै ह्रौं हस्क्रें यां रां लां वां क्रीं महाकाल भैरव सर्वविघ्नान्नाशय नाशय ह्रीं श्रीं फट् स्वाहा॥ भैरवमंत्रः॥ ॐ अं ५० मूलं ऐं अं ५० ॐ निर्वा
णकुल्लुका इति॥ चतुर्थः परिच्छेदः॥४॥ ॥अथ पुरश्चरणविधिः॥ तदुक्तं कालीतंत्रे॥ आदौ पुरस्क्रियां कुर्वन् नियमेन यथाविधिः॥ ल
क्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः॥१॥ रात्रौ तांबूलपूरास्यः शय्यायां लक्षमानतः॥ ततः सिद्धमनुर्मंत्री प्रयोगार्हो न चान्यथा॥२॥ जी
वहीनो यथा देहः सर्वकर्मसु न क्षमः॥ पुरश्चरणहीनो हि तथा मंत्रः प्रकीर्तितः॥३॥ तस्मादादौ पुरश्चर्यां कृत्वा साधकसत्तमः॥ नानाविधानक
र्तव्यं न चारणमितस्ततः॥४॥ भूतहिंसा न कर्तव्या पशुहिंसा विशेषतः॥ बलिदानं विना देवि हिंसा सर्वत्र वर्जयेत्॥५॥ अन्यमंत्रपुरस्कारं
निंदां चैव विवर्जयेत्॥ प्रयोगं च ततः कुर्यात्सर्वपरमदुर्लभं॥६॥ स्वतंत्रेपि॥ दिवा लक्षं शुचिर्भूत्वा हविष्याशी जपेन्नरः॥ ततस्तु तद्दशां
शेन होमयेद्धविषा प्रिये॥७॥ तर्पयेत्तीर्थतोयेन पयसा सर्पिषापि वा॥ मधुना वा सिता मिश्रेणापि परमेश्वरि॥८॥ ततो देवीं चाभिषिंचेत्तर्पण
स्य दशांशतः॥ तद्दशांशेन हविष्यान्नैर्भोजयेद्भक्तितः प्रिये॥९॥ कालीमंत्रविदो विद्वान् दक्षिणां गुरवे ददेत्॥ पाशांकं कथितं कल्पं शृणु चैवं

ततः प्रिये॥१०॥फेत्कारिणीये॥भिक्षाशीनियमाहारः सकृद्रात्रौ विधीयते॥हविर्वा चैवं जपं कुर्यात्सुरश्चरणिको द्विजः॥११॥शाकयाव
कभिक्षाशी चरुणा सहसर्पिषा॥दभ्रामूलैः फलैर्वापि कुर्याद्दशनमन्वहं॥१२॥ब्रह्मचर्यं तथैवोक्तं स्नानं त्रिषवणं तथा॥पूर्वाह्णे देवता
याश्च पूजां कुर्यात्तु विशेषतः॥१३॥सर्वमंत्रप्रयोक्तव्याप्रायशः प्रणवादिकः॥अनन्यचेता आसीनः कथ्यते विहितासने॥१४॥अनु
ध्रीयेत तैर्मंत्रान्गुरुवंदनपूर्वकं॥तंत्रांतरे॥द्विपस्थानं सदावीक्ष्यजपयागादिकं चरेत्॥१५॥अतएव कूर्मचक्रं वक्ष्यामि सिद्धिकार
णं॥आदौ चवर्तुलं कृत्वा नवकोष्ठानि कारयेत्॥१६॥नवभागं मध्यकोष्ठं तथैव पूर्वतो लिखेत्॥कवर्गादिसप्तवर्गं लक्षावीशांतदंतरं॥
॥१७॥मध्यस्थवसुकोष्ठेषु स्वरां श्चयुग्मशो लिखेत्॥मध्यकोष्ठस्थे त्रनाम चक्रं कूर्माख्यमुत्तमं॥१८॥यस्मिन्को ष्ठे स्वनाम पूर्ववर्णमु
खं स्मृतं॥मुखपार्श्वेयोः पाणियुग्मं पार्श्वद्वयं ततः॥१९॥कुक्षिस्थानं पादयुगं ततो ते पुच्छमीरितं॥मुखे कार्याणि सिध्यंति करे क्लेशमवा
प्नुयात्॥२०॥उदरे दुःखमधिकं पादयोर्हानिरुच्यते॥पुच्छे वधनहानिः स्याद्दीपस्थानं मुखं स्मृतं॥२१॥दीपस्थानं विनायो हि जपहो
मादिकं चरेत्॥तदेव निष्फलं विंद्यादभिचारायकल्पते॥२२॥इति तारा प्रदीपे च॥कूर्मचक्रं मुखवीक्ष्य आसनं तत्र कल्पयेत्॥चैला
जिनकुशानेव सुचित्रकंबलानि च॥२३॥आसनानि प्रकल्प्याथ संविशेत्साधकोत्तमः॥शववाकुशादर्भैवान्नृचर्मणि तथा पुनः॥२३॥
महाशंखोपरिस्थित्वा साधकः कल्पयेत्ततः॥अत्रान्यापि॥देवतागुरुमंत्राणामैक्यं संभावयन्धिया॥जपेदेकमनाः प्रातः कालान्मध्यं
दिनावधि॥२५॥यत्संख्यया समारब्धं तत्कर्तव्यमहर्निशं॥यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टो भवेन्नरः॥२६॥मुंडमालायामपि॥प्रातः का
लं समारभ्य जपेन्मध्यदिनावधि॥प्रथमेह्नि यत्संख्यं जप्तं तत द्दिने दिने॥२७॥न्यूनाधिकं न जप्तव्यमासमाप्तेः सदा जपेत्॥तंत्रांतरे च॥ ५७
संख्यापूर्तौ निजद्रव्यैर्जपसंख्या दशांशतः॥२८॥ततो होमं दशांशं तु जले संपूज्य देवतां॥तर्पणादि तथा यत्नात्कुर्यात्साधकसत्तमः॥
॥२९॥कुलसंभारेपि॥स्नातः शुक्लांबरधरः शुचिः प्रयतमानसः॥दिवाएनं प्रकर्तव्यं सर्वकामार्थसिद्धये॥३०॥तारादीपे च॥विरच्य

विधिवद्विद्वान्मंडलं सुमनोहरं॥तस्मिन्कलशमारोप्य क्वाथतोयैः प्रपूजयेत्॥३१॥निःक्षिप्य नवरत्नानि तत्र गंधाष्टकं पुनः॥आवा
ह्य पूजयेन्मंत्री देवीमावरणैः सह॥३२॥कलशे पूजयेन्मंत्रं संख्यया पूरणावधि॥ततः पूर्णे समागत्य गुरुर्देवो विधानतः॥३३॥अभिषिं
चेच्छिष्यमूर्ध्नि कलशोदकवारिभिः॥ततः शिष्यः प्रयत्नेन धनाद्यैस्तोषयेद्गुरुं॥३४॥अथैवं विधिना लक्षं प्रजप्य तद्दशांशहोमं तद्दशांशतर्पणं
तद्दशांशाभिषेकः तद्दशांश ब्राह्मणभोजनं च॥तदशक्तौ होमादिसंख्या द्विगुणो जपो विप्रेण कार्यः॥क्षत्रियेण त्रिगुणं जपः कार्यः॥वैश्येन च
तुर्गुणजपः॥शूद्रेण पंचगुणजपः॥तदुक्तं कुलप्रकाशे॥यद्यंगं विहीयेत तत्संख्याद्विगुणो जपः॥इतरेषां त्रिवर्णानां त्रिगुणादि समीरितः॥
॥३५॥गुरुं संतोषयेद्देवं मंत्राः सिध्यंति मंत्रिणः॥मुंडमालायां च॥होमाद्यशक्तो देवेशि कुर्यात्तद्द्विगुणं जपः॥३६॥मदिपूजाद्यशक्तः स्या
द्ध्याभावन सुंदरि॥केवलं जपमात्रेण मंत्राः सिद्धा भवंति हि॥३७॥अथात्र ब्राह्मणभोजनमावश्यकमेव॥तदुक्तं कुलप्रकाशे॥एकमंगं वि
हीयेत मंत्रानिष्टव्य वाप्नुयात्॥अन्नेश्चतु विधैर्दव्यपदार्थैः षड्रसान्वितैः॥३८॥संभोजितेषु विप्रेषु सर्वं हि सफलं भवेत्॥सम्यक् सिध्येकमं
त्रस्य पंचांगोपासनेन हि॥३९॥सर्वमंत्राश्च सिध्यंति तत्प्रसादात्कुलेश्वरीति॥अन्यत्रापि॥सर्वथा भोजयेद्विद्वान्कृतसांगार्थसिद्धये॥वि
प्राराधनमात्रेण व्यंगं सांगं भवेत्सदा॥तंत्रांतरे च॥कृत्वा मंत्रजपं मंत्री पुरस्कारान्समासंयुतः॥४१॥दशांशं जुहुयादग्नौ यथोक्तविधिना ततः
यद्वा जपचतुर्थांशं स्वाहांतं मंत्रमुच्चरन्॥तत्तद्धोमदशांशं तु स्वाहांतं तर्पयेज्जलैः॥तर्पणस्य दशांशेन नमो मंत्रं समुच्चरन्॥अभिषिंचेत्स्व
मूर्धानं जलैः कुंभाख्यमुद्रया इति॥फेत्कारिणीये॥स्वाहांतेनैव मंत्रेण कुर्याद्धोमं बलिं तथा॥४२॥मंत्रांते नाम संयोज्य तर्पयामीति तर्पणं॥दे
वताया प्रियद्रव्यैर्होमयेत्साधकोत्तमः॥इति पाशवकल्पः॥अथवीरकल्पे विशेषो यथा॥तदुक्तं कुलचूडामणौ॥पुरश्चरणकाले च परया
पां प्रपूज्य च॥दीक्षितां वस्त्रपुष्पाद्यैर्भोज्यैः पायससंभवैः॥आराध्य काले च नियतं शुचि पक्वान्नभोजनैः॥नानाविधैः पिष्टकैश्च नानारससम
न्वितैः॥दुग्धदधिघृतैस्तक्रनवनीतैः सशर्करैः॥उपलाखंडचूर्णैश्च नानाविधरसायनैः॥नारिकेलैः कपित्थैश्च नागरंगसुदर्शनैः॥

श्या॰र॰
५८

सिंचार्कूवीक्षप्रेक्ष्वरा॥ प्रादिफलान्वितैः॥ नानारण्यफलैश्चैव नानागंधानुलेपनैः॥ चंदनैर्मृगनाभ्यादिश्रीखंडैर्नवपल्लवैः॥ हकनैर्लाभ्रिकै
श्चैव अन्यैश्चवनजैस्तथा॥ नानाशैलसमुद्भूतैः नानालंकारभूषणैः॥ शून्यगेहे समानीय चार्घोदकविशोधनैः॥ अमृतीकरणं कृत्वा शक्ति
वाभिमुखं नयेत्॥ शक्तयश्चतत्रांतरे॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलभूषणा॥ वेश्या नापितकन्या च रजकी योगिनी तथा॥ विशेषवैद
ग्ध्ययुताः सर्वा एव कुलांगनाः॥ अथ दीक्षिता अष्टशक्तीश्चाभिमुखं नयेत्॥ क्रमेण संस्थाप्य पूर्वविद्धा॥ अर्घ्यं स्थापयित्वा अर्घोदकेनाभ्युक्षामि
तमंत्रेण धेनुमुद्रयामृतीकृत्वा अष्टशक्तीनां रूपभेदं ज्ञात्वा ब्राह्मण्याद्यष्टशक्तीनां नामकरणं क्रमेण कृत्वा आसनादिकं दद्यात्॥ तदुक्तं तत्रैव॥
अथ कन्यारूपभेदं विलोक्यामर्ध्यवेष्टितं॥ ब्राह्मण्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः॥ आसनं प्रथमं दत्वा स्वागतं च पुनः पुनः॥ अर्घ्यं
पाद्यं च पानीयं मधुपर्कं जलं ततः॥ स्थापयेद्गंधपुष्पादि केशसंस्कारमाचरेत्॥ धूपयित्वा ततः केशान् कोशं पंच निवेदयेत्॥ ततः स्नानांत
रपीठमास्तीर्य पादुकायुगं॥ दत्वा तत्र समासीनां नानानालंकारभूषणैः॥ भूषयित्वानुलेपं च गंधमाल्यं निवेदयेत्॥ तस्यां तां शक्तिं पूजाप्रक
रणात्क्रमेण ध्यात्वा तां सां मूर्ध्नि ब्राह्म्यादिमातृः समावाह्य जीवन्यासादिकं कृत्वा गंधपुष्पधूपदीपपानद्रव्यांतव्यंजनं दत्वा तासां सम्यक
र्णे स्तोत्रं पठेत् तदुक्तं तत्रैव॥ तां तां शक्तिं समावाह्य मूर्ध्नि तां सां समर्चयेत्॥ भोज्यं मंडलमध्ये तु स्वर्णपात्रे सुशोभने॥ चर्व्यं चोष्यं लेह्यपेय
भोज्यं भक्ष्यं निवेदयेत्॥ अथ दीक्षितायदि भवेत्तता मायां निवेदयेत्॥ तासां सव्येषु कर्णेषु ततः स्तोत्रं समाचरेत्॥ मातर्देवि नमस्तेस्तु ब्र
ह्मरूपधरेनघे॥ कृपयाहर विघ्नं मे मंत्रसिद्धिं प्रयच्छ मे॥ माहेश्वरी वरदे देवि परमानंदरूपिणी॥ कृपयेत्यादि॥ कौमारी सर्वविद्येशी कुमार
क्रीडने वरे॥ कृपयेत्यादि॥ विष्णुरूपधरे देवि विनतासुतवाहिनी॥ कृपयेत्या॥ वाराही वरदे देवी दंष्ट्रोद्धृतवसुंधरे॥ कृपयेत्यादि॥ ऐरावत ५८
स्थितेचैंद्रि सहस्राक्षि नमोस्तु ते॥ कृपयाह॰॥ नमोस्तु तुभ्यं चामुंडे चंडमुंडनिषूदिनि॥ कृपया॰॥ महालक्ष्मी महोत्साहे क्षोभसंतापनाशि
नी॥ कृपयेत्यादि॥ भितिमातृमये देवि भितिमातृबहिष्कृते॥ एकैवक्रुविधरे विविश्वरूपे नमोस्तु ते॥ एतत्स्तोत्रं पठेद्यस्तु कर्मारंभेषु सं

यतः॥ विदग्धां वा समालोक्य तस्य विघ्नं न जायते॥ कुब्जी न स्पृद्वारे देव्यः कथिता स्तव पुत्रक॥ दीक्षाकाले नित्यपूजासमये नार्चयेद्यदि॥
तस्य पूजाफलं वत्स नीयते यक्षराक्षसैः॥ यदि श्रीणपरा स्तातु भोजयेत्करहादिभिः॥ स्थित्वा स्तोत्रं पठेत्तावद्यावत्तृप्तिः प्रजायते॥ आ
चम्य सुखवा सादिताम्बूलं च निवेदयेत्॥ अन्यायदि निगच्छंति निजकन्या निजानुजाः॥ अथ जायामातुलानी माता वातित्सपत्निका॥ वय
स्या जा विता वापि हीनापि परमाकुला॥ पूज्या कुलवरैः सर्वा निजाहंकारवर्जितैः॥ सर्वाभावे एकतरा पूजनीया प्रयत्नतः॥ संस्कृता संस्कृ
ता वापि जननी वापि निष्पातिः॥ पूर्वाभावे परापूजा मदंशा योषितायतः॥ एकश्चैव कुलेशानि पूजार्हस्तत्र भैरव॥ सर्वत्र वल्लभाः पूज्याः
सत्यं ब्रह्मा शिवादिनः॥ एका च युवती तत्र पूजिता चावलोकिता॥ सर्वा एव परादेव्यः पूजिताः कुलभैरव॥ आद्यंते च मध्ये च लक्षपूर्तौ वि
शेषतः॥ न पूजयति चेत्कांतां स च विघ्नैर्विलुप्यते॥ पूर्वार्जितफलं नास्ति का कथा परजन्मनि॥ तस्मात्सर्वप्रयत्नेन यदिच्छेदात्मनो हितं॥ म
मापि क्रोधसंतापशमनं विघ्ननाशनं॥ यत्नतः पूजनीयास्तु कुलाकुलजनप्रिय॥ अथैवं क्रमेण लक्षजपादौ आद्यौ मध्ये ते च शक्तयः पू
ज्याः ततो रात्रौ पंचमेन देवीं संपूज्य हरस्य मानस्याकुलयुक्तो गुरुं शिरसि हृदि देवीं च ध्यात्वा शिवोहमिति भावयन् जपं कुर्यात्॥ इती
य प्रहरावधि यावत् निशायां च प्रजपेत्सर्वां रात्रिशेषजपेन्न च इति॥ स्वतंत्रेपि॥ रात्रौ मांसासवैर्देवीं पूजयित्वा विधानतः॥ ततोनग्नां स्त्रियं न
ग्रारमणं दधतोपि च॥ जपेल्लक्षं ततो दद्विहोमयेज्ज्वलदानले॥ योनिकुंडे स्थितं सर्पिर्मांसमत्स्ययुतं भृशं॥ दशांशं तर्पयेन्मद्यैर्मांसामिश्रैः
सुसाधकः॥ तर्पणस्य दशांशं तु अभिषिंच्य जगन्मयी॥ दशांशं भोजयेत्साधुसाधकं कालिकाप्रिये॥ मद्यं मांसं च मत्स्यं च चर्वणं च प्रद
पयेत्॥ नतस्तु भोजयेद्गुरुं कन्यायुरुं स्वर्णादिभिः प्रिये॥ एतत्कल्पद्वयादेव मंत्रः सिध्यति निश्चितं॥ विनापीत्वा सुरां भुक्त्वा मांसं गत्वा रज
स्वलां॥ योजपेद्दक्षिणा देवी तस्य दुःखं पदे पदे॥ कालीतंत्रेपि॥ तर्पणस्य विधिं वक्ष्ये येन कार्याणि साधयेत्॥ तर्पयेच्चपयो मिश्ररक्त
धारायुते स्तथा॥ मद्याभिश्च ततः दातद्दत स्वकीयेन कचेन च॥ आकर्षितायाः कन्यायाः कुलप्रक्षालनेन च॥ मेषमाहिषरक्तेन नररक्तेन

नैवहि॥मूषमार्जाररक्तेनतर्पयेत्परदेवतां॥एवंतर्पणमात्रेणसाक्षात्सिद्धीश्वरोभवेत्॥कविताजायतेतस्यद्राक्षारसपरंपरा॥बृह
स्पतिसमोभूत्वादिविवक्तुविमोदते॥नतस्यपुण्यपापानिजीवन्मुक्तोभवेद्ध्रुवं॥उत्तरतंत्रेपि॥योनिरूपंहिकुंडंवैकुलसाधकसत्तमः
हस्तविस्तारितंतावत्तत्त्वावापितथाप्यधः॥तत्रकार्याहिमंत्रेणअग्नेःस्थापनिकाक्रियाः॥महाकालोयदेवायदद्याच्चप्रथमाहुतिं॥
एवंमद्येनमांसेनभक्तेनरुधिरेणच॥कृष्णपुष्पेनसाज्येनसरक्तेनविशेषतः॥आमिषादिभिरप्येवंश्मशानेजुहुयात्सुधीः॥कुलसं
भारपि॥रात्रौनग्नामुक्तकेशोमैथुनेचापिनत्वतः॥कर्तव्यंतुप्रयत्नेनसर्वकामार्थसिद्धये॥द्विजातीनांचसर्वेषांदिवाविधिरिहोच्यते॥शू
द्राणांचतथाप्रोक्तंरात्रौविशेमहाफलं॥एवं यद्यत्कामयतेकामंतत्तदाप्नोतिनिश्चयाः॥कालिकाश्रुतौ॥अयहनंकालिकाज्ञापीयः॥
सदाशुद्धात्माज्ञानवैराग्ययुक्तःशांभवीयः॥सदाशुद्धात्माज्ञानवैराग्ययुक्तःशांभवदीक्षासुरतःशाक्तेषुदिवाब्रह्मचारीरात्रौनग्नः
सर्वदामैथुनासक्तमानसःजपपूजादिनियमोयोषितःप्रियकरःसुभगोदकेनतर्पणंतेनैवपूजनं॥सर्वदाकालीरूपमात्मानंचविभा
वयेत्॥ससर्वयोषिदासक्तोभवतिससर्वहत्यांतरति॥अथपंचमकारेणसर्वमाप्नोति॥विद्यापशुधनंधान्यंसर्वेशांचकवित्वंचना
न्यःपरमपंथाविद्यते॥मोक्षायज्ञानायधर्मायत्सर्वंभूतंभव्यंयत्किंचिद्दृश्यादृश्यमानंस्थावरजंगमंतत्सर्वंकालिकामंत्रेतुप्रोतंचे
दयंश्रुतमनुजापीनान्यःपाप्मानंतरतिससतुगम्यागमनंतरति॥ससर्वपापंतरतिससर्वसुखमाप्नोतिससर्वज्ञानीतिससर्वस
न्यासीभवति॥सविरक्तोभवतिससर्वविदाध्यायीभवतिससर्वमंत्रजापीभवतिससर्वशास्त्रवेत्ताभवतिससर्वयज्ञकारीभवति
नआवयोर्मित्रंपुरतोभवति॥इत्याहभगवाञ्छिवःनिर्विकल्पेनमनसायावैसर्वंकरोतीति॥अथैवंपुरश्चारीप्रयोगार्हीभवतीति॥
अथादौशक्तिशुद्धिर्विलिख्यते॥यतोदीक्षितासंगान्निंदावादश्रुतेः॥तद्यथाभावचूडामणौ॥अदीक्षितकुलासंगात्सिद्धिहा
निःप्रजायते॥तत्कथाश्रवणंवस्यात्तत्त्यागमनंयदि॥सकुलीनःकथंदेवपूजयेत्परमेश्वरीमितिश्रीक्रमेपि॥संशोधनमकृत्वा ५९

वैस्त्रियंगच्छेत्साधकः॥कृतेपिसिद्धिहानिःस्यात्क्रुद्धाभवतिचंडिका॥तस्माच्छक्तिशुद्धिःकार्या॥तदुक्तंकुलतंत्रे॥अभिषेकाद्वेछु
द्धिर्मंत्रस्योच्चारणात्तुतो॥रतीकालिमहेशानिदीक्षाकालेचकन्यका॥बलाद्धायस्ततोप्यर्थादभिषेकंसमाचरेत्॥सुरयावतसावापिज
लेनमनुनातथा॥संभोगेभिषिचेन्नारीगुणंवामंत्रवर्जितं॥आदौबालांसमुच्चार्यत्रिपुरायेसमुच्चरेत्॥नमःशब्दंसमुच्चार्यइमांशक्तिंव
तावदेत्॥पवित्रीकुरुसत्त्वंतमममशक्तिंकुरुप्रिये॥वह्निजायांसमुच्चार्यशुद्धिमंत्रःसुरेश्वरी॥अनेनमनुनादेविअभिषिक्ताःस्त्रियःसदा॥
रममाणाभ्रमेनित्यंसर्वसिद्धिमवाप्नुयात्॥इहलोकेपरंभोगंभुक्त्वामुक्तिमवाप्नुयात्॥अन्यत्रापि॥आनीयकन्यांकांभद्रांघृणालज्जावि
वर्जितां॥स्वकांतांपरकांतांवादीक्षितांयेविनाभितां॥पूजकःपूजयेन्नित्यंवामपार्श्वेनिवेश्यच॥स्त्रीयकस्यात्तविधिनान्यासजालंप्र
विन्यसेत्॥ततोजपेत्स्त्रियंगच्छन्विद्यांत्रिभवतारिणीं॥इतिशक्तौविशेषोयथा॥कुमारीतंत्रे॥नटीकापालिकीवेश्यारजकीनापि
तांगना॥ब्राह्मणीशूद्रकन्याचतथागोपालकन्यका॥मालाकारस्यकन्याचनवकन्याःप्रकीर्तिताः॥एतासुक्राचिदानीयात्ततस्त्वयोनि
मंडले॥पूजयित्वामहादेवींततोमैथुनमाचरेत्॥धर्माधर्महविर्दीप्तेचात्माग्नौमनसास्रुचा॥सुषुम्नावर्त्मनानित्यमक्षवृत्तिंजुहोम्यहं॥स्वा
हांतोयंमहामंत्रआरंभेपरिकीर्तितः॥ततोजपेत्स्त्रियंगच्छन्देवींत्रिभुवनेश्वरीं॥प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचा॥धर्माधर्म
कलास्नेहपूर्णमग्नौजुहोम्यहं॥स्वाहांतोयंमहामंत्रःशुक्रत्यागविधीयते॥अदीक्षितानंतरापूर्वोक्ताभिषेकमंत्रेणतीर्थादिनाभिषेकंकृ
त्वास्याःकर्णेदेवीबुध्यामंत्रेसमुच्चरेदितिशक्तिशुद्धिः॥ततोमकारपंचमेनदेवींसंपूज्यमूलांतेधर्माधर्मेत्यादिकंपठन्मातृपीठेपितृमु
खंदत्वाजपंकुर्यात्॥ततोमूलांतेप्रकाशाकाशेत्यादिकंपठन्ततउत्सृजेत्॥इतिअथवामातृपीठेसावरणांदेवींध्यात्वापूजयित्वावाशि
वोहमितिभावयन्उभयोःसंगमंकृत्वापूर्ववज्जपादिकंकुर्यात्॥इत्यपरःप्रकारः॥ ॥इतिश्रीपूर्णानंदगिरिपरमहंसविरचितश्या
मारहस्येपंचमःपरिछेदः॥५॥ ॥अथकुलीनाचारक्रमोलिख्यते॥तदुक्तंकालीतंत्रे॥अथाचारंप्रवक्ष्यामियत्कृतेमृतमश्नुते॥स

DR BHAU DAJI MEMORIAL

र्भूतहितेयुक्तः समयाचारपारगः॥ अनित्यकर्मसंत्यागी नित्यानुष्ठानतत्परः॥ मंत्राराधनद्वारेण शिवभावेन तत्परः॥ परस्यां देवतायांतुस
र्वकर्मनिवेदकः॥ अन्यमंत्रार्चनेश्रद्धा अन्यमंत्रप्रपूजनं॥ कुलस्त्रीवीरनिंदा च तद्द्रव्यस्यापहारणं॥ स्त्रीषु रोषग्रहास्यं च वर्जयेन्मतिमान्सदा॥
स्त्रीमयं च जगत्सर्वं स्वयं तावत्तथा भवेत्॥ पेयं चार्घ्यं तथा चोष्यं लेह्यं भक्ष्यं गृहं सुखं॥ सर्वं च युवती रूपं भावयेद्धृतमानसः॥ कुलजां युवतीं वी
क्ष्य नमस्कुर्यात्समाहितः॥ यदि भाग्यवशेनैव कुलदृष्टिस्तु जायते॥ तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत्॥ बालां वा यौवनोन्मत्तां वृद्धां वा
सुंदरीं तथा॥ कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत्॥ तासां प्रहारं निंदां च कौटिल्यमप्रियं तथा॥ सर्वथा न च कर्तव्यमन्यथा सिद्धिरोधकृ
त्॥ स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं॥ स्त्रीसंगिना सदा भाव्यमन्यथा स्वक्रिया अपि॥ विपरीतरता सा तु भाविता हृदयोपरि॥
न द्वेस्तरचितं पुण्यं तद्वस्तरचितं जलं॥ तद्वस्तरचितं भोज्यं देवताभ्यो निवेदयेत्॥ स्त्रीद्वेषो नैव कर्तव्यो विशेषात्पूजनं महत्॥ जपस्थानं महा
शंखं निवेशो ध्वजं जपं चरेत्॥ स्त्रियं गच्छन्स्पृशन्पश्यन्यत्र कुत्रापि चूडके॥ गंधं तांबूलमन्यच्च भक्ष्यं द्रव्यं यथारुचि॥ मांसं मत्स्यं दधि क्षौद्रं ना
नाविधसमन्वितं॥ भुक्त्वा यथेष्टं भक्ष्याणि देव्यै दत्वा चरेज्जपं॥ दिक्काल नियमो नात्र स्थित्यादि नियमो न च॥ न जपे काल नियमो नार्चा
दिषु बलिष्वपि॥ सर्वदा पूजयेद्देवीमस्नातः कृतभोजनः॥ स्वेच्छा नियम उक्तोऽत्र महामंत्रस्य साधने॥ वस्त्रासनस्थानदेहदेहस्पर्शादिवारि
णा॥ शुद्धिं न वर्चयेदत्र निर्विकल्पं मनश्चरेत्॥ सर्व एव शुभः कालो नाशुभो विद्यते क्वचित्॥ न विशेषो दिवारात्रौ न संध्यायां तथा निशि॥ ना
त्र शुद्ध्याद्यपेक्षास्ति न चामेध्यादि दूषणं॥ नाधर्मो विद्यते सुभ्रु किं च धर्मो महान्भवेत्॥ स्वेच्छाचारोऽत्र गदितः प्रचरेद्धृतमानसः॥ कृतार्थोऽमन्य
मानस्तु संतुष्टो निजमानसे॥ इत्याचारपरो मंत्री जपपूजादितत्परः॥ पालकः कुलतत्वानां परतत्वे प्रलीयते॥ उद्धिग्नासश्चिरानंदभयः
संसारमोचनः॥ अणिमाद्यष्टसिद्धीनामधिपः साधको भवेत्॥ अथ मंत्रभेदा निरूप्यंते॥ तदुक्तं सिद्धेश्वरतंत्रे॥ अथ वक्ष्यामि तां देवीं कालिकां
भवतारिणीं॥ यज्ज्ञात्वा साधको भोगान्भुक्त्वा मोक्षमवाप्नुयात्॥ मूको विकवितामेति धनेन च धनाधिपः॥ बलेन पवनः साक्षाद्रूपेण च मनो

भवः॥ मंत्रोद्धारं शृणुष्वेमं गुह्याद्गुह्यतमं प्रिये॥ गांतादि वह्निमारूढं वामनेत्रेण संयुतं॥ चंद्रार्धबिंदुनामूर्ध्नि भूषितं परमेश्वरि॥ सांता दिवाम
नेत्रस्थं वह्निचंद्रसमन्वितं॥ बीजरत्नमिदं प्रोक्तं साक्षात्कल्पद्रुमं प्रिये॥ मादन्त्यं तेंद्रवीजस्थं ठंतस्वरसमन्वितं॥ चंद्रार्धबिंदुभूषाढ्यं संपूर्णं सि
द्धिदो मनुः॥ अस्यैवाशेषमाहात्म्यं वक्तुं नाहं महेश्वरः॥ तथापि कथ्यते देवि संक्षेपादस्य यत्फलं॥ मोक्षार्थी लभते मोक्षं कैवल्यं परमं पदं॥ दैवी
रूपं जगत्सर्वं हि धंतत्र विवर्जयेत्॥ अथ मंत्रांतरं॥ विश्वेश्वरतंत्रे॥ मंत्रांतरं प्रवक्ष्यामि शृणु पार्वति सादरं॥ यस्याराधनमात्रेण सर्वसिद्धीश्वरो
भवेत्॥ अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित्॥ न कुत्रापि समाख्यातं तव स्नेहाद्दिह्ये अते॥ पूर्वोक्तमंत्रराजस्य शेषवर्णद्वयं प्रिये॥ संहार
शक्तिमार्गेण बंधुभ्योऽपि न दर्शयेत्॥ मंत्रस्य स्मरणाद्देवि सं कुरुष्वस्य सुंदरी॥ कोटिजन्मार्जितं पापं तत्क्षणात्स्वनश्यति॥ गद्यपद्यमयी वा
णी तस्य सर्वविधा भवेत्॥ तस्य संस्पर्शमात्रेण वादिनो मूकसंकुलाः॥ तस्य संलापमात्रेण मूकः काव्यं करोति हि॥ तस्य दर्शनमात्रेण
वादिनः कुंठतां गताः॥ सदानंगे तभीवाणीन स्वनेनुकदाचन॥ द्वंद्वभावं परित्यज्य किमन्यद्बहु जल्पितैः॥ यद्यदाप्रार्थयते मंत्री तत्तदाप्नो
ति निश्चयः॥ ऋषिः स्यादीश्वरो देवो त्रिष्टुप्छंदः प्रकीर्तितं॥ देवता कालिका प्रोक्ता चतुर्वर्णफलप्रदा॥ ध्यानमस्याः प्रवक्ष्यामि शृणु पा
र्वति सादरं॥ नीलेंदीवरसंनिभां त्रिनयनां सापीनतुंगस्तनीं भास्वन्मौक्तिक किरीटशोभितगणां क्षीणां भुजैर्बिभ्रतीं॥ खड्गं मुंडवराभयं
स्मितमुखीं मोहांधकारापहां ध्यायेत्सम्यगनाकुलेन मनसा प्रेतासनां कालिकां॥ १॥ एवं ध्यानपरो देवि सर्वान्कामानवाप्नुयात्॥ उक्त
पीठमहेशानि ततः पूजां समाचरेत्॥ रात्रौ द्वितीययामे च अशक्तो दिवसेऽपि च॥ हेमादिपात्रमादाय यंत्रं कुर्याद्विचक्षणः॥ अष्टपत्रं लिखे
त्पद्मं चतुर्द्वारं स्कशोभितं॥ तन्मध्ये च त्रिकोणं स्यात्तन्मध्ये विलिखेन्मनुं॥ दक्षिणा वत्स मर्चादि विशेषः पुनरुच्यते॥ प्रातः कृत्यादिकं कृत्वा
व्यापकन्यासमाचरेत्॥ तत्र विशेषो यथा॥ तंत्रे वोक्तं॥ आचांतो मूलमंत्रेण शिखां बध्वा तु मंत्रतः॥ स्वाहांतं मूलमुच्चार्य सर्ववश्यकरेति
च॥ मनुनानेन देवेशि शिखाबंधनमाचरेत्॥ तत उक्त्वा मूलमंत्रं सर्वशुद्धिं समाचरेत्॥ अनेन मनुना देवि स्थानशुद्धिं समाचरेत्॥ षड्दी

र्धयुक्तेन ध्यानेन षडंगानिन्यसेद्बुधः॥ यंत्रं सिंहासने कृत्वा पीठपूजां समाचरेत्॥ किंतु पीठशक्तो विशेषस्तदुक्तं तंत्रे च॥ आसनं मंगलां दु
र्गां जयंतीं विजयां जयां॥ वाराहीं भुवनेशीं च प्राणादिषु च दिक्षु च॥ संपूज्य गंधपुष्पैस्तु देवीं ध्यात्वा समाहितः॥ गंधाधारे च यन्मंत्री आत्मानं
देवतामयं॥ श्वासमार्गक्रमेणैव यंत्रमध्ये तु साधकः॥ समानीय ततो देवीं तत्रावाह्य च मुद्रया॥ प्राणप्रतिष्ठां कृत्वा तु पाद्यादिभिरथार्चयेत्॥
अनुलेपं प्रयत्नेन रक्ताद्यैर्धूपादिभिर्युतं॥ नानाविधान्नैवेद्यं पायसं शर्करायुतं॥ दद्यात्प्रयत्नतो मंत्री बलिं चैव विधानतः॥ षडंगानि प्र
थ्याथ तथैवावरणं यजेत्॥ त्रिकोणे पूजयेद्देवीं कामाख्यां भद्रकालिकां॥ त्रिपुरां च समभ्यर्च्य वामावर्तक्रमेण तु॥ उग्रं चंडं प्रचंडं च भैरवीं चा
परत्रिके॥ माहेश्वरीं तथा दुर्गां वैष्णवीं चापरत्रिके॥ ततोऽष्टदलपत्रेषु ब्राह्म्याद्याः पूजयेत्क्रमात्॥ पश्चाद्बहिः समभ्यर्च्य भैरवाष्टकमेव च॥
तद्बहिश्चापि देवेशि दिक्पालांश्च समर्चयेत्॥ तेषामस्त्राणि तद्बहिः पूजनीयानि यत्नतः॥ स्वाहांतेन च मूलेन देवीं सावरणां ततः॥ पाद्या
द्यैर्वर्चयित्वा तु यथाशक्ति जपं चरेत्॥ एवं पूजापरो देवि साधको विजितेंद्रियः॥ अंतकाले च देवेशि लय्येव प्रविलीयते॥ न कुत्रापि भयं त
स्य मंत्रराजं स्मरेत्तु यः॥ न देयं कस्यचित्स्थाने स्वकुले न्यकुलेपि वा॥ यदि स्नेहेन देवेशि ददाति मंत्रमुत्तमं॥ तदा ज्येष्ठाय पुत्राय पंडिताय वि
नीयते॥ अन्यस्मैन प्रकाश्यं तु स्नेहाद्भावात्कदापि॥ एतत्तु कथितं देवि मंत्रं सर्वार्थसाधकं॥ चतुर्वर्गफलं चैव लभते नात्र संशयः॥ पुरश्च
र्या तु लक्षं स्यात्तद्दशांशेन हुता दिकं॥ एतत्प्रमाणं तु एकाक्षरक्रमेण लिखयिष्यामः॥ अथान्यप्रकारस्तदुक्तं कालिकाश्रुतौ॥ अथ ह सर्वा वि
द्यां प्रथमं मेकं द्वयं त्र्यं वा नामसंपुटितं स्वाहा प्रायोजयेत्॥ गतिस्तस्या स्त्रीतिनान्यस्य इह गतिर्योमसत्यं तत्सत्॥ अथ गुरुं परितोष्य गृ
ह्णीयान्मंत्रराजं गुरुस्तमपि शिष्याय सत्कुलीनाय विद्याभक्ताय शुश्रुवस्त्रियं दद्यात्स्वयं परिपूज्य निशायां निर्जने हर्म्ये॥ एकाशी शिवागेह
लक्षं तदर्धं वा जप्त्वा देयं आदौ तु प्रणवं बीजं ह्रीं मायाचतारकं॥ मध्ये मूलं सदा जप्त्वा जपं तत्संपुटीकृतं॥ ॐ सत्यं तत्सत्॥ नान्याप्र
कारेण सिद्धिर्भवतीह वै काली कामनोस्तारा मनोर्वा त्रिपुरामनोर्वा सर्वस्य दुर्गामनोर्वा इत्येवमुक्तः शिवेन॥ ॐ तत्सदिति॥ सर्वा विद्यां

मितिश्रुर्वैक्तद्दाविंशाक्षर्याः प्रथमबीजं वा बीजत्रयं वा पुटितं संबोधनं तन्नामचेत्यर्थः॥ कालीतंत्रे च॥ काली हृदयविद्या च सिद्धिविद्या
महोदयी॥ पुरा येन यथा जप्त्वा सिद्धिमायुर्दिवौकसः॥ कामाक्षरं वह्निसंस्थं मिंदिरानादबिंदुभिः॥ मंत्रराजमिदं ख्यातं दुर्लभं पापचेत
सां॥ सुलभं सुकृतां भक्त्या साधकानां महात्मनां॥ त्रिगुणां तु विशेषेण सर्वशास्त्रप्रबोधिका॥ अनया सदृशी विद्या नास्ति सारस्वतप्रदा॥
आकर्षणवशीकारमारणोच्चाटनं तथा॥ शांतिपुष्ट्यादिकर्माणि साधयेदनया चिरात्॥ किं वक्तव्यमनेनापि वर्णितुं नैव शक्यते॥ जिह्वा
कोटिसहस्रैस्तु वक्त्रकोटिशतैरपि॥ अनया सदृशी विद्या त्वनया सदृशो जपः॥ अनया सदृशं ज्ञानं न भूतं न भविष्यति॥ ध्यानपूजादि
कं सर्वं साधनं च पुरस्क्रिया॥ अनिरुद्धसरस्वत्याः समानं सर्वमीरितं॥ कुलचूडामणौ च॥ ब्रह्मा सरस्वतीयुक्तो देवतासुरसंयुतः॥
बीजत्रयं त्रिसमायुक्तं काली मंत्रमुदीरितं॥ एकं वा द्विगुणं वापि त्रिगुणं वापि भैरव॥ जप्त्वा चाकर्षयेत्सर्वं स्थावरं जंगमादिकं॥ एषा विद्या
महाकाली गुह्याद्गुह्यतरा स्मृता॥ सिद्धेश्वरतंत्रे च॥ शृणु देवि प्रवक्ष्यामि एकाक्षरमनुं प्रिये॥ यस्य विज्ञानमात्रेण जीवन्मुक्तस्तु साध
कः॥ गुह्याद्गुह्यतरं मंत्रं न देयं प्राणसंशये॥ शांता द्विवह्निमारूढं सव्येतरदृगन्वितं॥ चंद्रबिंदुसमायुक्तं परं गुह्यं महेश्वरि॥ इति विशे
षो यथा॥ कुलचूडामणौ॥ पूर्वबीजं पराशक्ति बीजेन मूर्तिकल्पना॥ षड्दीर्घभाजा बीजेन कुर्यादंगादिकल्पना॥ ध्यानं तदुक्तं तंत्रे च॥
ध्यायेत्कालीं करालास्यां दंष्ट्रानन विलोचनां॥ स्फुरच्छवकरश्रेणीकृतकांचीं दिगंबरां॥ वीरासनसमासीनां महाकालोपरि स्थितां॥
श्रुतिमूलसमाकीर्णास्रक्क्वाणीं चंडनादिनीं॥ मुंडमालागलद्रक्तचर्चितां पीवरस्तनीं॥ मदिरामोदितस्फालकंपितां खिलमोदिनीं॥
वामकरे खड्गमुंडधारिणीं दक्षिणकरे वराभययुतां घोरवदनां लोलजिह्विकां॥ सकुंतपक्षसंयुक्तवाणकर्णविभूषितां॥ शिवाभि
र्घोररूपाभिः सेवितां प्रणयोदितां॥ चंडेश्वचंदनाद्यैश्च चंडास्यैश्चैव भैरवैः॥ गृहीतनरकंकालैर्जयशब्दपरायणैः॥ सेविता खिलसि
द्धौघैः सिद्धिभिः सेवितां परां॥ एवं तां कालिकां ध्यात्वा पूजयेत्कुलनायकः॥ विना परंपरावेशाविवरांतः प्रसर्पिणी॥ यत्किंचित्कुलसि

द्धिस्तु जायते नमनागपि॥ सर्वसिद्धिप्रदा देवि हेलया पि हि चिंतिता॥ अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते॥ सिद्धेश्वरतंत्रे च॥
ध्यानं शृणु वरारोहे साधकानां च दुर्लभं॥ शवासनस्थां महाभीमां घोरदंष्ट्रां वरप्रदां॥ मुक्तकेशीं ललज्जिह्वां पिबंतीं रुधिरं मुहुः॥ चतु
र्बाहुयुतां देवीं वराभयकरां स्मरेत्॥ पुरश्चरणं तु लक्षसंख्यो जपः कार्यः॥ तदुक्तं तत्रैव॥ एवं ध्यात्वा जपेन् मंत्रं लक्षमेकं विधानतः॥ त
द्दशांशविभागेन होमकर्मादिकं स्मृतं॥ पूर्वोक्तमंत्रराजस्य जपमेकं वरानने॥ अथान्यत् संप्रवक्ष्यामि कालिकामंत्रमुत्तमं॥ येन विज्ञानमा
त्रेण जीवन्मुक्तस्तु साधकः॥ स्फुरद्वानूर्ध्वं महाकाली शिवादिस्वरसंयुतां॥ चंद्रार्धबिंदुना क्रांतां तत्सरोज्वलनाक्षरः॥ नादबिंदुकला
सार्धं महामाया चितः प्रिये॥ इंद्राग्निदविवानाथो भवेत्तूर्यस्वरान्वितः॥ कलाबिंदुसमायुक्तः कथितः कामदः प्रिये॥ गोपनीयं च प्रयत्ने
न न देयं यस्य कस्यचित्॥ गुरुभक्ताय शिष्याय तापदद्याद्दांताय चैव हि॥ ध्यानपूजादिकं देवि सर्वं पूर्ववदाचरेत्॥ एकलक्षेण सिद्धिः स्या
त्पुरश्चरणकर्मणि॥ प्रकारांतरं तदुक्तं काली तंत्रे॥ अथातः संप्रवक्ष्यामि मंत्रं कल्पद्रुमं परं॥ येन जप्तेन विधिवत् सिद्ध्यो ष्ठे भवंति
हि॥ यस्याः स्मरणमात्रेण पलायंते महापदः॥ यस्याः स्मरणमात्रेण वाचा सिद्धिः प्रजायते॥ भजनादमरत्वं च लभेभुक्तिं चतुर्विधां॥
यजेपंतिपरां देवि नित्यमंतु संस्थिता॥ देवाः सर्वे नमस्यंति किं पुनर्मानवादयः॥ बृहस्पतिसमो वाग्मी धने धनपतिर्भवेत्॥ कामतुल्य
श्च नारीणां रिपूणां शमनोपमः॥ तस्याः पादांबुजद्वंद्वं राज्ञां किरीटभूषणं॥ तस्या भूतिविलोकेन कुबेरोपि तिरस्कृतः॥ य एनां पूजये
द्देवीं नियतं पितृकानने॥ तस्य चाज्ञाकराः सर्वे सिद्धयो ष्टौ भवंति हि॥ तस्यैव जननी धन्या पिता तस्य सुरोत्तमः॥ संप्रदायविदां वक्तायए
नं वेत्ति तत्वतः॥ अस्या विज्ञानमात्रेण कुलकोटिसमुद्धरेत्॥ नंदंति पितरः सर्वे गाथा गायंति ते मुदा॥ अपि धन्यः कुले कश्चित् कुल
ज्ञानी भविष्यति॥ स धन्यः स च विज्ञानी स कविः स च पंडितः॥ स कुलीनः स सुकृती स वशी स च साधकः॥ स ब्राह्मणो त्रिणः सर्वदशः ६२
स च श्रोत्री स दीक्षितः॥ स तीर्थसेवी पीठानां स निवासी च सर्वदा॥ स सोमपायी स व्रती स शांतः स परं तपाः॥ स संन्यासी स योगी च

समुक्तः स च ब्रह्मवित्॥ स वैष्णवः स शैवस्स शाक्तः स च गाणपः॥ स च विज्ञानवेत्ता च य एनां वेत्ति तत्वतः॥ तस्मात् सर्वप्रयत्नेन
सर्वावस्थासु सर्वदा॥ स्मांज्ञात्वा यजेन्मंत्री सुरवं मोक्षमवाप्नुयात्॥ विज्ञारत्नं प्रवक्ष्यामि श्रुत्वा कर्णवतंसय॥ यामाद्ये ह्रंक्रूर्चयु
ग्ममेवं द्वांतं मादनत्रयं॥ मायाबिंदीश्वरयुतं दक्षिणकालिकेपदं॥ संहारक्रमयोगेन बीजसप्तकमुद्धरेत्॥ एकविंशत्यक्षरोद्य
स्तारादिः कालिकामनुः॥ पूर्वोक्तमंत्रवत् कुर्यात् सर्वापूजां विचक्षणः॥ भैरवतंत्रे॥ मायाद्वंद्वं कूर्चयुग्ममेवं द्वांतं मादनत्रयं॥ माया
बिंदीश्वरयुतं दक्षिणे कालिकेपदं॥ संहारक्रमयोगेन बीजसप्तकमुच्चरेत्॥ एकविंशत्यक्षरोयं ताराद्यो विश्वपूजितः॥ आका
शं वामकर्णेंदुयुतं बिंदुविभूषितं॥ चतुर्थबीजमाख्यातं त्रैलोक्यवशकारकं॥ स्वाहांतश्च त्रयो विंशदक्षरो मंत्रराजकः॥ स्वा
हां विनैकविंशत्यक्षरः कामदो मनुः॥ विंशत्यर्णा महाविद्या स्वाहाप्रणववर्जिता॥ ध्यानपूजादिकं सर्वं दक्षिणावदुपाचरेत्॥
सारस्वततंत्रे॥ शृणु देवि प्रवक्ष्यामि कालिकाविधिमुत्तमं॥ मायाद्वयं कूर्चयुग्ममेवं द्वांतं मादनत्रयं॥ मायाबिंदीश्वरयुतं दक्षि
णकालिकेपदं॥ संहारक्रमयोगेन बीजसप्तकमुच्चरेत्॥ द्वाविंशत्यक्षरी विद्या वाक्जायान्विता शुभा॥ कालिकेयं महाविद्या
सिद्धिदा भुवनत्रये॥ मायाबीजैः षडंगानि महादेव्याः प्रकल्पयेत्॥ भैरवोनुष्टुप् कालिका च ऋषिश्छंदश्च देवतेति॥ अथान्यः
प्रकारः तदुक्तं काली तंत्रे॥ अथ वक्ष्ये महाविद्यां सिद्धाद्यां च महोदयां॥ ईश्वरेण पुराप्रोक्तां देवी हृदयसंस्थितां॥ यस्य ज्ञान
प्रभावेन कल्पयामि जगत्त्रयं॥ प्रणवं पूर्वमुच्चार्य हल्लेखाबीजमुद्धरेत्॥ रतिबीजं समुद्धृत्य पंचमकारं च भगान्वितं॥ ठद्वयेन
समायुक्ता विज्ञाराज्ञी प्रकीर्तिता॥ अनयास्सदृशी विद्या काली तंत्रेषु दुर्लभा॥ भैरवोस्य ऋषिः प्रोक्तो विराट्छंद उदाहृतं॥
सिद्धकाली ब्रह्मरूपा देवता भुवनेश्वरी॥ रतिबीजं बीजमस्या हल्लेखा शक्तिरुच्यते॥ हल्लेखा षड्दीर्घेण प्रणवाद्येन कल्पयेत्॥

आ षडंकृततोन्यस्य ध्यात्वा देवीं शिवो भवेत्॥ खङ्गोर्द्धेन्दुबिंबसवरसृतरसा प्लाविताङ्गी त्रिनेत्रा सव्ये पाणौ कपालोज्ज्वल
स्रजमथो मुक्तकेशी पिबंती॥ दिग्वस्त्रा बद्धकांची मणिमयमुकुटाद्यैर्युता दीप्तजिह्वा पायात्री लोत्पलाभा रविशशि विलसत्कुं
डलाली टपादा॥ जपेद्विंशतिसाहस्र्यं सहस्रैकेन संयुतं॥ होमयेत्तद्दशांशेन मृदुपुष्पेण मंत्रवित्॥ त्रिकोणकुंडमासाद्य सिद्धवि
धः शिवो भवेत्॥ पूजनं च प्रयोगं च दक्षिणावदुपाचरेत्॥ एकाक्षर्या महाकाल्याः समानं सर्वमेव वा॥ रक्तपुष्पस्य होमेन सार्वद्वेश्र
वणो भवेत्॥ बिल्वपत्रस्य होमेन राज्यं भवति निश्चितं॥ रक्तप्रसूनहोमेन वशयेदखिलं जगत्॥ पीतपुष्पस्य होमेन स्तंभयेद्वायुमप्य
थ॥ मालती पुष्पहोमेन साक्षाद्वाक्पतिसंनिभः॥ कृष्णपुष्पस्य होमेन शत्रुं मारयते चिरात्॥ अस्य सर्वस्य होमस्य संख्या स्या
दयुतावधि॥ अस्याः स्मरणमात्रेण महापातककोटयः॥ सद्यः प्रलयमायांति साधकः खेचरो भवेत्॥ अथ प्रकारांतरमंत्रं तदु
क्तं स्वतंत्रे॥ श्मशानकालिकामंत्रं शृणु धावहिता शिवे॥ वाणी मायां ततो लक्ष्मी कामबीजं ततः परं॥ कालिके संपुटत्वेन चतु
र्थं बीजमालिखेत्॥ एकादशार्णा देवेशि चतुर्वर्गप्रदायिनी॥ ऋषिर्भृगुर्विराट् छंदो देवता कालिका परा॥ श्मशाना याच वा
ड्नायि बीजं शक्ती महेश्वरी॥ कीलकं कामबीजं तु शृणु पूजाविधिं प्रिये॥ चतुरास्त्रिचतुर्णैस्तु विद्याः मंत्रैः षडंगकं॥ विन्यस्य
ध्यानं कुर्वीत कालिकायाः समाहितः॥ अंजनाद्रिनिभां देवीं श्मशानालयवासिनीं॥ त्रिनेत्रां मुक्तकेशीं च शुष्कमांसातिभी
षणां॥ पिंगाक्षीं वामहस्तेन द्रव्यपूर्णं कपालकं॥ सद्यश्छिन्नशिरो दक्षहस्तेन दधतीं शिवां॥ स्मितवक्त्रां सदा चाममांसचर्व ६३
णतत्परां॥ नानालंकारभूषांगीं नग्नां मत्तां सदासवैः॥ एवं ध्यात्वा यजेद्देवीं श्मशाने तु विशेषतः॥ गृहे वापि गृहस्थश्च ममत्स्यैर्मां
सैः सुभोजनैः॥ नग्नो भूत्वा महापूजां कुर्याद्रात्रौ समाहितः॥ षट्स्वं वाष्टदलं यंत्रं तद्वाह्ये धरणीतलं॥ चतुर्द्वारसमायुक्तं मध्ये मूलं

समालिखेत्॥ दले ष्वष्टासु विलिखेत्कवर्गादष्टवर्गकं॥ धरण्यां विलिखेदाद्यं चतुष्कं च चतुष्ककं॥ पूर्वादि उत्तरांतायां मध्ये देवीं प्रपूजयेत्॥ ब्राह्म्या
द्याः पूजयेन्मातृः दलेष्वष्टासु सर्वतः॥ भैरवान सितांगाद्यान् धरण्यां पूजयेत्प्रिये॥ अथ पुरश्चरणजपनिर्णयः तदुक्तं स्वतंत्रे॥ वर्णलक्षं जपेन्मंत्रं तद्दशां
शेन होमयेत्॥ वर्णलक्षं मंत्रवर्णसंख्यालक्षजपमित्यर्थः॥ रजस्वलां स्त्रियं गत्वा रेतोरुधिरसंस्थितं॥ द्रव्यं चाष्टविधं मांसं मत्स्यं बहुविधं प्रिये॥ नि
वेद्य चात्मसत्कृत्वा कालीभक्तिपरायणः॥ तदा भागं चुमा संवनभतेन्नात्र संशयः॥ अथ मंत्रांतरं तदुक्तं तत्रैव॥ कामबीजं समालिख्य कालिकाये
पदं ततः॥ नमो नेन वदेवेशि सप्ताणो मनुरुत्तमः॥ सर्वांगे कालिकां देवीं अर्चयेत्सर्वं तु पूर्ववत्॥ श्री गुरोः कृपया लब्धा सर्वसिद्धिं समाप्नुयात्॥ प्रकारां
तरं॥ तत्त्वविमर्षिण्यां॥ ब्रह्मा वह्नि समारूढ स्त्रिगुणीकृतविग्रहः॥ वामनेत्रेण संयुक्तो नादबिंदुसमन्वितः॥ कूर्चयुग्मं शिवायुग्मं दक्षिणा कालिकात
तः॥ प्रागुक्तवद्वह्निजायादक्षिणाया द्विविंशतिः॥ तत्रैव॥ त्रयोदशी द्वादशी च दशम्येकादशी तथा॥ एताः प्रशस्ता स्तिथयो दीक्षाकर्मसु कर्मिणां॥ षष्ठी
चैव नवमी चैव अधमा परिकीर्तिता॥ कृष्णाष्टम्यां चतुर्दश्यां दीक्षा कार्या शुभप्रदा॥ ॥ इति श्री श्यामारहस्ये मंत्रभेदविचारणं नाम षष्ठः परिच्छेदः
॥६॥ ॥ अथ विद्यामहात्म्यं तदुक्तं काली तंत्रे॥ एवं समस्तविद्यानां राज्ञी स्तोतुं न शक्यते॥ वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि॥ सर्वसिद्धि
प्रदा भूमिरनिरुद्धसरस्वती॥ तस्मादस्या ज्ञानमात्रात् सिद्धयः संभवंति हि॥ अनिरुद्धसरस्वत्या ज्ञानमात्रेण साधकः॥ पांडित्यं च कवित्वं च वागीश
समतां व्रजेत्॥ अस्य पांडित्य वैदग्ध्य विचित्रपदकल्पनैः॥ देवा अपि विलज्जंते किं पुनर्मानुषादयः॥ यदि चेत्वत्समानारी मत्समः पुरुषोस्ति चेत्॥
अनिरुद्धसरस्वत्याः समो मंत्रोस्ति वै तदा॥ अस्या जपो मंत्रजपो ज्ञानमस्यात्मचिंतनं॥ योगसंधारणा सम्यग्ध्यानमस्यान संशयः॥ महापदि महा
पापे महाग्रहनिवारणे॥ महाभये महोत्पाते महाशोके महोत्सवे॥ महामोहे महोत्से स्वमहादारिद्र्यसंकटे॥ महावश्ये महाशून्ये महाज्ञाने महारणे॥
दुःस्वप्ने दुरवासे दुर्भिक्षे दुर्निमित्तके॥ समस्तक्लेशसंघाते स्मरणादेव नाशयेत्॥ अस्या ज्ञानं महाज्ञानं ध्यानमस्यात्मदर्शनं॥ तस्मादस्याः समो वि
धानास्ति तंत्रेन संशयः॥ श्मशाने शयने वीरः कुलस्त्रीभिर्विहारमान्॥ कुलामृतनिषेवी च कालीतत्त्वार्थकोविदः॥ अस्मादिभुवने तस्य समो नास्ति न
रोपरः॥ स एव सुकृती लोके स एव कुलभूषणं॥ धन्या च जननी तस्य येन देवी समर्पिता॥ ध्यानेन मीननाथश्च तेजसा भास्करोपमः॥ बलेन पवनोद्य

श्या॰र॰
६४

षयेनदेवी समर्पिता॥ वक्त्रे सरस्वती तस्य लक्ष्मीस्तस्या सदागृहे॥ तीर्थानि देहे सर्वाणि संति येन देवी समर्चिता॥ गानेतु तुंबरुः साक्षाद्दानेन वा सर्वोप
मः॥ रत्नत्रियसमो ज्ञानी येन देवी समर्चिता॥ वह्निरिव रिपोर्हंता गांगेव मलनाशकः॥ शुचौ शुचिः समः साक्षादिंदुरिव सुखप्रदा॥ पितृदे
वसमः शास्ता कालवद्दुरासदः॥ वारीशवद्गंभीरो निर्ऋतिरिव दुर्धरः॥ बृहस्पतिसमो वक्ता भरणी सदृशः क्षमी॥ कंदर्पसदृशः स्त्रीषु येन
देवी समर्चिता॥ अहो भाग्यमहो लोके कुलज्ञानपरायणः॥ तेषां मध्ये च यः कोपि काली साधनतत्परः॥ त्यज सिलपरं चैव पुमांसं परमं तथा॥
मादृशं च कचित्काले प्रधानं परमेश्वरि॥ काली ज्ञानी नमा साधन नत्सप क्षिकदाचन॥ नहि काली समा पूजा नहि काली समं फलं॥ नहि काली
समं ज्ञानं नहि काली समं तपः॥ ये गुणाः परमेशस्य पंचकस्य विधानतः॥ ते गुणाः संति सर्वज्ञे काली तत्ले खनान्यथा॥ कालिका हृदये ज्ञानी
लतासाधनतत्परः॥ देववन्मानुषो भूत्वा लभेन्मुक्तिं चतुर्विधां॥ इति के कथितं सर्वं कालिकातत्वमुत्तमं॥ अनेन सम्यगाख्याय सर्वकर्मफ
लं लभेत॥ ॥इतिश्री पूर्णानंदगिरिपरमहंसविरचिते श्यामारहस्ये विद्यामाहात्म्यकथनं नाम सप्तमः परिच्छेदः॥ ७॥ ॥न्यासं
विना भवेन्मूकः सप्तस्वारासनं विना॥ पद्धवेन विना मंत्रो न ग्रः सपरिकीर्तिता॥ शिरोहीनो मृतः प्रोक्तो रथा मंत्रो गुरुं विना॥ हेतोरत्तो यो नि
वीर्यश्चाधिकाक्षरः॥ अंतस्येन बीजेन व्याप्तः कीलित उच्यते॥ यस्य जाप्यं शृणो त्यन्य स्तमंत्र शून्य उच्यते॥ ऋषिदैवच्छंदोभिः परित्यक्तो भु
जंगमः॥ इति दूषणानि॥ अथ कुलीनानामाचारांतरं॥ तदुक्तं कुलकौलिकतंत्रे॥ शृणु देवि प्रवक्ष्यामि कुलीनाचरणं तथा॥ पानभ्रांतिर्भवे
त्तस्य शृणा स्याद्दक्षरेतसोः॥ शुद्धो वाशुद्धता भ्रांतिः पापशंका च मैथुने॥ सभ्रष्टः पूजयेद्देवी चंडीमंत्रं कथं जपन्॥ रोगी दुःखी भवेद्देवि
रौरवं नरकं व्रजेत्॥ पंचमाच परंनास्ति शिवा कामांसुखमोक्षयोः॥ भगत्रूपा च या देवी रेतः श्रीतासदानघे॥ रेतसा तर्पणं तस्या मंधे मोसैः सह
प्रिये॥ केवलैः पंचमैर्देवी सिद्धो भवति साधकः॥ ध्यात्वा कुंडलिनीं देवीं रमत्रेतो विमुंचयेत्॥ अमंत्रा च यदा नारी बालायत्नात्तु लभ्यते॥ ६४
आत्मदेहस्वरूपेण तत्कर्णे मंत्रमुच्चरेत्॥ तदा सा शक्तिरूपा स्याद्भुक्तिमुक्तिप्रदायिनी॥ रंभावत्सुर्वशी मुख्या नारी यागगने भुवि॥ पाले तोत्रा

स्थिता या च तस्या नाथस्य कौलिकः॥ तत्रापि वर्जयानार्यो तासां शृणु विधिं प्रिये॥ गुरुरेव शिवः साक्षात्तत्पत्नी तत्स्वरूपिणी॥ मनसा कर्मणा वा
चा रमणं तत्र वर्जयेत्॥ तस्या एव पदे भक्तो भुक्तिमुक्तिपरां भजेत्॥ गुरुस्नुषा स्वपुत्री चैव तथा च मंत्रपुत्रिका॥ एतस्या भरणं वर्ज्यं ब्रह्मघ्नमानसेन च॥
कौलिकस्य च पत्नी या सा सा साक्षादीश्वरी शिवे॥ तस्यारमणमात्रेण कौलिको नारकी भवेत्॥ भाति वगोरवात्सूज्या अन्यायाविहिता स्त्रिया॥ हृती
यागे च कर्तव्यो विचारो मंत्रवित्तमैः॥ अन्यथा न विचारेण देवीशापः प्रजायते॥ शिव ही नाचया शक्ति ईरांतापरिवर्जयेत्॥ अभिषेकाद्द्विवृद्धिर्मे
त्तस्या चारणाद्भुतं॥ पंचमेन तु देवेशि सर्वपापैः प्रमुच्यते॥ केवलेनाद्ययोगेन साधको भैरवो भवेत्॥ द्वितीयेन महेशानि पूजको ब्रह्मरूपभाक्॥
केवलेन तृतीयेन महाभैरवतां व्रजेत्॥ चतुर्थेन तु तत्वेन भुवि भूज्येकनायकः॥ परेच समतां याति मम तुल्यः परेश्वरि॥ पंचमेन भवेद्योगी सर्वसि
द्धिपरायणः॥ इतीदं कथितं देवि सुगोप्यं प्रयत्नतः॥ न देयं पाशवे देवि कुलनिंदापराय च॥ कुलार्णवे॥ कुलाचाररहं गत्वा भक्त्या पापविशु
द्धये॥ याचयेदमृतं ज्ञानं तदभावे जलं पिबेत्॥ कुलाचारेण यच्छेत्कामादत्तं पात्रं तु भक्तितः॥ तं नमस्कृत्य संगृह्य यादन्यथा नरकं व्रजेत्॥ अन्य
त्रापि॥ स्थानकालं गमये द्यूतक्रीडादिना सुधीः॥ गमयेद्देवतापूजाजपयागस्तवादिना॥ गुरोः कृपालापकथा स्तोत्रागमविलोकनैः॥ गमयेद
निशं कालं न वदेत्स्यरदूषणं॥ प्रत्यक्षे वा परोक्षे वा प्रत्यहं प्रणमेद्गुरुं॥ गुरोरग्रे पृथक्पूजामद्वैतं च परित्यजेत्॥ दीक्षा व्याख्या प्रभुत्वं च गुरोरग्रे
न कारयेत्॥ गुरोः शय्यासनं पीठं पादुकोपानहौ तथा॥ स्नानादिकं तथा छायां लंघयेन्न कदाचन॥ श्रीगुरुं कुलशास्त्राणि पूजास्थानानि यानि
च॥ भक्त्या श्रीपूर्वकं देवि प्रणम्य परिकीर्तयेत्॥ गुरुं नाम्नां न भाषेत जपकालादृते प्रिये॥ श्रीनाथ देव स्वामीति विवादे साधने वदेत्॥ उत्पा
दक ब्रह्मदातुर्गरीयान्ब्रह्मदः पिता॥ तस्मान्मन्येत सततं पितुरप्यधिकं गुरुं॥ कुलाचारं गुरुं देवं मनसापि न निंदयेत्॥ कुलस्त्रीं वीरनिं
दां च वर्जयेन्मतिमान्सदा॥ अंतः शाक्ताः बहिः शैवाः सभायां वैष्णवा मताः॥ नानारूपधराः कौला विचरंति महीतले॥ लिंगागमे च॥ गुरूणा लि
कितः शिष्यस्त्वन्निषिद्धा सर्वं त्यजेत्॥ गुरूणा सदसद्वापि यदुक्तं तन्न लंघयेत्॥ स्वसमैथुनं मिथ्या यो वदेद्गुरुमंदिरे॥ स याति नरके घोरे भैरवेन

श्या॰र॰ तिभाषितं॥ संक्रांतिंनवमीं पूर्णांचाष्टमीं चचतुर्दशीं॥ एकादशीं व्रती पातकर्मलोपंन कारयेत्॥ तत्वहीनं कृतं कर्मजपकर्मच निष्फलं॥ शांभ
६५ वी कुप्यतेतस्मै ब्रह्महत्यापदेपदे॥ भावचूडामणौ॥ एकाकी निर्जनेदेशे श्मशाने निर्जनेवने॥ शून्यागारेनदीतीरेनिःसंगो विहरेन्मुदा॥ वीराणां
जपकालस्तु सर्वकालः प्रशस्यते॥ सर्वदेशे सर्वपीठेकर्तव्यं नात्र संशयः॥ अन्यच्चोक्तं तत्रैव॥ स्वकुलांतपुरश्चर्या कार्या रात्रौ नचान्यथा॥ वेदहीन
द्विजे दिवियथा श्रुतिस्क्रियामता॥ विष्णुभक्तिं विनादेविभक्तिर्भ्रष्टाभवेद्यथा॥ शाक्तज्ञानं विनामुक्तिर्यथाहास्यायकल्पते॥ गुरुं विनातथातंत्रेना
नीस्तुतिः॥ ॥ अथकवचं॥ ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यतरंशुभं॥ कवचंतुमहादेव्याः सर्वपापप्रणाशनं॥ अक्षोभ्य
ऋषिरेतस्यबृहती छंदईरितं॥ देवताचसमुद्दिष्टाश्रीमहिषमर्द्दिनी॥ ॐ ऋषिःशीर्षेसदापातुछंदोमुखेसदावतु॥ मोहिनीनासिकायां
चनेत्रयुग्मेमहांकुशा॥ खङ्गिनीकर्णयुग्मेचब्रह्माणीगंडयुग्मके॥ करोमाहेश्वरीपातुकौमारीबाहुयुग्मके॥ ईंद्राणीकूर्परेपातुवाराही

मणिबंधके॥ हृदयेनारसिंहीचचामुंडाउदरेवतु॥ चंडिकानाभिदेशेचसंकर्षणपातुलिंगके॥ उत्कटाउरुदेशेचविकराजंघयुग्मके॥ उ
ड्डापादप्रदेशेचभयत्तलप्रदेशके॥ उड्डायकेशदेशेचसंहारिकाचरोमसु॥ सर्वांगेसर्वदापातुश्रीमन्महिषमर्दिनी॥ इतीदंकवचंदे
वीत्रिषुलोकेषुदुर्लभं॥ तवस्नेहान्मयाख्यातंनाख्येयंयस्यकस्यचित्॥ कृपणायनास्तिकायनिंदकायविशेषतः॥ यद्दद्यात्त्रि
षुदुःखतदाहंवरकारिणी॥ दद्याच्छिष्यायभक्तायगुरुभक्तियुतायच॥ त्रिसंध्यमेकसंध्यंवायःपठेत्प्रयतात्मवान्॥ सर्वान्सलभ
तेकामानंतेदेविपुरंव्रजेत्॥ धारयेद्वाशिरःकंठेबाहौवायदिसाधकः॥ तदासर्वार्थसिद्धिःस्यान्नात्रकार्याविचारणा॥ भूतप्रे
तपिशाचानांनभयंतस्यविद्यते॥ जलेवाचानलेवापिश्मशानेदुर्गमेगिरौ॥ नभयंजायतेतस्यासिद्धिर्भवतिनिश्चितं॥ ॥
इतिभैरवतंत्रोक्तंकवचं॥ ॥ इतित्रयोदशपरिच्छेदः॥ १३॥ ॥ अथनीलक्रमः॥ तदुक्तंनीलक्रमे॥ देव्युवाच॥ म
हादेवक्रमंदेवस्यचितंनप्रकाशितं॥ कथयस्वमहादेवसर्वसिद्धिप्रदंमहत्॥ भैरवउवाच॥ सर्वसिद्धिप्रदंसाक्षात्सर्वदेवनमस्कृ
तं॥ सर्वपापहरंदिव्यंसर्वरोगविनाशनं॥ ब्रह्मविष्णुशिवादीनांदिक्पालानांचभाविनी॥ भैरवाणांचसर्वेषांगंधर्वाणांचयोगिनां॥
शश्वत्सिद्धिप्रदंदेविसर्वेषामालयंमहत्॥ नान्यात्सिद्धिप्रदंदेविवीरसाधनवर्जितं॥ महाबलोमहाबुद्धिर्महासाहसिकःशुचिः॥
महास्वार्थीमहावांश्चसर्वभूतहितेरतः॥ तेषांकृतेमहादेविकथितंनीलसाधनं॥ अष्टम्यांच्चचतुर्दश्यांपक्षयोरुभयोरपि॥ कृ
ष्णपक्षेविशेषेणसाधयेदनयाहितं॥ भौमवारेतमिस्रायांयामेयातेचभाविनी॥ यामार्द्धाभ्यंतरंसम्यक्पूजोपकरणंबलिं॥
सामिषान्नंगुडंछागंसुरापिष्टकपायसं॥ नानाफलंचनैवेद्यंस्वस्वकल्पोक्तभाषितं॥ वितास्थानेसमानीयसुहृद्भिःशस्त्रपा
णिभिः॥ समानगुणसंपन्नैःसाधकावीतभीःस्वयं॥ पुनर्द्वारेचतुर्दिक्षुदेवताध्यानतत्परः॥ भीतश्चेत्साधकस्तत्रचतुर्दिक्षुच
साधकाः॥ नोचेत्स्वयंकेवलोसौभैरवःपरिकीर्तितः॥ वस्त्रालंकारभूषाद्यैःभूषितःसर्वसंमुखः॥ अस्त्रांतमूलमंत्रेणप्रोक्ष

योयोगभूमिषु॥ गुरुपादरजो ध्यात्वा गणेशं बटुकं ततः॥ योगिनी मातृका श्चैव वामपादपुरःसरं॥ ये चात्र संस्थिता देवा राक्षसाश्च
भयानकाः॥ पिशाचाः सिद्धयक्षाश्च गंधर्वाः ग्सरसां गणाः॥ योगिन्यो मातरो भूताः सर्वाश्च खेचरस्त्रियः॥ सिद्धिदास्ता भवंत्वत्र
तथा च मम रक्षकाः॥ प्रणम्य मनुमानेन पुष्पांजलित्रयं क्षिपेत्॥ विहितशवमाह भावचूडामणौ॥ यष्टिविद्धं शूलविद्धं खड्गविद्धं पयो
मृतं॥ रज्जुबद्धं सर्पदष्टं चांडालं वाभिभूतकं॥ तरुणं सुंदरं शूरं रणे नष्टं समुज्वलं॥ पलायनविशून्यं च संमुखरणवर्तिनं॥ एवं शवं
समानीय साधयेत्साधकोत्तमः॥ वीरतंत्रे॥ यष्टिप्रभ्यत्यस्त्रभिन्नं शूलविद्धं पयामृतं॥ शवमानीय कर्तव्यं नाहरेत्स्वेच्छया मृतं॥ ऊ
र्ध्वं द्विवर्षाद्यदि वाविरागं तरुणं यदि॥ सप्तमाष्टमग भैरयगभंजं यदि वा शवं॥ चांडालाद्यभिभूतं वा शीघ्रं सिद्धिफलप्रदं॥ सर्वे
षीजीवहीनानां जंतूनां वीरसाधने॥ महाशवाः प्रशस्ताः स्युर्महामंत्रस्य साधने॥ क्षुद्रप्रयोगकर्तॄणां सर्वे षां विहिताः सदा॥ वर्ज्या
श्च कालीतंत्रे॥ ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनं॥ वीरतंत्रेपि॥ वेश्यापतिता स्पृश्यामेध्यवर्ज्यं हतं नरं॥ अव्यक्तलिंगं कुष्टं
च इतरं शवमाहरेत्॥ भावचूडामणौ॥ स्वेच्छामृतं द्विवर्षं च वृद्धं स्त्रियं द्विजं तथा॥ अश्वभावमृतं कुष्टं सप्तरात्रोर्धकं तथा॥ एवं चा
ष्टशवं त्यक्त्वा पूर्वोक्तं शवमाहरेत्॥ स्थानमाह वीरतंत्रे॥ शून्यागारे नदीतीरे पर्वते विजने थवा॥ बिल्वमूले श्मशाने वा तत्समीप
रणस्थले॥ चितासाधनं तल्लक्षणमाह नीलतंत्रे॥ असंस्कृता चिता ग्राह्या न च संस्कारसंस्कृता॥ प्रक्षालिता यदि भवेत्कारयेद
स्तिरसं चयं॥ चांडालादिषु संप्राप्ता केवलं शीघ्रसिद्धिदा॥ प्रकारमाह तत्रैव॥ पूर्वादिदिक्चतुष्के च बलिं दद्याद्यथाविधिः॥ श्म
शानाधिपतिं पश्चाद्भैरवं कालभैरवं॥ महाकालं यजेद्यत्नात्पूर्वादि दिक्चतुष्टये॥ पाद्यादिभिश्च मंत्रज्ञो बलिं पश्चान्निवेदयेत्॥
शस्त्रबीजं ततः पश्चाच्छ्मशानाधिप इत्यपि॥ इमं मंते सामिषान्नं बलिं गृह्ण पदं ततः॥ गृह्ण गृह्ण पयद्वंद्वं विघ्ननिवारणं ततः॥ कु
रु सिद्धिं मतो मे त्वं प्रयच्छ स्वाहयान्वितं॥ प्रणवाद्येन मनुना प्रथमो बलिरीरितः॥ मायांतं भैरवात्पश्चाद्भयानक ततः परं॥ पूर्ववं ७१

द्वलिमुद्धृत्य दक्षिणे बलिमाहरेत्॥ क्रमंते च महाकालात्पश्चात्पूर्ववदुद्धरेत्॥ पश्चिमे कालदेवाय प्रणवाद्येन कल्पयेत्॥ शब्दांते काल
शब्दांते भैरवेति ततः परं॥ श्मशानाधिपतिइत्येवं पूर्ववच्चतमुद्धरेत्॥ चितामध्ये ततो दद्याद्बलित्रयमनुत्तमं॥ कालरात्रि महाकालि
कालिके घोरनिस्वने॥ गृहाणेमं बलिं मातर्देहि सिद्धिमनुत्तमं॥ कालिकायै बलिं दत्वा भूतनाथाय दापयेत्॥ शब्दांते भूतनाथांते श्मशा
नाधिपइत्यपि॥ प्रणवाद्येन मनुना दापयेद्बलिमुत्तमं॥ ॐ शब्दांते सर्वगणनाथांते चाधिपेति च॥ श्मशानमस्तके दत्वा पूर्ववच्च समुद्धरे
त्॥ ताराद्येन बलिं दत्वा पंचगव्येन सुंदरि॥ अद्भिः संप्रोक्षणं कृत्वापि ठं वस्त्रे लिखेत्ततः॥ भूर्जे वा वटपत्रे वा तत्रापि ठं मनुं न्यसेत्॥ पीठ
मास्तीर्य तस्मिन्वै वह्नी रासनं ततः॥ वीराईनेन मनुना रक्षां दिक्षु प्रकल्पयेत्॥ कूर्चयुग्मं ततो देवि मायायुग्मं ततः परं॥ कालिके घोर
दंष्ट्रे च प्रचंडे चंडनायिके॥ दानवान्दारय त्युक्त्वा हनेति द्वितयं ततः॥ शवशरीरमहाविघ्नं छेदयद्वितयं ततः॥ द्विठांतो वर्मशस्त्रांतो वी
राईनमनुर्मतः॥ अनेन मंत्रितं लोष्टं दशदिक्षु विनिःक्षिपेत्॥ तन्मध्ये भैरवा देवा न विघ्नैः परिभूयते॥ यदि भ्रमा हाई वे शिसाधको भय
विह्वलः॥ तवस्ते सेसुहद्द्युगैरक्षितो नाभिभूयते॥ अर्के डु सितवा यालतूले निर्मितवर्तिकं॥ प्रदीपं तत्र संस्थाप्य अस्त्रं तत्र प्रपूजयेत्॥
हतं तस्मिन्महादीपविघ्नैश्च परिभूयते॥ तदधस्थास्त्रमंत्रेण निरवने कुलदीपकं॥ तत्तत्कल्पविधानेन भूतशुध्यादिकं चरेत्॥ षोढा
वा तारकं वापि विन्यस्य पूजयेत्ततः॥ मंत्रध्यानपरो भूत्वा जपेन्मंत्रमनन्यधीः॥ एकाक्षरी यदि भवेद्दिक्सहस्रं ततो जपेत्॥ द्व्यक्षरे
चाष्टसाहस्रं त्र्यक्षरे त्वयुतार्धकं॥ अतः परं तु मंत्रज्ञो गजांतकसहस्रकं॥ निशायां वा समारभ्य उदयांतं समारभेत्॥ अन्यत्रापि॥ त
तः पंचोपचारेण पुरतो देवतां यजेत्॥ निमीलयच्चक्षुषी पश्चाद्देवीं ध्यायन्मनुं जपेत्॥ यद्यसह्यभयं कर्णनेत्रे वस्त्रेण वेष्टयेत्॥ निमील्य
चक्षुषी पश्चाद्देवीं ध्यायन्मनुं जपेत्॥ ततो अर्धरात्रपर्यंतं यदि किंचिन्न लक्ष्यते॥ जयदुर्गाख्यमनुना तैनैव सर्षपान्क्षिपेत्॥ अथ ज
यदुर्गामंत्रो यथा॥ तदुक्तं रुद्रयामल्यसूक्ते॥ ताराद्दुर्गयुगं रक्षित तदातं सलोचनं॥ द्विठांता जयदुर्गेयं विद्यावद्यादशाक्षरी॥ ॐ तिलो

DR. BHAU DAJI

सिसोमदेवस्योगोसर्वेस्वपिकारकः॥पितृणांस्वर्गदातात्वंमयोनांममरक्षकः॥भूतप्रेतपिशाचानांविघ्नप्रशांतिकारकः॥इतिक्षिप्त्वाति
लान्नात्मचतुर्भागेशिवादितः॥ततःसप्तपदंगत्वापुनस्तत्रैवसंविशेत॥देवंतत्रापिसंपूज्यप्रजपेन्मनुमुत्तमं॥यदाबलिंप्रार्थयतेनरकुं
जरमेववा॥दिनांतरेप्रदास्यामिस्वीकृत्यस्वगृहंव्रजेत॥परेह्निवततादद्यात्पिष्टेननरकुंजरान्॥पृष्टेनतिपृवाऊवध्यान्याभवेनेत्यर्थः॥
तदुक्तंतंत्रांतरे॥यवक्षोदमयंचापिशालिक्षोदमयंतथा॥चंद्रहासेनविधिवत्तन्मंत्रेणघातयेत॥चंद्रहासेनअर्धचंद्राकृतिखड्गेनेत्यर्थः॥
नीलतंत्रेपि॥जपांतेतुबलिंदद्यात्पश्चादपिबलिंहरेत॥जपांतेजपमध्येवादेहिदेहीतिभाषते॥तदापिचबलिंदद्यान्महिषंछागमेववा॥नदि
क्षुविक्षणंकिंचिन्नचबंधुसमागमः॥जलादिदुर्गसर्पाणांगजानांदंष्ट्रिणांतथा॥पक्षिकीटपिशाचानांपद्महामनसिस्थितं॥तत्सर्वंस्वप्नवद्बु
ध्वाभयंयत्नेनवर्जयेत॥समाप्यसाधनंदेविदक्षिणाविभवावधि॥गुरवेगुरुपुत्रायतत्सत्यंवानिवेदयेत॥सम्यक्सिद्धेकमंत्रस्यनासाध्यंविद्य
तेक्वचित॥बकुलमंत्रवतःपुंसःकाकथाशिवएवसः॥अथश्मशानविशेषोलिख्यते॥तदुक्तंकुलसंभारे॥श्मशानालयमागत्यमुक्तकेशोदि
गंबरः॥जपेद्युतसंख्यंतुसर्वकामार्थसिद्धये॥तत्रैवप्रेतमारुह्यप्रजपन्मंत्रवित्तमः॥अयुतंमैथुनीभूत्वाविभीस्तत्परायणः॥सद्यातिपर
मांसिद्धिंदेवैरपिसुदुर्लभां॥आकर्षणंवशीकारमारणोच्चाटनादिकं॥स्तंभनंमोहनंचैवद्रावणंनाशनंतथा॥वाग्मित्वंचकवित्वंचबहुपुत्र
त्वमेवच॥बहुवल्लभतामेतिसर्वप्रियत्वमेवच॥सद्यातिखेचरत्वंचदेवत्वमपिचैवहि॥नजरानचमृत्युश्चनरोगानचघातनं॥नभीतिर्नचदुश्च
लंनचवाक्कायपातनं॥अथवासभवेन्नित्यंचतुर्विंशतिसिद्धियुक्॥स्वदेहरुधिरासिक्तैर्बिल्वपत्रैःसहस्रशः॥श्मशानेभ्यर्चयेद्देवींतुवा
गीशसमतांव्रजेत॥कालीतंत्रेपि॥महाचीनक्रमलतामज्ञाभिर्बिल्वपत्रकं॥सहस्रंदेविमभ्यर्च्यश्मशानेसाधकोत्तमः॥तदाराज्यमवाप्नो
तियद्दिनात्रभयायते॥सुवासितांतथाहृष्ट्वालक्षंजपतिभूमिपः॥निर्मलांचतथादृष्ट्वावश्यार्थमयुतंजपेत॥भैरवतंत्रेपि॥श्मशानेयोषितंमं
त्रीसंपूज्यकुतुगांशुभां॥रक्तचंदनदिग्धांगींरक्तवस्त्रैरलंकृतां॥तावत्पुष्पैर्मनुःप्रोच्यततोध्यायेच्चचंडिकां॥रमयित्वालभेद्राज्यंयद्दिनात्र
भयायते॥मेषमाहिषरक्तेनवाग्मित्वंतस्यजायते॥धनित्वंजायतेतस्यसर्वसिद्धिःप्रजायते॥वचसासभवेज्ज्ञानीवोधनेनचधनाधिपः॥अ १८

त्रयादेवराजोसौरूपेणैवमनोभवः॥बलेनपवनोह्येषसर्वतत्वार्थसाधकः॥साधितंसोचितंदद्यात्साक्षिमांसंसदाबलिं॥मूषमांसंछागमांसं
मेषंमाहिषमेववा॥सर्वसाक्षिप्रदातव्यंतथालोमसमन्वितं॥सनखंछिन्नजीर्णंवाकेशांसंमार्जनागतं॥निवेदयेच्छ्मशानेतुसर्वसिद्धिप्रदंभवे
त॥नारीरक्तयुतंकृत्वापर्णानांशतमुत्तमं॥प्रत्येकंप्रजपेन्मंत्रंततस्तद्धोमयेत्क्रमं॥युगानामयुतंदेविदक्षिणापूजितासवेत॥सर्वसिद्धिर्भवेत्त
स्यनाग्भीधीरश्वजायते॥नतस्यदुर्लभंकिंचित्पृथिव्यांदिविविद्यते॥कुलसंभारेच॥रेतोयुक्तेनमंत्रेणचार्कस्यैवसहस्रशः॥श्मशानेभ्यर्च्यका
लींतुसर्वसिद्धिंसविंदति॥धनवान्बलवान्वाग्मीसर्वयोषित्प्रियःसुखी॥जायतेनात्रसंदेहोमहाकालवचोयथा॥श्मशानेयोषितंवीर्यैर्म
त्रैस्त्र्यैःसहस्रशः॥रक्तचंदनदिग्धांगीरक्तपुष्पैरलंकृतां॥तावत्पुष्पैर्मनुंप्रोच्यततोध्यायेत्तुकालिकां॥ततोगत्वालभेद्राज्यंयद्दिसानभयायते॥
श्मशाननिलयंचैवशवासनगतःपुनः॥असकृच्चजपेन्मंत्रंसर्वसिद्धिप्रदोभवेत॥तर्पयेच्छवास्यंतुरक्तमांसादिभिस्तदा॥त्रिभिर्मंत्रमुद्रैर्धैर्वं
सर्वसिद्धिर्भवेत्ततः॥तर्पयेच्चपयोभिश्वरक्तधारायुतैरपि॥रेतोभिश्चतथातद्वत्स्वकीयेनकचेनवा॥मैथुनायितयोषायाःकुलप्रक्षालनेनच॥
मेषमाहिषरक्तेननररक्तेनचैवहि॥मूषमार्जाररक्तेनवाग्मित्वंतस्यजायते॥धनित्वंजायतेतस्यसर्वसिद्धिश्चजायते॥वचसाचभवेज्ज्ञीवोधने
नचधनाधिपः॥अथशवसाधनेबृहच्छ्रीक्रमसंहितायामपि॥नास्मात्परतरंकिंचित्सत्वरंसिद्धिदायकं॥सर्वसिद्धिर्भवेत्तस्यअहोरात्रात्कलौ
युगे॥द्वापरेतच्चमासेनत्रेतायांचायनेनच॥कृतेचदशभिर्वर्षैःसर्वसिद्धिर्नसंशयः॥अष्टम्यांचचतुर्दश्यांकुजवारेवाप्रथमप्रहराभ्यंतरेगुरुं
देवींचनत्वावीरवेशोयात्रांकुर्यात॥तदुक्तंतंत्रांतरे॥कटीबंधनवस्त्रेचमूलेनपरिधायच॥तद्वत्त्वेचपुनर्वस्त्रंमूलेनांगविलेपनं॥कृतोष्णीषश्च
मूलेनसिंदूरेणोर्ध्वपुंड्रकः॥इष्टदेवंगुरुंनत्वायात्राप्रहरमध्यतः॥कार्यावसाधकैःसार्धंहृदिमंत्रंपरामृशन्॥अक्षुधाभुक्तभोज्यस्तुयदिस्या
द्वीरसाधकः॥दिव्योवानपशुस्तत्रभुक्त्वासाधनमाचरेत॥अथसाधनस्थानंतदुक्तंभावचूडामणौ॥शून्यागारेनदीतीरेपर्वतेनिर्जनेतथा॥बि
ल्वमूलेश्मशानेवा।तत्समेपरणस्थले॥अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोरपि॥भौमवारेतमिस्रायांसाधयेत्सिद्धिमुत्तमं॥उपचारांस

मादायकुलामृतरसं तथा॥ गुडार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च॥ गौडी नेया क्षत्रियेण माध्वी वैश्येन तत्र वै॥ कदलीमधुसंमिश्र शालतकरसेः
सुरा॥ सर्वैः शूद्रस्य संप्रोक्तं यच्च वा तदु चिर्भवेत्॥ गृही त्वा तत्र दातव्यं सर्वैर्नैव च संस्पृशेत्॥ अन्यत्रापि॥ द्विजानामत्र कल्पं तु नसाक्षाच्च विक
ल्पितं॥ अनुकल्पं तु सत्ये त्रेता द्वापरयुगे बाहुल्यं॥ कलौ पुनः प्रधानद्रव्यदान विधिः श्रूयते॥ तदुक्तं रुद्रयामले॥ सत्यके माध्वि तुर्वर्णैः क्षीरात्य
मधुपिष्टकैः॥ त्रेतायां पूजयेद्देवि घृतेन सर्वजातिभिः॥ मधुभिः सर्ववर्णैश्च पूजनं द्वापरे युगे॥ पूजनीया कलौ देवि केवलैश्चासवैश्च तैः॥ कु
लामृतेन च॥ सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत्सुरां॥ अन्यथा कामतः पीत्वा प्रायश्चित्ती भवेन्नरः॥ माषभक्तं च बल्यर्थं धूपदीपादि
कं तथा॥ तिलाः कुशाः सर्षपाश्च स्थापनीयाः प्रयत्नतः॥ अथ पूर्वोक्तान्यतम स्थाने गत्वा सामान्यार्घ्यं विधाय पूर्वमुखो मूलांते फट्कारादिद
त्वा यागभूमिं प्रोक्ष्य गुरुगणेशबटुयोगिनीश्चतुर्दिक्षु पूर्वादितः संपूज्य॥ पूर्वोक्तं वीरार्दनमंत्रं भूमौ विलिख्य यच्चात्र त्यादि पूर्वोक्तक्रमेण भू
मौ पुष्पांजलित्रयं दत्वा प्रणम्य श्मशानाधिपतिभ्यः पूर्ववद्बलिं दत्वा॥ अघोरमंत्रेण शिखाबंधनं विधाय॥ सुदर्शमंत्रेणात्मानं रक्ष रक्ष
इति हृदि हस्तं दत्वा रक्षां विधाय॥ पूर्वोक्तक्रमेण भूतशुद्धिप्राणायामन्यासजालं विधाय जयदुर्गामंत्रेण दिक्षु सर्षपविकिरणं कृत्वा॥ ति
लासीत्यादि पूर्वोक्तं तिलान्विकीर्य विहितशवसमीपं गच्छेत्॥ तदुक्तं तंत्रांतरे॥ गुरुपूजादिकं सर्वं पूर्वोक्तमनमाचरेत्॥ वीरार्दनं कितेन भू
मौ मायामोहान विघ्नते॥ यच्चात्रेत्यादिमंत्रेण भूमौ पुष्पांजलिं क्षिपेत्॥ श्मशानाधिपतीनां तु पूर्ववद्बलिमाहरेत्॥ अघोराख्येन मनुना शि
खाबंधनमाचरेत्॥ सुदर्शनेन वा रक्षां शुभाभ्यां वा प्रकल्पयेत्॥ मायास्फुरद्वयं भूयः प्रस्फुरवितयं पुनः॥ घोरघोरतरे त्वं ते तनु रूपपदं
ततः॥ चटयुग्मपदं तेच प्रचयद्वितयं पुनः॥ कहयुग्गं वमद्वंद्वं ततो बंधयुगं पुनः॥ घातयद्वितयं वर्मफडंतः समुदाहृतः॥ एकपंचाशदा
र्णोयं मघोरास्त्रमयामनुः॥ हलाहलं समुद्धृत्य सहस्रारस्वरूपकं॥ वर्मास्त्रांतो महामंत्रः सुदर्शनमुदीरितः॥ भूतशुद्धिं ततः कृत्वा न्यास
जालं प्रविन्यसेत्॥ जयदुर्गास्यमंत्रेण सर्षपान्दिक्षु निःक्षिपेत्॥ तिलोसीतिच मंत्रेण तिलावपि विनिःक्षिपेत्॥ अथ शवसमीपे गत्वा॥ ७९

ॐ फडिति शवमभ्युक्ष्य ॐ हूं मृतकाय नमः॥ इति शवोपरि पुष्पांजलित्रयं दत्वा स्पर्शपूर्वकं शवं वक्ष्यमाणमंत्रेण प्रणमेत्॥ तदुक्तं भाव
चूडामणौ॥ प्रणवाद्यस्त्रमंत्रेण शवस्य प्रोक्षणं चरेत्॥ प्रणवं कूर्चबीजं च मृतकाय नमश्च फट्॥ पुष्पांजलित्रयं दत्वा प्रणमेत् स्पर्शपूर्वकं॥
वीरेश परमानंद शवानंद कुलेश्वर॥ आनंदभैरवाकार देवी पर्यंक शंकर॥ वीरोहं त्वां प्रपद्यामि उत्तिष्ठ चंडिकार्चने॥ प्रणम्यानेन मंत्रेण क्षा
लयेत्तदनंतरं॥ अथ सुगंधिजलेन शवं स्नाप्य वाससा जलमुत्तोल्य धूपितं कृत्वा गंधचंदनादिना शवं प्रलिप्य तत्कटिदेशे धृत्वा पूजास्थाने
समानयेत्॥ तदुक्तं नीलतंत्रे॥ तारं शाद्यं मृतकाय नमोंतं मंत्रमुद्धरेत्॥ शवस्थापनमंत्रोयं शवासनमनुस्ततः॥ मंत्रांते भुवनेशी स्यात्स्फुर
तामंत्र ईरितः॥ मंत्रांते मूलमंत्रांते अभ्यासं स्नाप्य संस्थाप्य धूपादिकं ततो ददेत्॥ भावचूडामणौ॥ धूपेन धूपितं कृत्वा गंधादिना प्रलिप्य
च॥ रक्तात्कायादिदेवेश भक्षयेत्कुलसाधकं॥ ततः कुशशय्यां परिस्तृत्य पूर्वशिरः कृत्वा शवं स्थापयेत्॥ तदुक्तं तत्रैव॥ कुशशय्यां परिस्तृ
त्य यत्र संस्थापयेच्छवं॥ एलालवंगकर्पूरजातीखदिरसार्द्रकैः॥ तांबूलं तन्मुखे दत्वा शवं कुर्यादधोमुखं॥ स्थापयित्वा तस्य पृष्ठं चंदनेन वि
लेपयेत्॥ बाहुमूलादिकट्यंतं चतुरस्रं विभाव्य च॥ मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितं॥ ततश्चैकयमजिनं कंबलांतरितं न्यसेत्॥ तंत्रांतरे च॥
गत्वा शवस्य सांनिध्यं धारयेत्कटिदेशतः॥ यद्युपद्रावयेत्तत्र दद्यान्निष्ठीवनं शवे॥ पुनः प्रक्षालनं कृत्वा जपस्थाने समानयेत्॥ ततो द्वादशांगु
लयज्ञकाष्ठानि दशदिक्षु संस्थाप्य तत्क्रमेणेंद्रादिदशदेवताः संपूज्य आमिषान्नबलिं दद्यात्॥ तदुक्तं तंत्रांतरे॥ द्वादशांगुलमानानि यज्ञ
काष्ठानि दिक्षु च॥ संस्थाप्य पूजयेत्तत्र इंद्रादिदशदेवताः॥ विषमिंद्राय संलिख्य सुराधिपतये नमः॥ इमं बलिं गृह्ण युग्मं गृह्णापय युगं त
तः॥ विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ ठद्वयं॥ अनेन मनुना पूर्वं बलिं दद्याच्च सामिषं॥ स्वस्वनामादिकं कृत्वा पूर्ववद्बलिमाहरेत्॥ सर्वेषां लो
कपालानां तत्साधकसत्तमः॥ तत्रायं क्रमः॥ इंद्राय सुराधिपतये ऐरावतवाहनाय वज्रहस्ताय देवीपरिषदाय सपरिवाराय नमः इति सं
पूज्य॥ बलिं दद्याद्यथा॥ लं इंद्राधिपतये इमं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवारणं कुरु २ सिद्धिं प्रयच्छ स्वाहा॥ एष बलिरिंद्राय न

मः॥ऐंवह्नयेतेजोधिपतयेमेषाधिरूढायशक्तिहस्तायदेवीपारिषदायइत्यादिपूर्ववत्संपूज्यबलिंदद्यात॥एषइत्यादिपूर्ववत॥ॐ वह्नये
तेजोधिपतयइमं॥ऐंक्ष्रांयमायप्रेताधिपतयेमहिषवाहनायदेवीपारिषदायनमइत्यादिसंपूज्यबलिंदद्यात॥ऐंक्ष्रांयमायप्रेताधिपतयेइम
मित्यादिपूर्ववत॥ॐ ऐंक्ष्रांनिर्ऋतयेरक्षोधिपतयेखड्गहस्तायशववाहनायदेवीपारिषदायनममितिपूर्ववत॥ॐ ऐंक्ष्रांनिर्ऋतयेरक्षोधिप
तयेइममित्यादिपूर्ववत॥एषइत्यादिपूर्ववत॥ऐंक्ष्रांवरुणायजलाधिपतयेपाशहस्तायमकरवाहनायदेवीपारिषदायनमइतिपूर्ववत॥
ॐ वरुणायजलाधिपतयेइममित्यादिपूर्ववत॥ऐंक्ष्रांवायवेप्राणाधिपतयेमृगवाहनायांकुशहस्तायदेवीपारिषदायेतिपूर्ववत॥ॐ वायवे
प्राणाधिपतयेइममित्यादिपूर्ववत॥ऐंक्ष्रांकुबेराययक्षाधिपतयेइत्यादिपूर्ववत॥ऐंक्ष्रांईशानायभूताधिपतयेशूलहस्तायवृषवाहनाय
देवीपारिषदायेत्यादि॥ॐ ईशानायभूताधिपतयेइममित्यादिपूर्ववत॥इंद्रेशानयोर्मध्येऐंक्ष्रांब्रह्मणेलोकाधिपतयेहंसवाहनायपद्महस्ता
यदेवीपारिषदायेत्यादिपूर्ववत॥ॐ ब्रह्मणेलोकाधिपतयेइममितिपूर्ववत॥निर्ऋतिवरुणयोर्मध्येऐंक्ष्रांअनंतायनागाधिपतयेचक्रहस्ता
यगरुडवाहनायदेवीपारिषदयेत्यादि ॐ अनंतायनागाधिपतयेइममित्यादिपूर्ववत॥तंत्रांतरे॥शवाधिष्ठातृदेवेभ्योबलिंचसुरयासह॥
चतुःषष्टियोगिनीभ्योडाकिनीभ्योबलिंदिशेत॥अथपूजासामग्रिसमीपेदूरेचोत्तरसाधकंसंस्थाप्य॥मूलांतेह्रींफट्शवासनायनमः॥
इत्यासनंसंपूज्यमूलमुच्चरन्नश्वारोहणक्रमेणशवोपर्युपविश्यस्वपादतलेकुशान्दत्वाशवकेशान्प्रमार्ज्यजुटिकांबध्वागुरुंगणपतिं॥
देवींनमस्कृत्यप्राणायामषडंगन्यासौकृत्वापूर्वोक्तंवीराईनमनुनादशदिक्षुलोष्ठानिनिःक्षिपेत॥ततःसंकल्पंकुर्यात॥तदुक्तंभावचू
डामणौ॥पूजाद्रव्यंसंनिधायचदूरेचोत्तरसाधकं॥समानगुणसंपन्नंमांत्रिकंविजितेंद्रियं॥अभिषेकविधिज्ञादिदिव्यवीरविशारदं॥सं
स्थाप्यासनमभ्यर्च्यस्वमंत्रांतेपरांततः॥फडित्यनेनमंत्रेणतत्राश्वारोहणंविशेत॥कुशान्यादतलेदत्वाशवकेशान्प्रमार्ज्यच॥दद्यान्निब
द्धजुटिकांकृतसंकल्पसाधकः॥शवोपरिसमारुह्यगुरुपूजादिकंचरेत॥प्राणायामंविधायाथदिक्षुलोष्ठानिनिःक्षिपेत॥ततःस्वा

८०

मतःशवसमीपेर्घ्यपात्रादिकंसंस्थाप्यशवजुटिकायांपीठपूजादिकंकृत्वाषोडशोपचारैर्देवींसंपूज्यशवमुखेकारणेनदेवींसंतर्पयेत॥
तदुक्तंभावचूडामणौ॥तत्रदेवींसुसंपूज्यउपचारैःसुविस्तरैः॥नीलतंत्रेपि॥शवास्येविधिवद्देविदेवताप्ययनंचरेत॥ततःशवादु
त्थायतस्यसंमुखेगत्वावक्ष्यमाणमंत्रंपठेत॥तदुक्तंभावचूडामणौ॥उत्थायसंमुखेस्थित्वापठेद्भक्तिपरायणः॥ॐ वशोमेभव
देवेशममामुकपदंततः॥सिद्धिंदेहिमहाभागवीरसिद्धिंकृतांवरा॥ततोमूलमंत्रंपठन्पट्टसूत्रेणशवपादद्वयंदृढंनिरुध्यव
क्ष्यमाणरक्तचंदनादिनात्रिकोणयंत्रंलिखेत॥तदुक्तंउत्तरतंत्रे॥मूलंसमुच्चरन्मंत्रीशवपादद्वयंततः॥पट्टसूत्रेणबध्नीयात्त
दोत्थातुंनशक्यते॥भावचूडामणौ॥ॐ भीमभीरुभयाभावभाव्यलोचनभावुक॥त्राहिमांदेवदेवेशशवानामधिपाधिप॥
इतिपादतलेतस्यत्रिकोणंचक्रमुल्लिखेत॥तदोत्थातुंनशक्नोतिशवस्तुनिश्चलोभवेत॥शवोपर्युपविश्यशवहस्तद्वयंपार्श्व
योःप्रसार्यतदुपरिकुशान्दत्वास्वपादौनिधायपुनःप्राणायामंकृत्वाशिरसिगुरुंविभाव्यहृदिदेवींध्यात्वातुअष्टोत्तरसंपुटे
विहितमालयाविभीर्जपेत॥तदुक्तंतत्रैव॥उपविश्यपुनस्तस्यबाहूनिःसार्यपार्श्वयोः॥हस्तयोःकुशमास्तीर्यपादौतत्रनिधाप
येत॥ओष्ठौसंपुटकौकृत्वास्थिरचित्तस्थिरेंद्रियः॥सदादेवींहृदिध्यात्वामौनीजपमथाचरेत॥स्वच्छंदभैरवे॥पुत्रदारधन
स्नेहलोभमोहविवर्जितः॥मंत्रंवासधयिष्यामिशरीरंपातयाम्यहं॥प्रतिज्ञामीदृशींकृत्वाजपेत्कस्थिरमानसः॥तत्रापिश्म
शानसाधनोक्तक्रमेणजपःकार्यः॥यद्यद्दरात्रिपर्यंतंकिंचिन्नलक्ष्यतेपूर्ववद्दर्च्येतिलविकिरणसप्तपदगमनादिकंकृत्वाजपंकु
र्यात॥भावचूडामणौ॥चलासनाद्भयंनास्तिभयेजातेवदेत्ततः॥यत्प्रार्थयसिदेवेशिदातव्यंकुंजरादिकं॥दिनांतरेचदास्यामि
स्वनामकथयस्वमे॥इत्युक्त्वासंस्कृतेनैवनिर्भयस्तुपुनर्जपेत॥पुनश्चेन्मधुरंसुक्तिवक्तव्यंमधुरंततः॥ततःसत्यंकारयित्वावरं

श्या॰र॰ ८१ तुप्रार्थयेत्ततः॥ यदिसत्यंनकरोतिवरंनावप्रयच्छति॥ तदापुनर्जपेद्धीमानेकाग्रमानसंपथा॥ नरत्रूपंविनातत्रदेवोपिनोपसर्पति॥
यत्नतस्तेनबोद्धव्यंनरोवादेवयोनिजः॥ मातामातुःस्वसावापिमातुलानीतथैवच॥ आगत्यविघ्नंकुरुतेमाययाछाद्यविग्रहं॥ उ
त्तिष्ठवत्सतकार्येसर्वज्ञातंनसंशयः॥ प्रभातसमयोजातस्तत्पिताक्रोधतेगृहे॥ प्रायोविमत्सरालोकाराजानोदंडधारिणः॥ कदा
चित्कलवादृष्टस्तदातेकिंभविष्यति॥ इत्यादिविविधैर्वाक्यैर्नचजाप्यंपरित्यजेत्॥ मृताः पितृगणास्तत्रदूरदेशनिवासिनः॥ बांध
वाआयांतितत्रदेवत्रूपधरास्ततः॥ स्त्रीपुत्रसेवकादीश्चगृहीत्वानीयतेपरैः॥ रुदंतिपुत्रकाः सर्वेभ्रातरोनुजशिष्यकाः॥ निज
कांतादिसंस्पर्शेवस्त्राद्याभरणादिकं॥ गृहीत्वानीयतेपत्नीपालकेस्तद्भयंत्यजेत्॥ दिवसत्रयंयाशंकासेवतत्रप्रजायते॥ यदि
नक्षुभ्यतेतत्रतदाकिंवानलभ्यते॥ स्त्रीरूपधारिणीदेवीदेवत्रूपधरः पुमान्॥ वरंगृह्णेतिशब्दंवैत्रिवारांतेवरंलभेत्॥ साधुनासाधु
नावापियोषिद्वेहरदायिनी॥ तदावीरपतेस्तस्यकिंनसिध्यतिभूतले॥ निष्पापपुरुषेचैवकुलीनेचैवसंस्कृते॥ असंस्कृतवरादे
वीपापायुक्तेनसंशयः॥ संमुखेसंमुखेवापिसंस्कृतंवक्तिचापरं॥ सवदेवीनसंदेहः सदेवोभैरवः स्वयं॥ नचेदवंभवच्चैवमाया
घटितविग्रहः॥ नवरंवरयेत्तत्रनाकिंचित्प्रवदेत्क्वचित्॥ नचेत्संस्कृतमाख्यातंवक्तिवक्तव्यमीदृशं॥ नचित्त्वयंकोलिकाकथ्या
वरंप्रार्थ्यनिराकुलं॥ अथवाउत्कटंकिंचिज्ज्योतिर्वानीललोहितं॥ शब्दोवाजायतेसम्यग्मृतेवापिलभ्यते॥ विचार्यतत्क्रूहीतव्यम
चंद्रिकूपरिकीर्तिता॥ स्वकृत्यातुबकुधानरास्त्वकृतबुद्धयः॥ अवश्यंतत्रमंतव्यंनतत्रप्रत्ययः क्वचित्॥ भैरवाबहुकाश्चैवकुल ८१
शास्त्रपरायणाः॥ एतच्छास्त्रप्रसंगेनकृताः कुटिलविग्रहाः॥ पुत्रोभूत्वाहरेद्विद्यांनारीभूत्वाविमोहयेत्॥ तस्मात्तद्भयेनावावि
चारयत्नमाचरेत्॥ सत्येकृतेवरंलब्ध्वासत्यजेच्चजपादिकं॥ फलंजातमितिज्ञात्वाजुटिकांमोचयेत्ततः॥ अन्यत्रापिशवंप्रक्षाल्य

संस्नाप्यबंधनंमोचयेत्ततः॥ परेद्युःकंमार्जयित्वापूजाद्रव्यंजलेक्षिपेत्॥ शवंजलेथगर्तेवानिःक्षिप्यस्नानमाचरेत्॥ ततस्तुस्वगृहं
गत्वाबलिंदद्याद्दिनांतरे॥ अग्निमंरात्रौदेवानांयजमानोहंतेगृह्णंतुमयादत्तमिमंबलिमिति॥ तत्रैव॥ अथतैर्याचितान्श्चैरनेकुंज
रश्मकरानदत्वापिष्टमयेनैवकर्तव्यंसमुपोषणं॥ परेद्युर्नित्यमाचर्यपंचगव्यंपिबेत्ततः॥ ब्राह्मणान्भोजयेत्तत्रपंचविंशतिसंख्यकान्॥
पंचपंचविहीनान्वाक्रमाच्चैवदशावधीन्॥ ततः स्नात्वाचभुक्त्वाचनिवसेदुत्तमस्थले॥ यदिनस्याद्द्विप्रभोज्यंतदादारिद्र्यतांव्रजेत्॥ तेन
चेन्निर्धनत्वंस्यात्तदादेवः प्रकुप्यति॥ त्रिरात्रंवाथषड्रात्रंनवरात्रंतुगोपयेत्॥ शय्यायांयदिगच्छेद्वैत्तदाव्याधिंविनिर्दिशेत्॥ गीतंश्रुत्वा
तुबधिरोनिश्चक्षुर्नृत्यदर्शनात्॥ यदिवक्तिदिनेवाक्यंतदास्यमूकताभवेत्॥ पंचदशदिनांतेहिदेहदेवस्यसंस्थितिः॥ गोब्राह्मणानां
निंदांचनकुर्याच्चकदाचन॥ देवगोब्राह्मणादींश्चप्रत्यहंसंस्पृशेच्छुचिः॥ प्रातर्नित्यक्रियांतेतुबिल्वपत्रोदकंपिबेत्॥ ततः स्नायात्तु
गंगायांप्राप्तषोडशवासरः॥ स्नानांतेमूलमुच्चार्यतर्पणांतेनमः पदं॥ एवंशतत्रयाहूर्ध्वंदेवतांतर्पयेज्जलैः॥ स्नानतर्पणशून्यस्तुनस्या
द्देवस्यदर्शनं॥ इत्यनेनविधिनानिनसिद्धिंप्राप्नोतिसाधकः॥ इहभुक्त्वावरान्भोगानंतेयातिहरेः परं॥ असांगंसांगमवापिनिःफलं
संफलंतुवा॥ कृत्वासाधनमेवैतच्छक्तेःप्रियतरोभवेत्॥ श्मशानेवाकार्यावैवीरसाधना॥ योभावोयस्यवैप्रोक्तस्तेभावैर्य
दिनार्चयेत्॥ दशाहक्रमयोगेननष्टोभवतिसाधकः॥ नोपदिशेत्तत्रभावंनपूजांतत्रसंदिशेत्॥ कौलान्मंत्रंगृहीत्वातुयावत्सिद्धिः
प्रजायते॥ ॥इतिवीरसाधनेचतुर्दशः परिच्छेदः॥१४॥ ॥अथप्रकारांतरंवीरसाधनंकालीतंत्रे॥ भैरवउवाच॥ शृणु
देविवरारोहेवीरसाधनमुत्तमं॥ तूर्णंशीघ्रफलावाप्त्यैप्रकारांतरमुच्यते॥ चतुःपथेचतुर्दिक्षुपुरुषंहृदयंखनेत्॥ जीवितंब्राह्मणं
ध्रुवजीवान्प्रज्वालयेन्नरः॥ पुरुषमितिपुरुषान्सजीवान्॥ जातित्वादेकवचनंचतुर्दिक्षुइत्यनेनचत्वारोपगम्यते॥ मध्येतथाखनेन्ने
कंतत्रमृद्वासनंस्मरेत्॥ पूर्वोक्तमार्गेणतत्रसंस्कारादिकमाचरेत्॥ महाकालादिदेवेभ्योबलिंपूर्ववदाहरेत्॥ कल्याकपूजांसंपूज्य

जपेत्स्वयतमानसः॥ दंताक्षमालयाचैवराजदंतेनमेरुणा॥ दिग्वासाश्चजपेन्मंत्रअयुतंसर्वदेवतं॥ जपांतेचबलिंदत्वादक्षिणाविभवा
वधि॥ सर्वसिद्धिश्वरोविद्वान्सर्वदेवनमस्कृतः॥ अथवाविजनेरण्येभस्मिशय्यासिनोनरः॥ उदयांतंदिवाजप्त्वासर्वसिद्धीश्वरोभवेत्॥ अ
थवा॥ बिल्ववृक्षनिजक्रोडेशवमारोप्ययत्नतः॥ नृसिंहमुद्रयावीक्ष्यजपेन्मातृकयानरः॥ सहस्रंतत्रजप्त्वावैसर्वसिद्धीश्वरोभवेत्॥ अ
थवा॥ वटमूलेशवंनीत्वातत्रदेवीप्रपूज्यच॥ सुस्नातत्रमनुंजप्त्वासर्वसिद्धीश्वरोभवेत्॥ श्मशानेवासक्तजप्त्वासर्वसिद्धीश्वरोभवेत्॥
अथवा॥ करकांचीसमादायकुंडमालाविभूषितः॥ तेनैवतिलकंकृत्वातत्तद्रूसमविभूषितः॥ असक्तरितिअश्रांतरसहस्रमित्यर्थः॥ तदु
क्तंतत्रैव॥ येषांजपेचमंत्रेचसंख्यानोक्तामनीषिभिः॥ तत्रैयंगणनाप्रोक्तागजांतकसहस्रकैः॥ वाराहीसंहितायामपि॥ पुरश्चरणहोमेषु
संख्यानोक्तामनीषिभिः॥ सहस्रमष्टंजुहुयाज्जाप्यलक्षंविनिर्दिशेत्॥ प्रयुयोशतमात्रंचजाप्यंचाष्टौविनिर्दिशेत्॥ वैशंपायनसंहिता
यांच॥ येषांजपेचहोमेचसंख्यानोक्तामनीषिभिः॥ तेषामष्टौसहस्राणिसंख्याक्ताजपहोमयोरिति॥ अत्रलिखितवचनानांविषमविषयानां
विषयविभागःकल्प्यते॥ प्रथमलिखितवचनंसिद्धविद्यापरं॥ वाराहीतंत्रवचनं॥ तदितरविषयबोद्धव्यं॥ वैशंपायनीयंवैष्णवादिपर
मितिनिष्कृष्टार्थः॥ तत्रसकरणत्वात्॥ अथवा॥ कुंकुमागरुकस्तूरीरोचनायनचंदनं॥ कर्पूरंपद्मरागंचकेसरंहरिचंदनं॥ एकत्रसाधि
तंकृत्वाप्रत्येकंसाधयेत्ततः॥ घनेमोथा॥ पद्मरागंपद्मनखीकेसरंभागकेसरं॥ हरिचंदनंकृष्णागुरुः॥ अस्यतिलकमात्रेणराजानंवशमा
नयेत्॥ जिह्वाग्रेरुधिरंवीरआकाशेचसमाहरेत्॥ तत्तद्रूस्युद्धवरक्तमाकाशाज्जिकयागृहीत्वेत्यर्थः॥ तेनैववटिकांकृत्वाभद्रकालींततोजपे
त्॥ नीलांनीलपताकांचलल्लज्जिह्वांकरालिकां॥ ललाटेतिलकंदत्वासाधकोवीतभीःस्वयं॥ महाष्टमीनवम्योस्तुसंयोगपुरतस्थितः॥ छाग
माहिषमेषाणांचतुर्दिक्षुशवान्क्षिपेत्॥ कबंधान्मुंडपुंजांश्चदीपादीभिरलंकृतान्॥ मध्यकबंधमास्तीर्यतत्रगंधर्वरूपधृक्॥ तांबूलपूर
रक्तास्यमंजनांचितलोचनं॥ कृत्वातावन्मनुंजप्त्वासर्वसिद्धीश्वरोभवेत्॥ यावदष्टोत्तरसहस्रं॥ वियद्वियुतंदेविनेत्रांतंचंद्रभूषितं॥ बीजं

प्रत्येकद्रव्याणांमिलितानांचपार्थिवी॥ मूलमंत्रेणमंत्रज्ञोजपेत्साग्रंशतत्रयं॥ जिह्वाग्रेरुधिरंगृह्यचामुंडेघोरनिःस्वने॥ बलिंदत्वावरंदेहिरुधिरं
गगनेमले॥ कालिकालिप्रचंडेघेततोस्वकवचंततः॥ कालिकेयंसमाख्यातावीराणांहितकाम्यया॥ कूर्चयुग्मंतथादेविनीलायाःकथितंतव॥
वियद्भृगुबलंदेविबलमित्रंरवीरतिः॥ चंद्रखंडसमायुक्तंततोनीलापदंततः॥ पातकेकुंफडंतश्चपूर्वकूटमनुर्मतः॥ सुगुह्येयंमहाविद्यायोज्या
वैनीलसाधने॥ जयश्रीधरणीदेविपताकावरणस्थिते॥ तेननीलपताकेयंयोज्यावैनीलसाधने॥ शोसौविद्यामहातारासाकरालेतिकीर्ति
ता॥ भूमिपुत्रसमायुक्ताअमावास्याशुभप्रदा॥ भाद्रेपुष्करयोगेनतस्यावीरनरोत्तमः॥ विष्णुक्रांतांसमानीयनिःक्षिपेत्प्रेतभूमिषु॥ तत्रतांसा
धितांकृत्वातद्दिनेमृतनायिके॥ तत्रप्रसारितंमत्स्यमेकंमूलेनदापयेत्॥ तज्जलेनाभिषेकंचपूर्ववच्चशवोपरि॥ साधितांविजयांतस्यउदरेमुख
कर्मना॥ क्षिप्त्वातत्रखनेमत्स्यमंजनांचितलोचनः॥ पूर्वद्रव्येणतिलकिउत्थायचमनुजपेत्॥ स्वयंतत्रैवभगवान्भैरवोलगुडांकितः॥ गतभीतस्त
तोवीरस्तंविलोक्यजपेन्मनुं॥ यदिभाग्यवशाद्देविलगुडस्तत्रलभ्यते॥ तदास्वयंभैरवोसौसयंवीरेश्वरोभवेत्॥ मत्स्यमानीयदेवेशिनिःक्षिपेत्स्थित
कानने॥ तत्रासक्तज्जपित्वातुरवतामेलनंभवेत्॥ तत्रनत्वामहादेवंमहादेवींचभाविनि॥ तद्रसातिलकंकृत्वासयंवीरेश्वरोभवेत्॥ निशायांमृतदे
हंचउन्मत्तानंदभैरवः॥ दिग्वासाविमलीभस्मभूषितामुक्तकेशकः॥ कपालीखड्गहस्तश्चजपेन्मातृकयानरः॥ तदातस्यमहादेविसर्वसिद्धिक
रस्थिता॥ डाकिनीयोगिनीवापिअन्यांचभूतलांगनां॥ तत्राप्यानीयसंपूज्यसर्वसिद्धीश्वरोभवेत्॥ सर्वेषांजीवहीनानांजंतूनांनीलसाधने॥ मृतास
नंविनादेविपूजयेत्पार्वतीशिवां॥ तावत्कालंवसेद्धीरयावद्रात्रिसंप्लुवं॥ शवाःप्रशस्तादेवेशिब्राह्मणंगोमयंविना॥ क्षुद्राःसर्वप्रशस्ताश्चसर्वसि
द्धिप्रदायकाः॥ एतन्नीलक्रमंदेविकथितंचतवानघ॥ नकस्मैचिद्वावक्तव्यंममप्रीत्यामहेश्वरि॥ देव्युवाच॥ ज्ञानमेतन्महादेवत्वत्प्रसादान्महेश्व
र॥ अशक्तानांतुमेदेवपुरश्चरणमुच्यते॥ भैरवउवाच॥ श्मशानेयापुरश्चर्याकथितादेविदुर्लभा॥ अथवान्यप्रकारेणपुरश्चरणमुच्यते॥ कुजेवा
शनिवारेवानरकुंडंसमाहृतं॥ पंचगव्येनभिलितंचंदनाद्यैर्विशेषतः॥ निःक्षिप्यभूमौहस्तार्धमानतःकाननांतरे॥ तत्रतद्दिवसरात्रौसहस्रंय
दिमानवः॥ एकाकीप्रजपेन्मंत्रंसभवेत्कल्पपादपः॥ अथवा॥ शवमानीयतद्दारितेनवपरिवन्यच॥ तद्दिनात्तद्दिनंयावत्तावदष्टोत्तरंशतं॥ म

रोवेसर्वसिद्धीशोचात्रकार्याविचारणा॥अथवान्यप्रकारेणपुरश्चरणमुच्यते॥अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोरपि॥सूर्योदयंसमारभ्यया
वत्सूर्योदयांतरं॥तावज्जप्त्वानिरातंकः सर्वसिद्धीश्वरोभवेत्॥मुंडमालायांतु॥सूर्योदयंसमारभ्ययावत्सूर्योदयांतरं॥तावज्जप्त्वामहेशानि
पुरश्चर्याविधीयते॥कालीतंत्रेच॥अथवान्यप्रकारेणपुरश्चरणमुच्यते॥चंद्रसूर्यग्रहेचैवयासावधिविमुक्तितः॥यावत्संख्यमनुंजप्त्वातद्दशांशा
दिकंचरेत्॥तावदितिजपदशांशहोमादिकमित्यर्थः॥तंत्रांतरे॥ग्रहणेचंद्रसूर्यस्यशुचिः पूर्वमुपोषितः॥नद्यांसमुद्रगामिन्यांनाभिमात्रोदकेस्थि
तः॥यद्वाशुद्धोदकेस्थित्वाशुचौदेशेसमाहितः॥स्पर्शाद्विमुक्तिपर्यंतंजपंकुर्यादनन्यधीः॥अनंतरंदशांशेनक्रमाद्धोमादिकंचरेत्॥तद्दिनम
हतींपूजांकुर्याद्ब्राह्मणभोजनं॥ततोमंत्रस्यसिध्यर्थंगुरुंसंतोष्यपूजयेत्॥मुंडमालायां॥कृष्णाष्टमीसमारभ्ययावत्कृष्णाष्टमीभवेत्॥सहस्र
संख्यंजपेत्तुपुरश्चरणमिष्यते॥कृष्णांचतुर्दशीं प्राप्यनवम्यंतमहोत्सवे॥अष्टमीनवमीरात्रौपूजाकार्याविशेषतः॥दशम्यांपारणंकुर्यान्मत्स्य
मांसादिभिः प्रिये॥षट्सहस्रंजपेन्नित्यंभक्तिभावपरायणः॥अन्यच्च॥चतुर्दशीसमारभ्ययावदन्याचतुर्दशी॥तावज्जप्त्वामहेशानिपुरश्च
रणमिष्यते॥केवलंजपमात्रेणमंत्राः सिद्धाभवंतिहि॥विनाहोमादिदानेनविशेषात्पीठपूजनैः॥यानिपीठंमहापीठंकामरूपंतथापरं॥तया
रकंतमंघ्रुम्मरुद्रदेवश्वापरः॥तावज्जप्त्वेतिप्रत्यहंषट्सहस्रमित्यर्थः॥अव्यवहितप्रथमकल्पदशादिति॥कालीतंत्रेपि॥शरत्कालेचतुर्थ्या
दिनवम्यंतंविशेषतः॥भक्तितः पूजयित्वाचरात्रौतावत्सहस्रकं॥जपेदेकाकिविजनेकेवलंतिमिरालये॥अष्टम्यादिनवम्यंतमुपवासपरो
भवेत्॥अन्यत्रगुरुमार्गस्यलंघनंनैवकारयेत्॥अथवान्यप्रकारेणपुरश्चरणमुच्यते॥अष्टमीसंधिवेलायांमष्टोत्तरलतागृहे॥प्रविश्य
मंत्रीविधिवत्ताः समभ्यर्च्यप्रयत्नतः॥पूर्वोक्तिकल्पमासाद्यपूजाहोमादिकंचरेत्॥केवलंकामदेवोसौजपेदष्टोत्तरंशतं॥तासांचैवयत्नमू ८३
लेनउक्तंसंगृह्यमस्तके॥महासिद्धिर्भवेत्सद्योलतादर्शनपूजनात्॥अथवेत्यादि॥कुलाष्टलतागारेलिखेद्वामंत्रमेवच॥अपू
ज्यतत्रसंस्कारंकृत्वातस्यैनिवेद्यच॥किंचिजप्त्वामनुनीतोदेवताभावतत्परः॥तांविसृज्यनमस्कृत्यस्वयंजप्त्वासुसंयतः॥प्रातः

MEMORIAL

स्त्रीभ्योवलिंदत्वामंत्रसिद्धिर्नसंशयः॥अथवेत्यादि॥गुरुमानीयसंस्थाप्यदेववत्पूजनंविभोः॥वस्त्रालंकारभूषाद्यैः संतोष्यगुरुमेव
च॥तत्कृतंतत्कृतांचैवतत्पत्नींचविशेषतः॥पूजयित्वामनुंजप्त्वास्वयंसिद्धीश्वरोभवेत्॥अथवेति॥सहस्रारेगुरोः पादपद्मंध्यात्वाप्र
पूजयेत्॥केवलंदेवभावेनसर्वसिद्धीश्वरोभवेत्॥गुरवेदक्षिणांदत्वायथाविभवविस्तरैः॥गुरोरनुज्ञामात्रेणदुष्टमंत्रोपिसिध्यति॥गुरुं
विलंघ्यशास्त्रेस्मिन्नाधिकारःसुरैरपि॥एषांचतंत्रमंत्राणांप्रयोगः क्रियतेयदि॥गुरुवक्त्रंविनादेविसिद्धिहानिः प्रजायते॥एतन्मंत्रंच
तंत्रंचशिष्येभ्योपिनदर्शयेत्॥अन्यथाप्रेतराजस्यभवनंयातिनिश्चितं॥अथकालिकादर्शनार्थंसाधनांतरंलिख्यते॥तत्रायंक्रमः॥प्रदो
षेशून्यगृहंगत्वाउत्तराभिमुखोपविश्यभूतशुध्यादिन्यासांतंविधाय॥सिंदूरेणनवकोणष्टाष्टदलंचतुरस्रंचतुर्द्वारात्मकंयंत्रंवि
लिख्यमध्येकुमार्याश्चशक्तिबीजंविलिख्यपुरतः संस्थाप्यतत्रपीठपूजांकृत्वामूलाधारमाकुंच्यद्वादशप्राणायामंकृत्वाध्याये
द्यथा॥कालीकल्पे॥नृकपालसमारूढांनरमालाविराजितां॥कृष्णाभ्रसंनिभांरक्तवासोपपरिदीपितां॥चतुर्बाहुधरांनानादि
व्यालंकारभूषितां॥निशामुखंसमारभ्ययावद्यामद्वयंभवेत्॥तावत्कालंजपेन्मंत्रंकालीसंदर्शनोत्सुकः॥चंदनावीत्यनृशि
रः शिरोपरिविराजितः॥घृतप्रदीपमालाभिस्तथैवपरिवेष्टितः॥मुंडोपरिभवेन्मुंडोभयशोकविवर्जितः॥ऊर्ध्वास्यः प्रजपेन्मंत्रं
दीपलोकनतत्परः॥मुंडोपरिभवेन्मुंडः संदीपः संनिधापयेत्॥पूजनंमूलमंत्रेणकुर्याद्दृष्ट्याविचक्षणः॥सिंदूरमंडलंकृत्वाभवकोणवि
वर्जितं॥शक्तिबीजंतुतन्मध्येलिखित्वान्यैः समाहृतं॥४॥बाहिरष्टदलंपर्यंतंनैवकारयेद्बुधः॥तत्रावाह्यजगद्धात्रींकालिकांकृष्ण
विग्रहां॥पूजयेद्विधिवद्द्रव्यैर्नवरात्रंसमाहितः॥ततस्तुप्राजगद्धात्रीकालिकापरमेश्वरी॥सर्वसंपत्प्रदासाक्षात्साधकस्या
नुकंपय॥नस्याङ्कृतेत्यर्थः॥नेयंप्रकाशयेद्धीमान्प्राणैःकंठगतैरपि॥नवदेङ्क्तिहीनायभैरवेनेतिभाषितं॥ ॥इतिपंचद
शः परिच्छेदः॥१५॥ ॥अथकाम्यहोमार्थंकुंडनियमोलिख्यते॥तदुक्तं सिद्धसारस्वते॥शांतौपुष्टौतथारोग्येकुंडंचचतुर

त्वकं॥आकर्षणे त्रिकोणं स्यादुच्चाटने च वर्तुलं॥मारणे च तथा योज्यं मे त्रिभिर्वर्तुलं सदा॥तत्रांतरे॥उदी च्यां पौष्टिकं कुंडं वारुण्यां शां
तिकादिषु॥उच्चाटे वा निर्ऋत्यां कुंडं याम्ये च मारणं भवेत॥कुंडनियमपरिपाटी तु मत्कृत श्रीतत्त्वचिंतामणिवत्तु संधेया॥अथ होमरहस्य
इत्यंत उक्तं कालीतंत्रे॥अथ होमविधिं वक्ष्ये सिद्धिप्रदायकं॥लतापुष्पान्वितं कृत्वा पर्णानां शतकं सुधीः॥तानि सर्वं त्रिविधिवद्दस
कृत्वा साधकोत्तमः॥ततो वै होमयेत्ता निसंस्कृतान्यथाविधि॥युगानामयुतं तेन पूजनं जायते शिवे॥तदुक्तमुत्तरतंत्रे॥नारी रजोंकि
तं कृत्वा पर्णानां शतमुत्तमं॥असकृदिति शतधेत्यर्थः॥अनेन क्रमयोगेन यश्चरेद्धि विमासकं॥न तस्य दुर्लभं किंचित्त्रिषु लोकेषु वि
द्यते॥वीरो भवति वागीशः सर्वसिद्धीश्वरो भवेत॥ऊनेदाज्येन मांसेन रक्तेन रुधिरेण च॥रक्तपुष्पेण साज्येन सरक्तेन विशेषतः॥अ
मिषादिभिरप्येवं श्मशाने जुहुयात्सुधीः॥महाकालकुले यत्ना त्सश्राद्धं वी प्रयत्नतः॥त्रिधा विभज्य विधानेन साधकः शुद्धमानसः॥
मांसं रक्तं तिलं केशं नखं रक्तं च पायसं॥आज्येनैव विशेषेण जुहुयात्सर्वसिद्धये॥एवं कृते च सर्वत्र लभते सिद्धिमुत्तमां॥यद्यत्का
मयते कामं तत्तदाप्नोति निश्चितं॥देववन्मानुषो भूत्वा भुनक्ति बहुलं सुखं॥फलकारिणी येपि॥विद्याकामेन होतव्यं पद्मं मधुसम
न्वितैः॥धनकामेन होतव्यं तिलाज्यामधुसंयुतं॥सिद्धसारस्वते॥बंधूकपुष्पहोमेन दासवत्कुरुते नृपान्॥सर्पिर्लवणहोमेन स
माकर्षति कामिनीं॥बकुले होममात्रेण सौभाग्यं लभते नरः॥मल्लिकाजातिपुंनागकदंबैः पुष्टिमाप्नुयात॥क्षीराज्यमत्तरारैर्होमा
न्महती कवितां लभेत॥राजवृक्षप्रसूनैश्च होमात्संपद्ममाप्नुयात॥राजवृक्षः शोणलुः॥दूर्वातिलाज्यहोमेन सदीर्घमायुराप्नु
यात॥चंदनागरुकाश्मीरकर्पूरैर्होमयेत्परः॥मंत्री नीलसरस्वत्याः सर्वाभीष्टमवाप्नुयात॥नीलसरस्वती पदमात्रोपलक्षणं॥
अनिरुद्धसरस्वती विषयापि बोद्धव्यं॥अत्रोक्तमाचरेत्तत्र तत्रोक्तमाचरेदिहेति वचनात॥वीरतंत्रेपि॥कर्पूरहोमतो मंत्रसर्वा
भीष्टानि साधयेत॥संपूज्य मूलमंत्रेण बिल्वपत्रैर्घृतान्वितैः॥सहस्रं प्रत्यहं कृत्वा प्राप्नोति परमां गतिं॥प्रत्यहमिति संवत्सरं यावदि ८४

त्यर्थः॥घृताक्तमालतीपुष्पहोमादद्भुतकविर्भवेत॥यत्र होमसंख्या नोक्ता तत्रायुतसंख्या बोद्धव्या॥तदुक्तं तत्रैव॥अत्र सर्वस्य होमस्य नि
यमोयुतसंख्यक इति॥ग्रंथगौरवभयान्नात्र लिखितं॥आकर्षणाद्यथ प्रयोगः॥तत्रादौ पूजाप्रकरणोक्तबलिमंत्रेणार्धरात्रे च चतुष्पथे
सर्वसिद्धये सामिषान्नं बलिं दद्यात॥तदुक्तं स्वतंत्रे॥उपचारविशेषेण राजपत्नीं वशं नयेत॥राजानं जपमात्रेण बलिना सकलं जगत॥प्र
योगबलिमंत्रोयं प्रयोगान्साधयेद्यदि॥अर्धरात्रे ततो नित्यं बलिं दद्याच्चतुष्पथे॥परसैन्यग्रहारिष्टरोगकृत्यानिवारणं॥अथवाचार्धरात्रे
सिंदूरादीनायं चक्रं कृत्वा रक्तपुष्पैर्देवीं संपूज्य वक्ष्यमाणक्रमेण जपं कुर्यात॥तदुक्तं कुलसंभारे॥नागयज्ञोपवीतां च चंद्रार्धकृतशेखरां॥जय
कूटसमायुक्तां महाकालसमीपगां॥एवं संचिंत्य देवीं तु रक्तपुष्पैः समर्चयेत॥कृत्वा लज्जायुगं बीजद्वयं चांते तथैव च॥योजयित्वा जपेद्विद्या
मयुतं वशमानयेत॥कामबाणसमाविद्धा निर्लज्जा विह्वलाः स्त्रियः॥स्वस्वं संत्यज्य भर्तारमालिंगंति सदैव तं॥योजयित्वेति दक्षिणकालि
केत्यंते इत्यर्थः॥कालीतंत्रेपि॥रक्तैराकर्षणे पुष्पैः पीतैस्तंभनकर्मणि॥मारणे कृष्णपुष्पैस्तु पूजयेद्धोरदक्षिणां॥आद्यं चैकं तु बीजानां
तथैवांते च एककं॥दक्षिणे कालिके चेति मध्ये संयोज्य मंत्रवित॥स्वाहांतं मंत्रमुच्चार्य भवेदाकर्षणं महत॥बीजानामिति त्र्यक्षरीविद्यानामे
कैकं बीजं परं चांते योजनीयमित्यर्थः॥लोहितानलहस्तां च एकेशूलधरां तथा॥महाकालसमासीनां ध्यात्वा चाकर्षणं चरेत॥स्था
वरं जंगमं चैव पातालतलगं तथा॥आकर्षयति मंत्रज्ञः किमन्यद्भुवि योषितः॥अयुतैः कं जपः प्रोक्तः सदाकर्षणकर्मणि॥कुलसं
भारेपि॥लोहितानलहस्तां च एकशूलधरां तथा॥महाकालसमीपस्थां ध्यात्वा पुष्पैः समीतकैः॥अभ्यर्च्य कैकराश्राद्ये अथवा
न्ते नियोजयेत॥आकर्षणं भवत्येवं सदा स्थावरजंगमं॥पातालतलगां वापि किमन्यां भुवि योषितां॥आकर्षयति मंत्रज्ञो महा
कालवचो यथा॥अथ भावचूडामणौ॥रात्रौ वीरवरो वापि देवो या साधकानेनलकुलं समादाय कुलस्थाने तु मंत्रकं॥विलिख्य
मसिना कालं काली चरमणोज्ज्वलां॥निजवामोरुमध्ये च कालीमंत्रविदर्भितं॥मसिना साध्यनामार्णं विलिख्य देवमध्यतः॥

स्वयंकामकलाचपरस्तत्रावाप्यमहेश्वरी॥महाकालिनसंयुक्तंपूर्वोक्तंध्यानयोगतः॥पूजयित्वाततोकुंडेअष्टोत्तरसुमंत्रितं॥य
मोम्नादीयतेवत्ससावश्यंप्रतिपद्यते॥एतद्विधानलोपेतुप्रभवंतिनदेवताः॥योगिन्यामरसश्चापिकेपरेनरकिंकराः॥स्वयंदि
व्यवरोवापिकिंवावीरवरोत्तमः॥इतिचिन्हायतेलोकेसदाभ्रष्टाभविष्यति॥तस्माद्यत्नात्कपितव्यंनप्रकाश्यंकदाचन॥अनया
लष्टकर्मज्ञइतिचत्प्रतिपाद्यते॥निमिषनिमिषहानिर्जायतेकुलभूषण॥वरंप्रकाश्यंनतत्सर्वंनाकृष्टिः कुलमुत्तमं॥अयमयेतिय
नोक्तंस्वप्रबोधंमहेश्वर॥रात्रौवादिवसवापिजपदष्टोत्तरंशतं॥कुलव्यक्तिस्तदानस्यात्कुणुदेविकुलेश्वर॥कुलस्यागमनार्थं
चरात्रौप्रहरमध्यतः॥चतुष्पथेकुलस्थानेगत्वातत्कुलमंत्रकं॥अष्टोत्तरशतंजप्त्वाविघ्नः पथिनवर्त्तते॥इतिकुलचूडामणौ॥
अथतद्रात्रिसमयेस्वकुलंतूलिकोपरि॥वामभागेसमासीनांरक्तवस्त्रविभूषितां॥स्वर्णालंकारभूषांगीरक्तगंधविभूषितां॥
गंधपुष्पधूपदीपनैवेद्यंसुमनोहरं॥सर्वशृंगारवेषाढ्यांस्फुरच्चकितलोचनां॥जितामित्रकुचद्वंद्वविशालकरिकुंभकं॥ल
लाटेयंत्रमालिख्यसाध्यनामविदर्भितं॥तत्स्कंधेवाकुमादायभंग्याधृतकुचाचलः॥तांबूलपरितमुखः कुलंवदभिसंहि
तं॥कुलाकुलजपंकृत्वासमानयतितत्क्षणात्॥यन्नाम्नालिखितंयंत्रंसमानयतिसाधकः॥शतयोजनदूरस्थांनदीपर्वतम
ध्यगां॥द्वीपांतरस्थहस्तेषुरक्षितांनिगडादिभिः॥पयोधरभरक्षुब्धमध्यमांलोललोचनां॥नितंबबिंबविध्वस्तस्फुरज्जघन
मंडलां॥साधकाकांक्षिहृदयविवरांतः प्रसर्पिणीं॥कपाटलोहसंबद्धप्राकारविवरांतरे॥साधकांतः समासीनांदेवतामिव
चारिणीं॥एवमाकृष्टिसिद्धिश्चेत्साधकः कौलिकोभवेत्॥अथगंधर्वतंत्रे॥महाचीनक्रमेबीजंलिखिलाकुंकुमनतु॥तत्पार्श्वेसा ८५
ध्यमालिख्यताडयेद्दृष्टिदृष्टिभिः॥तत्रगच्छतिकामार्तायदिदेशोप्रपूजकः॥तत्रैवकुलचूडामणौ॥ईशानेकुंकुमासाद्यतत्रयंत्रंवि
लिख्यच॥अष्टमीरात्रिमारभ्यचतुर्दश्यांसमापयेत्॥अष्टोत्तरशतंमर्त्योमंत्रमितातुसंयतः॥नग्नस्ताबूर्णपूर्णास्योमुक्तकेशो

जितेंद्रियः॥मदिराघूर्णनयनः परयोषित्समागमः॥पूजयेत्कंधपुष्पेणदिग्वासाः कुलभूषणः॥यंनाम्नागभितंयंत्रंपूजयेद्वीरवल्लभः॥मासमाया
तिकामार्तायत्रदेशेसपूजकः॥मद्यंमांसंतथामत्स्यंयत्किंचित्कुलसाधनं॥तस्यैदत्वाततः शेषंगुरवेविनिवेद्यच॥मदनुज्ञांसमृभिक्त्वाशेषम
मृनियोजयेत्॥मद्यंमांसंविनावत्सकुलपूजांसमाचरेत्॥जन्मांतरसहस्रेषुकृतंतस्यचनश्यति॥अथशंकुकाष्ठप्रमाणंयथातदुक्तंतत्रैव॥ऊ
र्ध्वंवितस्तिविस्तारमधोविस्तारमेवच॥अथज्ञानार्णवे॥शतमष्टोत्तरंजप्त्वात्तस्मैतच्चप्रयच्छति॥सवश्योजायतेदेविनात्रकार्याविचारणा॥
स्त्रियस्तुसकलावश्यादासीभूताभवंतिहि॥शताभिजप्तमात्रेणलोचनात्तिलकंनरः॥कुलापश्यतितंमंत्रीतंकुर्याद्दासवद्वशं॥अथनिग्रहा
द्युपायस्तदुक्तंकालीतंत्रे॥अथान्यत्संप्रवक्ष्यामिप्रयोगंशत्रुनिग्रहे॥सर्वांतेवह्निललनांयोजयित्वायुतंजपेत्॥कपिलांद्विभुजांकर्त्रीक
पालसव्यदक्षिणां॥एवंध्यात्वातुशत्रूणांमारणंसमुपाचरेत्॥संकेततंत्रेतारारहस्यवृत्तावपि॥परतंत्रवीर्यहानिमाह॥रक्तेनरिपोर्वि
द्यांविलिखेत्पत्रकेनते॥श्मशानेमंत्रमुच्चार्यपदिकृत्वाविस्त्यच॥महस्तजन्मभिर्जप्तोविधानादिफलप्रदः॥सिद्धयश्चविनश्यंतिदेवानाम
पिदुर्लभाः॥तत्प्रतीकारोयथा॥मातृचक्रेमृतंलेख्यामृतभिन्नपुटीकृतं॥जलेनिःक्षिप्यमंत्रंतुपुनर्नवइतीरितः॥यन्मंतुतन्मंतुदग्धंनवोरित
शशीयथा॥क्षणेक्षणेतुतेजस्वीरिपुदृष्टिगतेपिच॥एतदनुष्ठितोनिजमंत्रसिद्धिर्भाविष्यति॥इति॥गंधर्वतंत्रेपि॥महाचीनडुमरसेनोक्तं
पिंडविधायच॥यन्नाम्नादीयतेसोपिसोचिरान्मृत्युमाप्नुयात्॥कालीतंत्रे॥नरास्थिविलिखेन्मंत्रंक्षारयुक्तंहरिप्रिया॥सहस्रंपरिसंजप्य
निशायांरविवासरे॥निःक्षिप्यतेयस्यगेहेतस्यमृत्युस्त्रिमासतः॥क्षेत्रेतुसःस्यहानिःस्याज्जवहानिस्तुरंगमे॥धनहानिर्धनागारेग्राम
मध्येतुतत्क्षयः॥द्वेष्यद्वेषकयोर्नाम्नितस्यद्वेषोमहान्भवेत्॥लिखेन्मंत्रमिति॥मूलांतेअमुकंमारयेतिसाध्यसहितमित्यर्थः॥संजप्येतिअ
मुकंमारयमारयेत्यंतेमंत्रंजपः॥द्वेषेतुअमुकामुकयोर्द्वेषंकुरुकुर्वित्यंतेमंत्रंजपेत्॥क्षारंक्षारलवणं॥शताभिमंत्रितद्वचनिःक्षिपेद्दि
रिवेश्मनि॥सप्ताहाभ्यंतरेतस्यचोच्चाटनमिदंमहत्॥अथध्यानरहस्यंतदुक्तंकालीतंत्रे॥शुक्लेनध्यानयोगेनवशयेद्वशवर्तिनी॥पीतेन

ध्यानयोगेनस्तंभयेदखिलं जगत्॥कृष्णाभां मारणे शत्रो धूम्राभां शत्रुनिग्रहे॥अथजपविशेषो लिख्यते तदुक्तं तंत्रांतरे॥मध्यमायां मध्यभा
गे मालां संस्थाप्य मंत्रवित्॥शांत्यादि स्तंभवश्ये पु वृद्धाग्रेण प्रचालयेत्॥तर्जन्यो गुष्ठयोगेन द्वेषोच्चाटनयोर्जपः॥कनिष्ठांगुष्ठयोगेन मारणे
जप ईरितः॥ ॥इति श्यामारहस्ये षोडशः परिच्छेदः॥१६॥ ॥अथ वेतालादि सिद्धिः॥तदुक्तं कुलचूडामणौ॥भैरव उवाच॥
वेतालादि महासिद्धिः॥कथं भवति चांबिके॥तन्मे कथय देवेशि यदि स्नेहोस्ति मां प्रति॥देव्युवाच॥निंबवृक्षाङ्कं वं काष्ठं श्मशाने साधकोत्तमः॥
भौमवारे मध्यरात्रौ शिवासन युगांकितं॥खनित्वा चाष्टलक्षं वै जपन्महिषमर्द्दिनीं॥तत्सहस्रं क्रमेन हुत्वा तत्र वा पितृकानने॥काष्ठमुद्धृत्य ते
नैव रंडपादुके निर्मितं॥कृत्वा दुर्गाष्टमी रात्रौ श्मशाने निःक्षिपेत्ततः॥तस्योपरि शिवं कृत्वा पूजयित्वा यथाविधि॥शवासनगतो राजप
दस्सहस्रकं॥ततो मात्रिबलिं दत्वा काष्ठं मामंत्रयेत्ततः॥स्फ्रें स्फ्रें रंडमहाभागयोगिनी हृदये प्रिय॥ममहस्तस्थिता नाथ ममाज्ञां परिपूरय॥
एवमामंत्र्य वेतालं यत्र यत्र प्रयुज्यते॥तं तं चूर्णी विधायाथ पुनरायाति कालिके॥गच्छ गच्छ महाभाग पादुके वरवर्णिनी॥मत्पादस्पर्शमात्र
पगच्छे त्वं शतयोजनं॥अष्टलोहं समालोड्य पंचाशदंगुलाकृतिं॥खड्गं कृत्वा तत्र यंत्रं लिखित्वा प्रजपन्मनुं॥तत्सहस्रं ततो कृत्वा महाशव
कलेवरे॥खनित्वा ज्वी वृक्षाग्रवत् शुष्कं तु भावयेत्॥कुलाष्टम्यां मध्यरात्रे चितामध्ये समाहितः॥प्रतिपूर्व समामेकं कुर्वन्नेत्यपि वने ततः॥म
धुत्रयसंयुक्तं बिल्वपत्रेण संयुतं॥पादादिजानुपर्यंतं होमांते बलिमाहरेत्॥बल्यंते पारमामायादेवी महिषमर्दिनी॥आयाति बलिपूर्णास्या
वरहस्ता महामुखी॥गृह्ण वत्से तिशाङ्गं वै खड्गमुत्तोल्य धारयेत्॥घोरदंष्ट्रे महाकाल विकरालस्वरूपिणी॥क्रां ईं उं कुरु कल्याणं विपक्षं छे
दविस्तरं॥एवमामंत्र्य खड्गं तु यमुद्दिश्य क्षिपेन्नरः॥हत्वा हत्वा पुनस्थित्वा गच्छत्या कथं ते पुनः॥अथवा कृष्णमार्जारमेकघातेन घातयेत्॥ ८६
कुजे चतुष्पथे रात्रौ निखनेन्मंत्रितं ततः॥अत्र मांचां समारोप्य यवत्स्यत्रं प्रजायते॥तावद्भुक्त्वा हविष्यान्नं प्रतिरात्रं जपेद्धि भीः॥अष्टोत्तरस
हस्रं तु एकाकी दीपवर्जितः॥उत्पन्नं पत्रमारोप्य छित्वा निश्छिद्र मानयेत्॥तत्र भुक्त्वा हविष्याशी तद्दिने तटिनी तटे॥नमानी यसुह्यसंगः

क्षालयेन्मंत्रमुच्चरन्॥तत्स्तोत्राभिमुखं वत्स यदक्षि प्रतिगच्छति॥तदानीं पूजयेत्तत्र कालिकां घोरदक्षिणां॥अभिमंत्र्य सहस्रं तु कालीमंत्रं
प्रयत्नतः॥सिद्धांजनं भवेन्मंत्री नात्र कार्या विचारणा॥चंदनागरुकस्तूरी मिश्रितं चास्ति यर्षणं॥कृत्वा तिलकमादाय सर्वं जयति सा
धकः॥कुलमीनं कुलान्नं च कुलमद्यं कुलेश्वर॥कुलस्थानेसमानीय यस्तोदैव्ये प्रयत्नतः॥अष्टोत्तरसहस्रं तु जप्त्वा भूमितले स्थितः॥भू
मौ फुत्कारमंत्रेणा विवरं तत्र जायते॥शतयोजनदूरेण यत्र स्याध्यास्थितिर्भवेत्॥तत्र वै गमनं तस्य भूतलात् प्रसर्पिणः॥एवं विवरमध्ये
तु गवाक्षकुहरेपि वा॥कायसंकोचमासाद्य गच्छत्यविकलो नरः॥दुर्गामंत्रं विना वत्स मालामंत्रं तथैव च॥सिद्धयः कुलनाथ राजायंते
नोकथंचन॥अथ बालकसंस्कारो यथा॥मधुलाजाभ्यां नाडीछेदात्प्राक् स्वर्णशलाकया श्वेतदूर्वया यज्ञदारुशिखया वा माणवकस्य
जिह्वामोष्ठं दक्षिणपाणिना त्रिवारं प्रमार्ज्य तत्रपं कन्याकारेण पितामूलमंत्रं विलिख्य स्वीपूजयेत्॥तदुक्तं मत्स्यसूक्ते॥अथवा मधुलाजा
भ्यां जिह्वायां बालकस्य च॥नाडीछेदाद्यथापूर्वं लिखेत्स्वर्णशलाकया॥मूलमंत्रं लिखेन्मंत्री यस्योद्देश्ये तु दूर्वया॥वाक्योच्चारणता वा
लो वाग्मी कुतः कविर्भवेत्॥महोग्रतारा कल्पमते तु पैमित्तिकं संस्कारानंतरमेवं मंत्रलिखनं कार्यं॥तदुक्तं महोग्रतारा कल्पे॥जन्मसंस्का
रकं नाम पुत्रे जाते प्रशस्यते॥जिह्वायां तु लिखेन्मंत्रं यज्ञदारुकुशेन वा॥वारत्रयं तु संमार्ज्य रक्षिणेन वपाणिना॥मंत्रमुच्चार्य प्रत्येकं पं
क्तिं कुर्यात्सुशोभनां॥आदौ संस्कारः कर्तव्यः स्तदंते विलिखेन्मनुं॥गंधचंदनपुष्पैस्तु पूजयेत्तारिणीं शिवां॥उत्तराभिमुखो भूत्वा स्थाप
यत्पीठमुत्तमं॥पूजयेत्तारिणीं देवीं नानाभक्ष्यैः सुशोभनैः॥कविर्वाग्मी भवेत्पुत्रः सत्यवादी जितेंद्रियः॥अत्र तारिणी पदमुपलक्षणं देवी
मात्रमेव बोद्धव्यं॥एतद्भी क्रमादितंत्रेषु बालकसंस्कारदर्शनात्॥अथैकादशाहे देवतां पूज्य मंत्रं लिखेत् इति केचित्॥यदि पिता हर
स्थो भवति तदा पितृव्यो मातुलो वा मंत्रं लिखेत्॥तदुक्तं महोग्रतारा कल्पे॥पितुर्भ्राता लिखेन्मंत्रं मातुर्भ्राताथवा पुनः॥पितेव चलि
खेन्मंत्रं नान्य एव कदाचन॥मातुः क्रोडे च संस्थाप्य दर्भो नास्ती र्यत्नतः॥शांतिं कुर्याद्बालकस्य ब्राह्मणैः सह साधकः॥अथ शांति

मंत्रोयथा॥ इमंपुत्रंकामयतः कामजानांइहैवेतिदेवेभ्यपुष्णातिसर्वमिदमिति श्रुवं॥ शिवशांतिस्तारायैके शवेभ्यस्तारायैरुद्रेभ्य
स्तारायैनरायशिवायश्रासेइत्यनेनकुशोदकाभ्यांशांतिंकुर्यात॥ अथस्वकुलदीक्षाप्रयोगोलिख्यते॥ तदुक्तंकुलचुडामणौ॥ नि
जकांतांसमानीयसुशीलांसुयशास्विनीं॥ कुलभक्तांगुरुंप्रार्थ्यदीक्षयेत्कुलदीक्षया॥ परानंदरसाघूर्णलोचनांकुलजांसतीं॥ तां
बूलयासपूर्णास्यांगुरुरक्षोभितः सुधीः॥ निजपुत्रीवदाचार्यः तद्भालपट्टकेलिखेत॥ शक्तिचक्रंनिराद्यंत्यालिखेत्कामकलांततः
तन्मध्येस्वमंत्रेणगर्भितंनामलांछितं॥ तत्रदेवींसमावाह्यध्यात्वादेवींप्रपूज्यच॥ ततस्तत्पुत्रिकाकर्णेऋषिछंदः समन्वितं॥ मूलमं
त्रंनिराद्यंत्याद,थयेद्वामकर्णके॥ अद्यप्रभृतिपुत्रित्वंकुलपूजार्चनेरता॥ अथोपदिष्टविधिनासामरस्यंसमानय॥ इत्यनुज्ञांगुरोर्ल
ब्ध्वाप्रणमेद्दंडवद्भुवि॥ त्राहिमांकुलाचारपद्मिनीपद्मनायक॥ त्वत्पादांभोरुहच्छायांदेहिमूर्ध्नियशोधन॥ गुरवेदक्षिणांदत्वा
तांबूलारुणलोचन॥ स्वकुलंपरमीकृत्ययथादिष्टंसमाचरेत॥ अंगावरणपूजादौयदिनक्षमतेकुलं॥ तदामूर्ध्निगुरुंध्यात्वाकु
लामृतरसेनतु॥ तर्पयित्वाकुलंध्यात्वाजपेन्मंत्रंनिराकुलं॥ ॥इतिपूर्णानंदगिरिपरमहंसविरचितेश्यामारहस्येसप्त
दशापरिछेदः॥१७॥ ॥अथकौलिकानांप्रायश्चित्तंनिरूप्यंते॥ तदुक्तंलिंगागमे॥ शृणुदेविप्रवक्ष्यामिप्रायश्चित्तमनु
त्तमं॥ तद्विशुद्धिविधिश्चैवभैरवेनसुभाषितः॥ गुरुत्यागकरः शिष्यः प्रायश्चित्तीभवेध्रुवं॥ लक्षंश्रीपादुकांजप्त्वातिस्मात्पाप
द्विशुध्यति॥ मंत्रत्यागकरः श्रेष्ठः तत्संगंनैवकारयेत॥ लक्षमेकंजपेन्मंत्रंहोमतर्पणतः शुचिः॥ एतत्तुदिव्यवीरगुरूणांत्यागे
बोद्धव्यंपशुगुरुत्यागःकुलशिष्येणकर्तव्यएवतत्प्रमाणंतुपुरश्चरणपरिछेदेलिखितमेवच॥ रुद्रयामलेपि॥ मधुलोभाद्यथा ८९
भृंगः पुष्पात्पुष्पांतरंव्रजेत॥ गुणलुब्धस्तथाशिष्योगुरोर्वैर्गुर्वतरंव्रजेत॥ मंत्रानुमंत्रांतरंव्रजेदितिपाठांतरं॥ तन्मंतेरिपुर्मंत्रः॥

साध्यमंत्रोबीजहीनः संदिग्धोवास्यात्तदातंत्यक्त्वान्यमंत्रग्रहणंकुर्यात॥ अथवाविद्यांविहायमहाविद्याग्रहणंवा॥ तदुक्तंतत्रैव॥
किकलोबीजहीनश्चसंदिग्धोनिंदितस्तथा॥ मनवस्तेनसिध्यंतिगुरुस्याद्ब्रह्मघातकः॥ तदातंसहसाज्ञात्वामंत्रेदेवंगुरुंत्यजेत॥
सगुणंसाक्षरंशांतंसस्त्रीकंपुत्रसंयुतं॥ ज्ञाततत्वंज्ञातपक्षमेकंदेवंगुरुंभजेत॥ बहुज्ञोपिगुरुस्त्याज्योज्ञातसारोवराननै॥ अल्प
ज्ञोपिगुरुः पूज्योयोजानातिकुलाकुलं॥ एकत्रगुरुणासार्धंस्वपदुपविशेद्वयः॥ सयातिनरकंघोरंयावदिंद्राश्चतुर्दश॥ गुरुवा
क्यंहतंचत्वाचात्मवाक्यंतुस्थापयेत॥ गुरुंजेतुंमनोयस्यपच्यतेनरकार्णवे॥ अनेकधापशोरन्नंभुंजतेयेचकौलिकाः॥ तेभ्यः प्र
कुप्यतेदेवीतत्संसर्गंनकारयेत॥ लक्षत्रयंजपेद्धुज्ञांलक्षंवाप्यजपांजपेत॥ होमयेद्धविषाज्येनविष्यापस्यात्तदाध्रुवं॥ कौलि
कः पशुगामीचेत्पशुशक्तिंरमेद्बलात॥ गोष्ठीमध्येतुयत्नेनस्पर्शंतस्यनकारयेत॥ एकपात्रेपिबेद्द्रव्यंवीरोमाहेश्वरोयदि॥ शुनोछि
ष्टंभवेत्पानंप्रायश्चित्तीसकौलिकः॥ गायत्रीभिःसहस्रेणउपवासत्र्यणच॥ सम्यक्कृशोधितचित्तंतुसुवर्णंगुरवेददेत॥ चक्रंकृ
त्वातुदेवेशिपूजयेत्तर्पणेविना॥ चत्वारस्तस्यनश्यंतिआयुर्विद्यायशोबलं॥ अभिषेकेविनाभूतेआचार्यत्वंकरोतियः॥ योनिको
टिशतंयातिरौरवंनरकंव्रजेत॥ मातृरूपंपरित्यज्यस्त्रीरूपंशक्तिमाचरेत॥ सयातिनरकंघोरंजन्मकोटिशतानिच॥ परालक्ष
त्रयंजप्त्वाचाजपांलक्षमेवच॥ तुर्यबीजंपंचलक्षंततः शुद्धिः प्रजायते॥ मंत्रमाताचपुत्रीचभगिनीचकुलांगना॥ नरमेकौलि
कोनित्यमेताः सम्यक्समर्चयेत॥ श्रीपात्रग्रहणंकृत्वाचक्रमुत्थापयेद्यदि॥ पशुपानंभवेत्तस्यप्रायश्चित्तीतुजायते॥ अथमंत्र
मातृगमनेप्राणांतंप्रायश्चित्तं॥ तदुक्तंतंत्रांतरे॥ बलाद्वास्वेछयावापियोरमेन्मंत्रमातरं॥ दशलक्षंमनुंजप्त्वातुनलंसमाचरेत॥
पुत्रीकुलांगनाभगिनीगमनेमूलमंत्रलक्षजपाच्छुद्धिः॥ तदुक्तंतत्रैव॥ मंत्रपुत्रीस्वपुत्रीचभगिनीचकुलांगना॥ रमणाल्लक्षज
पेनपूताभवतिकौतुकः॥ अथतंत्रांतरे॥ पर्वण्यपूज्यदेवेशिगुरुमभ्यंचशक्तितः॥ अकृत्वाचबलिंतत्रमूलमष्टशतंजपेत॥ प

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

त्रपुष्पंफलंमूलंमन्नंपानादिमौषधं॥अनिवेद्यनभुंजीतयद्याहारायकल्पितं॥अनिवेद्यतुभुंजानःप्रायश्चित्तीभवेन्नरः॥द्दे
व्याश्चाष्टशतंमंत्रंजप्त्वापूतोभवेध्रुवं॥अनास्थिप्राणिसंघातंहत्वाचदशकंजपेत्॥हत्वाचपक्षिणःसर्वास्त्रिरेकादशकंजपेत्॥
सर्पमार्जारनकुलंश्वानमुष्ट्रखरहयं॥गजाद्यांचमृगान्सर्वान्हत्वाचाष्टशतंजपेत्॥जपेदष्टसहस्रंतुक्षत्रविट्शूद्रवधेविदुः॥हत्वाश्रू
द्रंस्त्रियंबालंमंत्रंपंचशतंजपेत्॥जपेदष्टसहस्रंतुसच्छूद्रविनिपातने॥त्रयोदशसहस्रंतुद्विजवीरवधेजपेत्॥वीरस्त्रीगम
नेनापिद्दृथापानेतथैवच॥गुरोःस्नुषामंत्रपुत्रीगमनेनचकौलिकाइति॥इदंत्वज्ञानकृतेबोद्धव्यं॥ज्ञानकृतेतुलक्षजपाच्छुद्धिः
तदुक्तंब्रह्मयामले॥हत्वावीरवधंमंत्रीद्दृथापानंगुरोःस्नुषां॥वीरपत्नींमंत्रपुत्रींरत्वादिगयुतंजपेत्॥महापातकादिप्रायश्चि
त्तंलतासंवलनेनकार्यं॥तदुक्तंकालीतंत्रे॥लतांतरेषुजप्तव्यंमहापातकमुक्तये॥अथकुलीनार्चनंब्रह्मयामले॥माहेश्वरं
समालोक्यपूजयेद्विधिपूर्वकं॥यथाविभवपूर्वेणपंचतत्वंनिवेद्यच॥तदातुष्टाभवेद्देवीसर्वान्कामानुपालभेत्॥अन्यथानैव
सिद्धिःस्यात्क्रुद्धाभवतियोगिनी॥मेदिनीयस्तुसंपूर्णाब्राह्मणेवेदपारगे॥दत्वायत्फलमाप्नोतितत्फलंकौलिकार्चने॥मेरु
तुल्यंसुवर्णंतुब्राह्मणेवेदपारगे॥दत्वायत्फलमाप्नोतितत्फलंकौलिकार्चने॥अश्वमेधसहस्राणिवाजपेयशतानिच॥देवेशि
यत्फलंदृष्ट्वातत्फलंकौलिकार्चने॥वापीकूपतडागादीन्कृत्वायत्फलमाप्नुयात्॥तत्फलाल्लक्षगुणितंकौलिकानांप्रपूजने॥
कपिलाश्वगजान्दत्वायत्फलंलभतेनरः॥तत्फलात्कोटिगुणितंकौलिकानांप्रपूजने॥कौलिकंनिंदयेद्यस्तुकुलशास्त्रपरा
यणः॥सयातिनरकेघोरेसत्यमेवनसंशयः॥ ॥इतिश्यामारहस्येष्टादशपरिच्छेदः॥१८॥ ॥अथपुष्पाधिष्ठान ८८
मंत्रोयथा॥प्रणवंह्रूंपुष्पकेतुंपदंराजार्हतेतथा॥शतायसम्यगुच्चार्यसमुद्धायचतारकं॥पुष्पयुगंमहापुष्पेसुपुष्पेपुष्पसंभवे॥
पुष्पचयावकीर्णेहुंफट्स्वाहेतिसमुद्धरेत्॥प्रक्षिप्तुद्धमनेनैवपुष्पंदेव्यास्तथाचरेत्॥ ॥छ॥ ॥ ॥ ॥